३. ,, ११·६९ फालः सीरोपकरणोत्प्लवयोः फालमंशुके इ कोशः । कीनाशः–कर्षके क्षुद्रे कृतान्तोपांशु घातिनो इति कोशः । शुनश्च सीरश्च शुनासीरौ (देवता द्वन्द्वे च पाणिनीय–६·३-२६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोभनाः फलाः सोऽग्रस्थाः लोहविशेषाः शुनं सुखं यथा तथा भूमिं विलिखन्तु । कीनाशाः हलिनः (कर्षकाः) सुखेन वृषभैः सह अभिगच्छन्तु । हे वायवादित्यौ अस्माकमोषधीः व्रीह्यादिकाः शोभन फलाः यवां कर्तनं कुरुतम् । शुनो वायुः सीर आदित्यः । जलेन भूमिं सिञ्चन्तौ ओषधीः सफलाः कुरुतम् ।

घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्सीते पयसाभ्याववृत्स्व । (१)

महीधरस्य व्याख्यानम्—सीता लाङ्गलपद्धतिर्मधुना मधुरेण घृतेनोदकेन समज्यतां संसिच्यतां सिक्ता भवतु । कीदृशी सीता । विश्वैर्देवैर्मरुद्भिश्चानुमता अनुज्ञाता अंगीकृता वा । हे सीते ऊर्जस्वती अन्नवती सा त्वं पयसा पयोदधि घृतादिभिः पिन्वमाना दिशः पूरयन्ती सती पयसा दुग्धादिभिः सह अभ्याववृत्स्व अस्मदभिमुखमावृत्ता भव । अस्माकमनुकूला भवेत्यर्थः । अनेनप्रकारेण अनेके मन्त्राः निगदिताः सन्ति । अनेके वृक्षाः शोकनाशनेऽपि समर्थाः सन्ति । अस्य चर्चा यजुर्वेदस्य द्वादशाध्याये विस्तरेण वर्तते । तद्यथा—

"अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
वाः सर्वाः संविदाना इदं मे प्रावता वचः ।। (३)

ओषधयः युष्माकं मध्ये अन्या काचिदोषधिव्यक्तिरन्यामोषधिव्यक्ति-

---

१. यजुर्वेदे-१२.७०
२. ववृत्स्व-वृतेः बहुलं छन्दसि (पाणि०. २.४.७६) इति शपः श्लौ सति लोटि ववृत्स्वेति रूपम् ।
३. यजुर्वेदे—१२-८८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतु । तथा रक्षिता अन्यापि अन्यस्यां रक्षिकायां उपावतु उपसमीपमाग. त्य पालयतु । अन्यान्यस्याः प्रभावभवतु । ताः सर्वा स्तथाविधा ओषधयो यूयं संविदानाः परस्परमैकमत्यं गताः सत्यो मे वचो वाक्यं प्रार्थनारूपं प्रकर्षेण रक्षत । महीधरः । अयम्भावः प्रायेण एका ओषधि अन्या ओष. धिप्रभावेण कुप्रभाविता भवति परन्तु वेदे ऐतादृशी व्यवस्था आसीत् एका ओषधि द्वितीयायाः पूरिका भवति स्म । न च ताः परस्परं बाधिकाः अपि. तु साधिकाः आसन् । अद्यापि आयुर्वेदे एतत ज्ञानं वर्तते परन्तु सर्वं ज्ञानं विश्वस्योदारीकरणेन व्यवस्थया कवली कृतम् । केवलमद्य ज्ञानस्योपयोग. भाषणे दशीदृश्यते । वनस्पतौ ओषधीषु अनेके गुणाः वर्तन्ते तस्माद् वैदिक. कालादेव ओषध्यादिगुणानां संकलनं क्रियते विद्वद्भिः । यत्रौषधयः वस. न्ति रोगाः तत स्थानात् दूरे गच्छन्ति —

अवपतन्ती खदन्दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः । यजु० १२-९१

यजुर्वेदे एकस्मिन् मन्त्रे ऋषिभिरोषधि प्रार्थिता । तत्र सर्वस्वं रक्ष. रक्षणाय प्रार्थयति अनेन स्पष्टसन्देशः अस्माभिः प्राप्यते यत् इयमौषधि मानवानां कृते पशूनां च कृते बहूपयोगिनी अस्ति—

"मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।
द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ॥" १२-९५

अयमर्थः हे ओषधयः युष्माकं खनिता चिकित्सायै युष्मन्मूलं ग्रहीतुं खन. नकर्ता मा विनश्यतु । यस्मै च रुग्णाय चिकित्सार्थं युष्मानहं खनामि । किं बहुनास्माकं संबन्धि द्विपात् स्त्रीपुंस चतुष्पादगवादि प्राणिजातं सर्वं मनातुरं रोगरहितमस्तु । इमा ओषधयः अनेके रोगाः विनाशयन्ति—वा. तरोगा, अर्शा, क्षयः, मन्दाग्निः, यक्ष्मादयः । —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी" ।। (१) १२-९७

ओषधि खननकाले मनुष्यैः सावधानैः भाव्यम् । अर्थात् यथेयमौषधि जड़-मूलात् न विनश्येत तथा खननं विधातव्यम् —

दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ।।

अयमभावः खननकर्ता दीर्घायुर्भूयात् । रुग्णजनोपि दीर्घायुर्भूयात् । अपि च (ओषधिः) त्वं दीर्घायुः— अखण्डितजीवना भूत्वा शतवल्शा बह्वंकुर मती विरोहतात् बह्वङ्कुरोत्पद्यस्व । वल्श शब्दोऽङ्कुर वचनः । खनन समये मूलस्य संरक्षणं कर्तव्यम् मूल संरक्षणेन पुनः तत् स्थानात् अस्या ओषधेः प्रादुर्भावः स्यात् । वृक्षं पश्चितः वृक्षलतागुल्माश्च भवितव्याः स्थापितव्याः । येन वृक्षस्य रक्षा पश्वादिभ्यः भवेत् ।

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोस्माकं यो अस्मां २ अभिदासति ।। १२-१०१

हे ओषधे त्वमुत्कृष्टासि वृक्षाः शालतमालादयः तव उपस्तयः उपस्त्याय-न्ति उपकारायोपद्रवनिराकरणाय च समीपे संहतास्तिष्ठन्तीत्युपस्तयः त्वां सेवन्तामिति ।

---

१. बलमस्यति क्षिपतीति बलासः क्षयः । अर्शसः गुदव्याधिः ।
उपचिताम्—शरीरेये उपचीयन्ते श्वयथु गण्डश्लीपदप्रभृतयः ।
पाकारुः — मन्दाग्निः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वतोभावेन प्रयासेन च वृक्षस्य रक्षा कर्तव्या भवति । यदि गृहनिर्माणाय यज्ञ सम्पादनाय च वृक्षस्य प्रयोजनं भवेतर्हि वृक्षाणां सम्यक् अवलोकनं कर्त्तव्यम् अर्थात् कः वृक्षः नवीनः कश्च पुराणः कश्च फलप्रदः, कश्च योग्यः इति सर्वं विवेचनं कृत्वा वृक्षस्य कर्त्तनं विधेयम् । अस्यार्थस्य पुष्टिः निम्नमन्त्रे भवति —"अत्यन्यां २ अगांनान्यां २ उपागमं कृत्वा परेभ्योऽविदं परोऽवरेभ्यः । (१)

अयमर्थः हे वृक्ष त्वत्तः अन्यान्कांश्चिच्चूष्यानपि सम प्रदेशजन्मादिलक्षणरहितानत्यगाम् अतिक्रान्तवानस्मि । भवन्तं च दृष्ट्वा न अन्यान् वृक्षान् उपागम उपागतवानस्मि । किं च परेभ्यः वृक्षेभ्यः दूरवर्तिभ्यः अर्वाक् निकटं त्वां लब्धवानस्मि । अवरेभ्यः निकटेभ्यः पश्चः परस्तात् लब्धवानस्मि । वृक्षकर्त्तन काले एतद्ध्यातव्यं भवति यत् वायवीय जीवानामथवा पार्थिवजीवानां हिंसा यथा नो भवेत् तथा कर्त्तव्यम् । लघुवृक्षा अपि रक्षणीयाः कर्तकेण । मूलस्य रक्षणं विधेयम् । कर्तनानन्तरं तत्स्थाने जलेन आहुत्या च सेचनं कर्तव्यम् तद्यथा—

"धां मा लेखीरन्तरिक्षं मा हि सीः पृथिव्या सभव ।
अयं हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ।" (२)

अत्र एकः प्रश्नः उदेति संसारेऽस्मिन् वृक्षस्य कियत्यः संख्याः भवितव्याः अथवा ग्रामे अस्य संख्यायाः निर्धारणं केन प्रकारेण भवेत् येन मनुष्यस्य संपूर्णविकासः स्यात् ? अस्य प्रश्नस्योत्तरं मम मते समीचीनं न दृश्यते परन्तु एक वृक्षोपरि दशमनुष्याः भवितव्याः यथा—

---

१. यजुर्वेद-५-४२
२. यजु०— ५-४३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा विवयं रुहेम" (३)।

यद्यपि शत-सहस्र संख्या अनन्तवाचका। परन्तु शब्दस्य सामान्योऽर्थः अयमेव लभ्यते।

अनादिकालात् वृक्षैः सह मानवानां प्रगाढ़ संबधः वर्तते। श्रौतयागे सर्वाणि यज्ञपात्राणि प्रायेण काष्ठनिर्मितानि भवन्ति अनेकानि प्रमाणानि श्रौतसूत्रे विद्यन्ते। एकस्मिन् मन्त्रे प्रोक्तम् हे वनस्पते! दृढो भव। त्वं मम मित्र समः विपत्तिकाले रक्षको भव। पृथिव्या सह सन्नहस्त्वं स्वाश्रितान् जनान् जय प्रदो भव।

"वनस्पते वीड्वंगो हि भूया अस्मत् सखा प्रतरणः सुवीरः।
गोभिः सन्नद्धो असि वीडयस्वाथातते जयतु जेत्वानि" ॥ यजु०

यजुर्वेदस्य षोडशेऽध्याये रुद्रसूक्तेऽपि उक्तम्—

'नमो वृक्षेभ्यो हरिकेशेभ्यः' अर्थात् वृक्षरूपाय परमेश्वराय नमः।
'नमः पर्णाय च पर्णशदाय च' अनेन प्रकारेण अनेके मन्त्राः उदाहरणीयाः विद्यन्ते। भारतवर्षे अद्यापि अश्वत्थादयो वृक्षाः मनुष्यैः पूज्यन्ते। अग्नि सूर्ययोरपि वर्णनं यजुर्वेदे प्राप्यते। अग्निः समस्त वनानां स्वामी पालश्च वर्तते। सूर्याग्नीभ्यां निर्दिष्टः मार्गः बाधा रहितो भवति—एष वास्य खलु रक्षोहणः पन्था योग्नेश्च सूर्यस्याः अग्निः यजुर्वेदे 'व्रतपति' नाम्ना ख्यातोऽस्ति—
'अग्ने व्रत पते व्रतञ्चरिष्यामि। यजुर्वेदे। अध्याये।
सूर्यस्य रश्मयः इन्धनरूपाः विद्यन्ते—ग्रीष्म इद्वसन्तः शरद्धविः। सूर्यः चरा-

---

३. यजु० —५-४३ वल्श शब्दः अङ्कुरवचनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चराणामात्मा चक्षुरूपश्च । सूर्यआत्मा जगतस्त स्थुषश्च । असौ सूर्यः स्वकीयेन महिम्ना सर्वं प्रकाशयति निर्माति च । —

"यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना" ॥

अनेन प्रकारेण शुक्लयजुर्वेदे पर्यावरणस्य विषयाः विस्तरेण विवेचिताः वर्तन्ते । पश्यन्तु निबन्धस्य विस्तरभयान्नलिख्यते । अन्तेच-द्यौः शान्ति रन्तरिक्षं शान्तिः पृथिवी शान्ति रापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि । इति शिवम् । सत्यम् । ॐ शान्तिः ।

---

१. वैकङ्कतानि पात्राणि । खादिरा स्रुवः । स्फ्यश्च । पालाशी जुहूः । आश्वत्थ्युपभृत । वारणान्यहोमसंयुक्तानि । हूयते यया सा जुहूः पालाशीकर्त्तव्या । होमेन संयुक्तानि यानि न भवन्ति पात्राणि तानि वारणानि भवन्ति, यथा—उलूखलमुसलकूचडापात्रीपिष्टपात्री पुरोडाशपात्री शम्याप्रृतावदानाभ्युपवेषान्तर्धानकट प्राशित्रहरण षडवत्तब्रह्मयजमानासनहोतृषदनानि । इति कात्यायन श्रौत सूत्रे— १-३-३२ तः ३७ यावत् ।

— वनस्थली विद्यापीठ
टोंक (राजस्थान)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टपदी, भोगैकलक्ष्यपशुतैव भविष्यमस्ति

— प्रो० केशवराम शर्मा

※

केचिज्जनाः स्वभुवि नैतिकतानिपात
स्वोपज्ञतर्कनिकरेण समर्थयन्ति ।
ये न स्वयं न परमीक्षितुमीशतेऽत्र
यान्तं समुन्नतिपथं शुचिताबलेन ।।

व्याप्तं दुराचरणदोषमवेक्ष्य दिक्षु
शिष्टेरपि प्रपतितव्यमिति स्थितिश्चेत् ।
आलोक्य कुत्सितरतिं प्रतिवेशिनीनां
बहवः प्रशस्तकुलजा। कुलटा भवेयुः ?

दिव्यज्योति, नवम्बर १००१.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पित्रा धनं यदि विगीतपथार्जितं स्यात्
पुत्रोऽपि तेन यदि यातु किमत्र तर्हि ।
यातो हिरण्यकशिपोः पथि किन्न सूनुः
प्रह्लाद आभुवनसम्मतकीर्तिकान्तः ।।

त्यक्ता त्रपा यदि विदेशभवाङ्गनाभि
स्तां तेन संत्यजतु भारतजा ततस्तु ।
व्याप्तं वनं हि पशितः पशुभिः समीक्ष्य
शिष्टा जना अपि ततः पशवो भवेयुः ।।

नैवेश्वरः क्वचिदिहास्ति जगन्नियन्ता
स्वाभाविकं सकलमस्त्यलमीश्वरेण ।
आत्मानमेव विनियामकमत्र वत्स !
हित्वा क्षणार्धमपि जीवतु तर्हि कश्चित् ।।

साम्यं समस्तजनमध्यगतं विधातुं
विच्छिद्य भेदमुचितो यदि साम्यवादः ।
तर्हि क्षमा तु सकलैव भवेत्समाना
काश्मीर एव किमु केशरसंभवोऽस्ति ।।

वेशं सतां हि पशिधाय जगत्यसन्त
आसादयन्ति यदि मानमनेन यामः ।
यः कोऽपि तर्हि नटवेशधरो हि शामः
प्राप्नोति पूज्यपदवीं किमु नैव लोके ?

पाश्चात्यचिन्तनवशंवदमानसेन
चेद् भारतेन भवितुं यतितं हि तर्हि ।
व्यातस्य योगमयपावजीवनार्थं
भोगैकलक्ष्यपशुतैव भविष्यमस्ति ।।

— दिव्यदीपः
सोलन (हि०प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः

– डा० रमणीका जलाली
जम्मू वि० वि०

☆☆

जगत्, संसारः, संसृतिरित्यादयः शब्दाः समुद्घोषयन्ति संसारस्य परिवर्तनशालित्वम्। नेह किञ्चिद्वस्तु शाश्वतं, स्थिरम्, अपरिवर्तनशालि वा। यदा सर्वस्य लोकस्येदृश्यवस्था तदा न सम्भवति मानवजीवनस्यापरिवृत्तित्वम्, तत्रापि च सुखस्य दुःखस्य वा समावस्थया समवस्थानम्।

जगति यथर्तवः परिवर्तन्ते, यथा सप्तसप्तिरूदेति, विधुरस्तमेति, निशाकरश्चोदयं याति, प्रभाकरश्चास्तमुपगच्छति, यथा रात्रेरनन्तरं दिनं दिवसानन्तरं च विभावरी, तथैव सुखानन्तरं दुःख, दुखानन्तरं च सुखम्, सम्पदनन्तरं विपत्, विपदनन्तरं च सम्पदिति सर्वमेतत् परिवर्तनस्य क्रममात्रम्। एतदेव तथ्यं समीक्ष्य सन्दिशति शाकुन्तले कविकुलगुरूः कालिदासः—

'यात्येकतोऽस्तशिखरं पतिरोषधीनाम्, आविष्कृतोऽरुणपुरसर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु। १

उत्थानं पतनम्, उत्कर्षोऽपकर्षः, जन्ममृत्युः संपत्तिर्विपत्तिः सुखदुखमिति च परिवृत्तेरवस्थान्तरमेव नान्यत्। यथा शैशवं तदनु यौवनं, तदनु वार्धक्यम् तदनु देहावसानं, तदनु जन्मान्तरं तदनु पुनः शैशवम्, एवमेव जीवने सुखदुःखे परिवर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतूनां परिवृत्तिमन्तरेण नाभविष्यत वसन्तो, ग्रीष्मो वर्षा वा। न चेदभविष्यत् सुवृष्टिर्नाभविष्यत् सुभिक्षम्। नाभविष्यच्चेद् दुःख नानुभूतमभविष्यत् सुखम्। दुःखस्य सत्तैव सुखमनुभावयति सुखस्य सत्ता च दुखम्। यद्येको याबज्जीवं सुख सम्पत्तिमेवानुभवेदन्यश्च दुःख विपत्तिमेव वा, तर्हि न प्रसरिष्यति लोकस्थितिः। कर्मणामावश्यकतोपयोगिता चानुभूयते सर्वैरेव। कर्मविपाकोऽपि नियतोऽतः कर्मानुरूप कश्चित स्वकृत सुकृतपरिपाकरूपेण सुखमधिगच्छति, तदविपर्ययेण च दुःखम्। सुखदुःखं पश्चिवर्त्तमानमेतत सुतरां शिक्षयति निखिलं जगत् सुकृत्यस्य सत्परिणामित्वं, दुष्कृत्यस्य च दुष्परिणामित्वम्।

परिवृत्तेरेतस्या महत्वमालोक्यैव महाकविभिर्विविधा सूक्तयो विषयेऽस्मिन् वर्णिता। यथा च.....

(क) अतोऽपि नैकान्तसुखोऽस्ति कश्चिन्नैकान्तदुःखः पुरुषः पृथिव्याम्। २

(ख) भाग्यक्रमेण हि घनानि भवन्ति यान्ति। (३)

किं नाम सुखं, किञ्च दुखमिति। सुखदुःखयोः बहूनि लक्षणानि वर्ण्यन्ते विविधैः शास्त्रकारैः। भगवान् मनुरत्र निर्दिशयति यत् सर्वमात्माधीनं सुखम्, आत्मायत्तत्वं च सुखत्वमिति, परायत्तत्वं च दुखत्वमिति। तदाह- "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्। एतद् विद्यात् समासेन लक्षणं सुखदुःखयो"।

सुष्ठु खानि सुखानि, दुष्टानि दुःखानि इति। सुखवद् दुःखस्यापि जीवनेऽनल्पं महत्वम्। अननुभूय दुःखं न सुखं साधूपभुज्यते। अतः साधूच्यते..."सुखं हि दुःखान्यनुभूयशोभते", (४) यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् (५)। समीक्षयते चैतत् प्रत्यहं यन्न सुखं सुलभं दुखानुभूतिमन्तरा प्रत्यवाय मन्तरेण च। दुःखमनुभूय प्रत्यूहान् निरस्य च श्रेय सुल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भम्। अत एवाभिधीयते—श्रेयांसि बहुविघ्नानि भवन्ति महतामपि। अपि मार्गस्थितानां विघ्नवत्यः प्रातिपथिकसिद्धयः। (६) विघ्नवत्यः प्रातिपथिकसिद्धयः। (७)

दुःखोदधौ निमग्नेन धैर्यमेवावलम्बनीयम्। धैर्यमाश्रित्यैव धीराः विपत्पारावारमुत्तरन्ति। पाराबारे पोतभङ्गेऽपि सांयात्रिको धृतिमवष्टभ्य तितीर्षत्येव।

उक्तं च... "त्याज्यं न धैर्यं विधुरेऽपि काले, धैर्यात् कदाचिद् गतिमाप्नुयात् सः। याते समुद्रेऽपि च पोतभङ्गे, सांयात्रिको वाञ्छति तर्तुमेव।" आत्मशक्तिर्हि सर्वोदयस्य मूलम्। दुखविभावरीं स्वप्रखरांशुभिः सद्यः संहरति। अत उच्यते—'उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः"।

धैर्यधना हि साधवः। ते सम्पदि न हृष्यन्ति, न च विपदि विषीदन्ति। अतः सुखदुःखे समे कृत्वा प्रवर्तेत। सम्पदि विपदि च महतामेकरूपतैव लक्ष्यते। यथा चोच्यते...'उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता।, अतः सम्पदि न हृष्येत्, न च विपदि विषीदेत्। धैर्यमाधाय चेतसि स्वीयं कर्तव्यमतिवाहयेत्॥

Refrences .....

१. शाकु० iv २।, २. बुद्ध० xi ४३। ३. मृच्छ० i। १३
४. मृच्छ० i। १०, ५. विक्रमो iii। २१.
६. किराता० v। ४६, ७. शाकु० अङ्क० iii

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृदेवो भव

— डा० सन्ध्या
जम्मू

※

'मधुरतमं, कोमलतम, स्निग्धतमं, शीतलतम, पवित्रतमं नाम माता"।

अस्मिन् संसारे मातैव सा शक्तिः, या विनय—माधुर्यशीला, ममता-मूर्ति, क्षमाप्रवण स्नेहसिक्ता अनुरागरक्ता सौम्यगुणसंपृक्ता अनुरक्ताऽपि विरक्ता लघ्वी अपि गुर्वी प्रबलाऽपि सबला कठोराऽपि मृदवी स्वीयस्नेहादिगुणैर्भुवं दिवं चाप्यतिशेते। न मातुर्महत्वं कथमपि निर्वचनीयं वर्णनीयम् उपमेयं च। सा ममतायाः आगारम् गुणानां निधिः शीलस्य मूर्तिः विनयस्याकरः क्षमायाः खनिः स्नेहस्य सागरश्चास्ति अभूद वर्तते वर्तिष्यते च। सा स्थैर्येण अचलम् धैर्येण सागरम् पावनत्वेन पवनम् माधुर्येण पीयूषम् क्षमया धरित्रीम् सत्त्वोद्रेकेण पावकम् आह्लादनेन चन्द्रमसम् दीप्त्या भानुं चाप्यतिशेते।

यजुर्वेदे माता पावयित्री शोधिका च प्रोच्यते। 'आपो अस्मान् मातरः शुन्धयन्तु'। (१) तैत्तिरीयोपनिषदि 'मातृदेवो भव' 'पितृदेवो भव' (२) इत्यनुशिष्यते। मनुना मातुर्महत्वं निर्दिश्यते यन्माता पितृसहस्रमपि गौरवेणातिरिच्यते। उक्तं च —

"सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते"।। (३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वधैर्यं...क्षमादि-गुण-महत्त्वञ्च सा पृथिव्या मूर्तिमन्यते।

"माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः।" (४)

महाभारतेऽपि व्यासेन निर्दिश्यते.. नास्ति मातृसमो गुरूरिति।

'दशाचार्यानुपाध्याय उपाध्यायान् पिता दश।
पितृन दश तु मातैका सर्वा वा पृथिवामपि।
गुरूत्वेनाभिभवति नास्ति मातृसमो गुरूः॥" (५)

एवमेव मातुर्महत्त्वम् अन्यत्रापि श्रूयते...'माता परं दैवतम्', 'माता गुरूतरा भूमेः'।

मातैव शिशोः सर्वस्वम्। सा शिशुहितचिन्तनपरा शिशुसंरक्षण संसक्ता कष्टसहस्रमपि तृणवद् गणयति।

शिशोः संवर्धनं रक्षणं पालनं सर्वविधसमुत्कर्षश्च तस्या जीवनस्य लक्ष्यम्।

मातृभूमेर्मातृरूपेण वर्णनं न कस्य सचेतसश्चेत आवर्जयाते। सा सुवर्णमयी भूमिः सततं समेषां प्रणतिमर्हति।

तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः (६)

देशभक्ति-भावनैव सा भावना याऽन्तश्चेतनां प्रेरयति उद्बोधयति च। सैव दिव्यशक्तिरूपेण मुमूर्षौ मृतप्राये च प्राणसंचारं विदधाति। देशभक्तिनोद्भासित-चेतसो न दुखं गणयन्ति न सुखं कामयन्ते, न कष्टजातं चिन्तयति न विघ्नसहस्रं समीक्षन्ते न भौतिकाभ्युदयं लिप्सन्ते न स्वार्थं संपिपादयिषन्ति न च स्वोत्साह-भङ्गम् ईहन्ते।

भारतमातुर्गौरवकीर्तनार्थमेव प्रोच्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दे मातरम् ।
सुजलां सुफलां मलयजशीतलाम् ।
शस्यश्यामलां मातरम्, वन्दे मातरम् ।।

Refrences :—

१. यजु० iv /२ २. तै० i /११/३
३. मनु० ii / १४५, ४. मनु० ii / २२६
५. महाभारत ६. अथर्व० xii /१/२६

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं।

—व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमर्थमर्थसाधना ?

– डा० रामकृष्ण सराफ:

★★

भोजनं लभ्यतेऽर्थेन बुभुक्षा हा नशाम्यति ।
क्षुधातृप्तिर्यथा न स्यात्तस्मादधनं निरर्थकम् ।।

भेषजं हि धनैः क्रीतं स्वास्थ्यं क्रेतुं न शक्यते ।
वित्तस्य व्यर्थता तर्हि स्वास्थ्यं येन न रक्ष्यते ।।

धनेन सुस्तरः प्राप्तो निद्रा तत्रापि दुर्लभा ।
सुप्तिर्न जायते येन तेन वित्तस्य तुच्छता ।।

धनेनाभूषणसिद्धं सिध्यते न तु चारुता ।
चारुत्वं न धनक्रेयं तद् द्रविणस्य फल्गुता ।।

धनमित्राणि जायन्ते सन्मित्राणि भवन्ति न ।
सन्मित्राणियथा न स्यु स्तस्य तत् किमर्थता ।।

धनेन हि सुखं प्राप्तमानन्दो नोपपद्यते ।
आनन्दो न यथा जातस्ततोऽर्थव्यर्थता मता ।।

धनस्य मोघतां मत्वा नित्यं काङ्क्षस्व सारवत् ।
असारवद्धन नूनं शश्वच्छीलस्य सारता ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हानिर्न जायते काचिद् विनाशमेति चेद्धनम् ।
विनष्टं स्वं यदि स्वास्थ्यं क्षतिरापन्न संशय: ।।

हानिश्चेद् भ्रष्टतां यातं सर्वं नष्टमिति ध्रुवम् ।
अत: शीलधनै: शीलं प्राणव्ययेन रक्ष्यते ।।

अस्मिन्देशे सुधीधीरै नित्यं शीलं सुसेवितम् ।
सता शीलेन सम्प्राप्ति: शीलं सतां विभूषणम् ।।

अर्थानामर्जने क्लेशस्तथैव परिपालने ।
श्रेयो न प्राप्यते तर्हि किमर्थं मर्क्ष साधना ।।

जीवितस्यैव यात्रायै वित्तं भवतु साधनम् ।
जीवने न भवेत् साध्ययुक्तं तद्धि मनीसिभि: ।।

— आवास: ई-७/५६२ अरेराकॉलोनी
भोपाल (४६२०१६)

—।★★।—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राष्ट्रीयता-नैतिकता समुत्पादनाय संस्कृत-शिक्षानिवार्या

– श्री नारायणदत्त तिवारी

❋❋

मानवेषु प्रेरणाजागृतिसमुत्पादिका भाषा संस्कृतम् । अस्यां भाषयां लिखितं ज्ञानविज्ञानदायकसाहित्यम् । एतद द्वयं मानवमनन्तकालाय संस्कृतेन सह संयोजयिष्यति । संस्कृतभाषया मानवाय सर्वदा सांस्कृतिकसन्देशः प्रदत्तः । देहली प्रशासनस्य संस्कृत अकादम्याः गंगायाः पावनभूमौ हरिद्वारे त्रिदिवसीयसंस्कृतसम्मेलनायोजनेन संस्कृतभाषायाः गरिमा प्रवर्धिता । हरिद्वारः देवभूमिः, चतुर्धाम्नाञ्च द्वारो वर्तते । कस्या अपि भाषायाः व्यक्तिर्भवेत् संस्कृतश्लोकानां मधुरोच्चारणं स सर्वदा करोति । जर्मनविदुषा मेक्स मूलरेण भारतीयदर्शनस्य चिन्तनस्य च विषये गम्भीरान्वेषणेन इण्डोलोजी विषयः अन्विष्टः संसारस्य समक्षे च संस्थापितः । सत्यन्त्विदं यत् संस्कृतस्य एव स्वरूपमिदम् । देशीय प्रदेशीय विविध भाषोदाहरणेन श्रीतिवाणिना उत्तराञ्चलस्य मुख्यमन्त्रिणा कथितं साधितञ्च यत् संस्कृतभाषा विविधभाषाजननी । स अग्रे कथितवान् यत् सत्यमेव संस्कृतभाषा सर्वभाषाजननी । तेनाग्रे भणितं यत् उत्तरा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ञ्चलेऽपि २ नवाम्बर दिवसे २००२ खृीष्टाब्दे संस्कृतसंस्थान स्थापना करिष्यते । तेन समारोहोऽयमुद्घाटित: ।

उत्तराञ्चलस्य मुख्यमन्त्री श्री नारायणदत्त तिवारी दिल्ली प्रशासनस्य संस्कृतअकादम्या' तथा स्थानीय प्रशासनसहोगेन गुरुकुलकांगड़ी विश्वविद्यालये त्रिदिवसीय संस्कृतविद्वत् समारोहे भाषमाण: एतत् सर्वं प्रावोचत् । समारोहोऽयं ६; ७, ८, अक्तूवरे २००२ खृीष्टाब्दे तत्र सम्पन्न: ।

संस्कृतस्य प्रसार: सर्वप्रान्तेषु भवेत्

... श्रीमतीशीलादीक्षित

★★

उल्लिखितसमारोहस्य अध्यक्षता दिल्लीराज्यस्य मुख्यमन्त्री श्रीमती शीलादीक्षित अकरोत् । तया कथितं यत् दिल्लीसंस्कृत अकादमी प्रतिवर्षं १३० समारोहानायोजयति संस्कृतप्रसारकृते । अन्यप्रान्तेष्वपि संस्कृतप्रसारो भवेत इति कृत्वा अकादम्या अत्रापि समारोह: आयोजित: । दिल्लीसर्वेक्षणस्य योजना वर्तते यत् दिल्ल्यां संस्कृतस्य एक: विशालतम: पुस्तकालयो भवेत् ।

दिल्लीप्रशासनेन स्वीया: सर्वेऽपि कार्यालया: वेवसाइटेन साकं योजिता: । एतेषु दिल्लीसंस्कृत अकादमी अपि वर्तते । एतस्य लाभं सर्वेऽपि भवन्त: प्राप्तुमर्हन्ति ।

दिल्लीसंस्कृत अकादम्या: सचिव: श्री कृष्णसेमवाल: प्रावोचत् दिल्लीत: वहिरपि संस्कृतप्रसारविकासकृते जनजागरणं कृतं स्यात् एतदर्थं-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव दिल्लीसंस्कृत अकादम्याः दिल्लीतः वहिः अत्र हरिद्वारे सम्मेलनमिदं जनजागरणाय समायोजितम्। देशस्य सर्वेभ्यः प्रान्तेभ्योऽत्र ३५० संख्यकाः संस्कृतविद्वांसः सम्मिलिताः।

अत्र निम्नाङ्किताः विचारणीय विषयाः आसन्

१. संस्कृतसाहित्ये जीवनदर्शनम्, २. संस्कृतसाहित्ये अन्तरिक्षविज्ञानम्, ३. संस्कृतसाहित्ये प्राणिविज्ञानम्, ४. संस्कृतसाहित्ये भूगर्भविज्ञानम्, ५. भारतीयचिकित्सा विज्ञाने वनस्पतिमहत्ता।

संस्कृतअकादम्या उपाध्यक्षेण श्री कुलानन्द भारतीयेन दिल्लीप्रशासनस्य संस्कृतसम्बन्धिउपलब्धयो वर्णिताः स्वागतभाषणं च कृतम्।

उत्तराञ्चलस्य वनमन्त्रिणा श्री नवप्रभातेन, दिल्लीप्रशासनस्य पूर्वशिक्षामन्त्रिणा श्री योगानन्दशास्त्रिणा, दिल्लीसर्वकारस्य संसदीयसचिवेन श्रीरमाकान्तगोस्वामिना डा० देवेन्द्रस्वरूपशास्त्रिणा तथा च गुरुकुल कांगड़ीविश्वविद्यालयस्य कुलपतिना श्रीस्वतन्त्रकुमारेण सर्वेषां उपस्थितविदुषां प्रति आभारः प्रदर्शितः।

निवेदन

ग्राहकों से निवेदन है कि दिव्यज्योतिः का शुल्क चैकद्वारा न भेजें बैंक ड्राफ्ट या मनिआर्डर से ही भेजें। चैक स्वीकार न होंगे।

— व्यवस्थापकदिव्यज्योतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतसाहित्येऽप्यस्ति युगपरिवर्तनस्य क्षमता

– अभिराज डा० राजेन्द्र मिश्रः

अर्वाचीनसंस्कृतसाहित्यमधिकृत्य आगरानगरस्य सेण्टजॉन्समहाविद्यालये विगत अक्तूबरमासस्य अष्टनवतारिकयो। एका राष्ट्रीयसङ्गोष्ठी समायोजिता। सङ्गोष्ठयाः अस्याः उद्घाटनं कुर्वाणा अर्वाचीनसंस्कृतसहित्यस्य शलाकापुरुषा अभिराज डा० राजेन्द्रमिश्रः उद्घोषयत् यन्न केवलं प्राचीनसंस्कृतसाहित्ये अपितु अर्वाचीनसंस्कृत साहित्येऽपि प्रणेतारः स्तरीयान् ग्रन्थान् लिखन्ति। तेषु ग्रन्थेषु अपि युगपरिवर्तनस्य क्षमता अस्ति। अभिराज डा० राजेन्द्रमिश्रः यः सम्प्रति वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिरप्यस्ति अस्यां द्विदिवसीयराष्ट्रीयसङ्गोष्ठयां समस्त अर्वाचीनसंस्कृतसाहित्यकाराणाम् आह्वानं कृतवान् यत् ते स्वकीयअर्वाचीनसाहित्ये मानवमूल्यानि स्थापयन्तु।

अस्यां द्विदिवसीयराष्ट्रीयसङ्गोष्ठयां अर्वाचीनसंस्कृतसाहित्यस्य विविधविधान् अधिकृत्य प्रायशः पञ्चशत् शोधपत्राणि प्रस्तुतानि। तेषु पत्रवाचकेषु जयपुरतः देवर्षिकलानाथशास्त्री पद्मशास्त्री च इलाहाबादस्य डा० शिवकुमारमिश्रः बनमालीविश्वालश्च शान्तिनिकेतनस्य डा० कल्पिकामुखर्जी मुम्बईतः डा० सुवर्णशिटे, दिल्लीतः डा० रमाकान्तशुक्लः, जम्मूतः डा० सुषमागुप्ता बंगलोरतः डा० एस. रङ्गनाथः बडोदरातः डा. रवीन्द्रकुमार पाण्डा, मसूरीतः डा. प्रमोदभारतीयः, लॅसडाउनतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डा. जनार्दनप्रसादपण्डेय मणिः, अल्मोडातः डा. शालिमालवस्सुम, अलीगढ़तः डा. सलमामहफूज सोनीपतत। डा. प्रतिभाशुक्ला, भोपालत। डा. ज्योत्स्ना निगम, रायबरेलीतः डा. प्रशस्यामित्रा शास्त्री वाराणसीतः डा. राजेशकुमारी मिश्रः कानपुरतः डा. मनोरमा गुप्ता, वनस्थलीतः डा. मीराद्विवेदी, भरतपुरतः डा. लालाशङ्करोगयावालः पलवलतः डा. भागीरथि नन्दश्च प्रमुखाः आसन्।

सम्मेलनस्य संयोजिका डा. मञ्जुलता शर्मा या सेन्टजाँसमहाविद्यालये संस्कृतविभागस्य अध्यक्षाऽस्ति सूचितवती यद् अस्यां संगोष्ठ्यां प्रायः पञ्चत्रिंशत् शोधपत्राणि देशस्य विभिन्नेभ्यो भागेभ्यः समागताः विद्वासः प्रस्तुतवन्तः। पञ्चदशपत्राणि च आगरामण्डलस्य विविधेभ्यो नगरेभ्यो समागतानां विदुषामासन्।

उद्घाटनसत्रस्य कार्यक्रमे वाराणस्याः संस्कृतविश्वविद्यालयस्य कुलपतिः अभिराजराजेन्द्रमिश्रः मुख्यातिथिरासीत्। विशिष्टातिथिरूपेण अमरउजाला दैनिकपत्रस्य प्रधानसम्पादकः अशोकअग्रवालः आगरायाः चक्खनलालएजूकेशनट्रस्य न्यासी एस. पी. गर्गश्च आस्ताम्। प्रारभे सेन्टजाँसमहाविद्यालयस्य प्राचार्यः डा० एफ. एम. प्रसादः अतिथीनां स्वागतं कृतवान्। आगराडायोसिस्य विशप राइट रेवरेण्ड एस. आर-कटिगमहोदयेन आशीर्वचांसि प्रदत्तानि। आगराविश्वविद्यालयस्य कुलपतिः डा. गिरीशचन्द्रसक्सेना कार्यक्रमस्य अध्यक्षयं कृतवान्। कार्यक्रमस्य संचालनं संयोजिका डा. मञ्जुलता शर्मा कृतवती।

सन्ध्यायां शोभनमेकं कविसम्मेलनं समायोजितम् यत्र अभिराज डा. राजेन्द्रमिश्रा, सोमठाकुरः, डा. रमाकान्तशुक्लः, रामेन्द्रमोहनत्रिपाठी डा. प्रतिभा, डा. रवीन्द्रकुमार पण्डा, डा. वनमालीविश्वाला, डा. इन्दुप्रकाशमिश्रः, डा. प्रशस्यमित्रः शास्त्री प्रभृतयः कवयः स्वकीयान् काव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठान् कृतवन्तः। कविसम्मेलनस्य अध्यक्षयं विहितं देवर्षिकलानाथ शास्त्रिणा। सञ्चालनं कृतं डा. जनार्दनप्रसादपाण्डेय 'मणिः' महोदयेन।

अन्तिमदिवसे समापनसत्रे मुख्यातिथिरासीत् आगरायाः विधायकः जगनप्रसादगर्गमहोदयः। तत्र डा. लालाशङ्करगयावालेन, पठितं समस्त-संङ्गोष्ठ्याः विवरणञ्च तदनन्तरं डा. सुवर्णाशेटे (मुम्बईतः) डा. रवीन्द्रकुमारपण्डा (वडोदरातः) च मनोगतप्रतिक्रिया पठितवन्तौ। अध्यक्षीयम् उद्बोधनं प्रस्तुत देवर्षिकलानाथशास्त्रिणा। सञ्चालनं कृतं महाविद्यालयस्य संस्कृतविभागाध्यक्षया डा. मञ्जुलताशर्मामहोदयया।

सम्पादकीयम्

रामायणाधारितं नवीनं पञ्चमं संस्कृतचलचित्रम्

संस्कृतचित्रपटनिर्माता श्री जी. वी. अय्यरमहाभागः स्वजीवनस्य पश्चिमे वयसि अपि संस्कृतचलचित्रनिर्माणे संलग्नः। इदानीमसौ पञ्चममिदं चलचित्रं निर्माति। अस्य मुहूर्तः सम्पन्नः। पूर्वं खलु तेन आचार्यशंकर मध्व रामनुजाचार्याणामुपरि चलचित्राणि निर्मितानि। तत्पश्चात् गीतामाधारी कृत्य अपि चलचित्रमेकं निर्मितम्। संस्कृतस्यान्यकार्यवत् चलचित्रनिर्माणेऽपि अर्थसङ्कटस्त्वस्ति एव। यतोहि चलचित्र निर्माणाय लक्षः रूप्यकाण्यपि स्वल्पानि एव भवन्ति।

अस्माभिः दिव्यज्योतिषः संचालनाय पत्रपाठकाः शिष्याः प्रशिष्याश्च स्वल्पसहयोग करणाय निवेदिताः। प्रार्थितं यत् सहस्ररूप्यकैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०५९ पौषः ख्रीष्टाब्दः २००२ दिसम्बर

वर्षम् ४७ अंकः ३

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखां चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगणेशाय नमः

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूरपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-
माखण्डलादिसुरनायकवृन्दवन्द्यम् ।१।

प्रातर्नमामि चतुराननवन्द्यमान-
मिच्छानुकूलमखिलं च वरं ददानम्
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ।२।

प्रातर्भजाम्यभयदं खलुभक्तशोक-
दावानलं गणविभुं वरकुञ्जरास्यम्
अज्ञानकाननविनाशनहव्यवाह-
मुत्साहवर्धनमहं सुतमीश्वरस्य ।३।

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ।४।

।। इति श्रीगणेशप्रातःस्मरणम् ।।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रमी नैति पराभवम्

प्रयासो निष्फलं नैव
श्रमी नैति पराभवम्

पिपीलिकैकधा नूनं यदाऽऽरोहति पर्वतम् ।
पादास्तस्याः प्रकम्पन्ते पापत्यते तदा हि सा ।।
परमवपतनान्यस्याः वाराम्बारं भवन्ति न ।
साफल्यं न लभेद्यत्र योभूयात्तल्लयः सदा ।।

प्रयासो निष्फलं नैव
श्रमी नैति पराभवम्

रत्नलोभाय कैवर्तः सागरे मज्जति यदा ।
प्रवालो भ्रंशते हस्तान्मुक्ताऽपि प्रपलायते ।।
श्रमी धीरः स कैवर्तो मामज्यते पुनर्जले ।
ब्रूहि रे ! किं कृशस्तस्य रिक्तो भवति सर्वदा ? ।।

प्रयासो निष्फलं नैव
श्रमी नैति पराभवम्

विचार्यतां सदा वत्स ! यत्कर्तुं शक्यते त्वया ।
क्रीडकेवाग्रणी याया प्रतिस्पर्धासु जीवने ।।
कर्मश्रेष्ठं च तत्प्रेष्ठं पौरुषं तद्विना कथम् ।
लोके कर्म विधातव्यं जयङ्कारो न तद्विना ।।

प्रयासो निष्फलं नैव
श्रमी नैति पराभवम्

– श्वेता तिवारी
स्नातकोत्तरोत्तरार्ध वनस्थली
विद्यापीठ, टोंक

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामः× - श्रीयुतो जयशङ्करप्रसादः

(संस्कृतरूपान्तरकारः-डा० रूपनारायणपाण्डेयः, एच- II/३३०,
राज्यशिक्षासंस्थान कालोनी, एलनगञ्जः, प्रयागः, उ० प्र०, २११००२)

(१)

व्यनादीत् टण-टण-रणितं निःस्थाने घण्टिका।
भवति श्रावणमासे सन्ध्यापि कीदृशी मनोहरा ! मेघमालालङ्कृता गगनच्छाया सान्द्रसालारण्ये निपतति। तस्मिन्ना शनैः शनैः स्वाधिकारं पूर्वगगने प्रतिष्ठितं विदधती, सुशासनकारिणी महाराज्ञीव, विहङ्गप्रजागणं सुखनिकेतने शयनायाज्ञापयति। आकाशरूपे शासनपत्रे प्रकृतेर्हस्ताक्षरमिव विद्युल्लेखावलोक्यते.....ग्राम्यनिःस्थाने कुत्राप्येकद्वौ दीपालोकौ दृश्येते। पवनो हरितहरित निकुञ्जेभ्यो भ्रमन्, झिल्लिकाझणत्कारेण साकं परिपूर्णसरोवरेषु तरङ्गैः सार्धं क्रीडति। बिन्दवः शनैः शनैः पतन्ति, ये यूथिकाकलिका आर्द्राः कृत्वा पवनमपि शीतलं कुर्वन्ति।

किञ्चित्कालानन्तरं वृष्टिरुपशशाम। प्राच्यां चन्द्रदेवोऽन्धकाराञ्जनाग्रभागगता लोकसन्निभश्चतुर्दश्यरुणत्वोपेतो हरिततरुवराणां व्यव-

---

× (विश्रुतकथाकारस्य श्रीजयशङ्करप्रसादस्य हिन्दीकथानिकायाः संस्कृतरूपान्तरम् 'ग्राम' इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घानात् स्वकिरणप्रभां प्रदर्शयामास । पट्टिकाशकटशब्दः पवनस्य सणसण-त्कारेण साकं श्रुतो बभूव । संकेतकः स्वकार्यं चकाश । घण्टानादः तस्मिन् हरित भरितक्षेत्रे जुगुञ्ज । यात्रिणः स्वपोट्टलिकां बध्नन्तो निःस्थानं प्रपेदिरे । महादैत्यातिरक्तनेत्रसदृशोऽअञ्जनगिरितुल्ययन्त्राग्रस्थितो रक्तालोकोऽदृश्यत । प्रमत्त इव प्रलपन् स्वामिनिवेशे स्थिरः पट्टिकाशकटो निःस्थानं प्रपेदे । झटिति यात्रिणोऽरोढुमधिरोढुं च प्रारेभिरे । एकां नारीं दृष्ट्वा रुदितो द्वाराद् बहिः स्थिते नार्यौ, ये तस्याः सख्यौ परिलक्ष्येते, सा च स्त्री मनुष्येणैकेन साकं पट्टिकाशकटे सत्त्वमुद्यतास्ति । तयोः क्रन्दनध्वनेर्दैन्यभावेन ते पश्यन्तीं (सा) स्त्री, अनवगता, द्वितीयश्रेण्याः कक्षमधिरुरोह, किन्तु तत्रासीनः श्रीमान्—'द्वितीयेयं श्रेणिः, अत्र मारुह ।' इति वदन् अवतरन्, स्वकक्षांच चालयन् निःस्थानाद् बहिर्गन्तुमुदयुङ्क्ते ।

वैदेशिकसञ्चयनस्योरुवसनम्, पादत्राणद्वयम्, आखेटप्रावारकं किञ्चिद् हरितमुष्णीषं च धृतवतः श्रीमतोऽङ्गेषु परिलक्ष्यते महासम्मेलनमाङ्गलभारतीयसंस्कृत्योः गौरवर्ण उन्नतललाटं च तस्याभां वर्धयतः । सम्मुखे सति निःस्थानपालस्याभिवादनानन्तरं श्रीमता साकं वार्ता बभूव ।

निःस्थानपालः—भवान् साम्प्रतं कुतो याति ?

मोहनः—काशकरैः क्षेत्रेऽतीव विप्लवो विहितः । अतएवाहं स्वक्षेत्रं कुसुमपुरं निरीक्षणार्थं यामि ।

नि०—पुनः कदा प्रत्यागमिष्यसि ?

मो०—दिवसद्वये । भवतु, नमस्ते ।

लोहमार्गस्य निर्बाधत्वं सूचितवान् निःस्थानपालो नमन् स्वकार्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लयं प्रविवेश । श्रीमान् मोहनलालः पूर्वमेव निःस्थानस्थितमाङ्गलदेशीय. पर्याणालङ्कृतम् अश्वमारुह्य जगाम ।

(२)

ऋजुप्रकृतीनां ग्रामवासिनीनां कुलकामिनीनां सुमधुरं सङ्गीतं शनैः शनैः आम्रवनाद् निष्क्रम्य सर्वतो गुञ्जति । निरालोके गगने खद्योताः ताराश्च प्रदीप्य-प्रदीप्य चित्तं चञ्चलं कुर्वन्ति । ग्रामवासिनः स्वहल स्कन्धे निहितवन्तो 'बिरहा' लोकगीत गायन्तो बलीवर्दयुगलेन साकं गृहं प्रत्यागच्छन्ति ।

एकस्य विशालतरुवरस्य शाखायां प्रेङ्खा विलसति, तस्यां चतस्रो महिला आसीमा बभूवुः, ताश्च (महिलानां) पञ्चाशतो गायनाः परिवृत्य परिभ्रमन्ति । प्रेङ्खाया प्रेङ्खणेन साकं 'साम्प्रतिके श्रावणे सज्जनो वसतु गृहे' इति मधुरो ध्वनिः पञ्चशब्दभ्यः कोकिलकण्ठेभ्यो निर्गतः पशुगणान् अपि मोहयति । बालिका स्वैरं क्रीडन्ति । अकस्मादश्वपदशब्देन ताः सरलाः कामिन्यो विस्मापिताः । ताः सर्वाः पश्यन्ति यदस्माकं परिचितपूर्वः श्रीमान् मोहनलालोऽश्वं निरुध्य तस्मादवतरति । ताः सर्वाः तस्य वेषं विलोक्य बभ्रमुः, परस्परञ्च किञ्चित् संकेत्य तूष्णीं बभूवुः ।

श्रीमान् मोहनलालो नीरवतां बभञ्ज, जगाद च—'भद्रे ! इतः कुसुमपुरं कियद्दूरेवर्तते ? केन च मार्गेण गन्तव्यं भविष्यति ? एका प्रौढा चिन्तयामास-'भद्रे' इति कोऽपि परिहासशब्दो नैवास्ति, परं सा किमपि वक्तुं न शशाक, केवलम् एकस्यां दिशि निर्दिश्योवाद—'इतः सार्धक्रोशे तु वर्तते, अयं मार्गो यास्यति ।'

श्रीमान् मोहनलालस्तेन पथिकमार्गेण जगाम । स गच्छन्-गच्छन् भ्रान्तो बभूव । , स्वशिविरमार्गं च परिहाय मार्गान्तरेण ययौ । मेघाः परिगताः, देवो जवेन ववर्ष, तमश्च सान्द्रतरं बभूव । भ्रमता भ्रमता तेन क्षेत्रमेकमुपगतम्, तत्र तस्मिन् हरितभरितक्षेत्रे पलालाच्छादितमुन्नतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशालञ्चकं मञ्चकभासीत्, तत्समीपे एव लघ्वीव क्षेत्रपल्ली बभूव।

तस्मिन् मञ्चके समुपविष्टा बालका बालिकाश्च कोलाहलं चक्रुः। मोहनलालो जलेन क्लिद्यन्नपि क्षेत्रसमीपस्थस्तेषामानन्दकलरवं शुश्राव।

भ्रान्तस्वान्तस्य बहुकालो व्यतीतः। रात्रिरधिकं विगता। कुत्र तिष्ठानि? इत्यस्मिन् विचारे स तस्थौ, वृष्टिर्मन्दा बभूव। अत्रान्तरे एका बालिका स्वमलिनवसनाञ्चलव्यवधाने दीपं दधाना तद्मञ्चकमनुगच्छन्ती दृष्टा।

(३)

बालिका पञ्चदशवर्षीया बभूव। आलोकात तदङ्गं ध्वान्तघने विद्युल्लेखेव विबभौ। यद्यपि दरिद्रतया सा मलिना व्याधयि, परमीश्वरीया सुषमा तस्याः मृदुलाङ्गे स्वावासं कृतवती बभूव। मोहनलालोऽश्वमग्रे विधाय तां किमपि प्रष्टुं चक्रमे, परन्तु सङ्कुचितो भूत्वा तस्थौ। परन्तु पृच्छाया ऋते नेव बभूवोपायान्तरम्। अस्तु, रूक्षतया पप्रच्छ—'कुसुमपुरस्य मार्गः कस्यां दिशि वर्तते।"

बालिका भव्यमूर्तिमिममवलोक्य बिभाय, किन्तु साहसेनोवाद—'अहं न जानामि।' एवं विधेन सरलेन नेत्रसञ्चालनेनेङ्गितं कृत्वा कथितवत्यां तस्याम् एतान् शब्दान् युवके क्रोधस्य स्थाने हासो बभूव, कथितञ्च तेन—'तर्हि यो जानाति, मह्यं कथयं अहं तं प्रक्ष्यामि।'

बालिका—अस्माक माता जानीयात्।

मोहनः—इदानीं त्वं कुत्र यासि?

बालिका—(मञ्चकमनु दर्शयित्वा) तत्र ये केऽपि बालकाः सन्ति, तेष्वेको मम भ्रातास्ति, तमेव भोजयितुं यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहनः—एतावत्यां निशायां बालका किमुपविशति ?

बालिका—स रात्रिपर्यन्तमन्यैर्बालकैस्साकं क्षेत्र एव निवसति ।

मोहनः—तव माता कुत्रास्ति ?

बालिका—आगम्यताम्, अहं दर्शयामि ।

इत्यभिधाय बालिका स्वभ्रातुः समीपं जगाम, तं च भोजयित्वा, तन्निकटोपविष्टेभ्यश्चापि बालकेभ्यः किमपि प्रदाय तमेव क्षुद्रकुटीरमभिजगाम । मोहनलालस्तां सरलां बालिकामनुययौ ।

तं क्षुद्रकुटीरमुपगतेन मोहनलालेनैका स्त्री दृष्टा, यस्या अङ्गप्रभा सुवर्णसन्निभा बभूव, तेजोमयं मुखमण्डलमीषदुन्नताधरोऽभिमानोपेतो बभूव, वयश्च, पञ्चाशदधिकम् । मोहनलालस्यान्तरावस्था, या ग्रामदर्शनात् किञ्चित् परिवर्तिता, तां सरलां गम्भीरां तेजोमयीं मूर्तिं विलोक्य भूयश्च सरला विनयोपेता च बभूव । सोऽवनम्य प्रणनाम । स्त्रियाशीर्वितीर्णा, पृष्टश्च—'वत्स ! कुत आयासि ?'

मोहनलालः—'अहं कुसुमपुरं गतवान् बभूव, किन्तु मार्गं विसस्मार—।

'कुसुमपुरस्य' नाम शृण्वन्त्याः स्त्रिया मुखमण्डलमारक्तं बभूव, तस्या नेत्राभ्यामश्रुबिन्दुद्वयं निर्गतम् । तान्यश्रूणि नैव बभूवुः करुणायाः, अपितु स्वाभिमानस्य ।

विस्मयान्वितः सन् मोहनलालो ददर्श । स पप्रच्छ—'अत्र भवती कुसुमपुरमिति नाम्ना कथं क्षुब्धा ?'

स्त्री—'वत्स ! तस्य महती कथास्ति । त्वं श्रुत्वा किं करिष्यसि ?'

मोहनलालः—'नैव, अहं श्रोतुमिच्छामि, भवती श्रावयतु चेत् ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्री—'भवतु, किञ्चिदुपाहारं स्वीकुरु, तत, श्रावयिष्यामि।'

पुनः सुतां प्रति दृष्ट्वा स्त्री जगाद—'उपाहारार्थं किमप्यानय।' आज्ञापितैव बालिका तस्य क्षुद्रगृहस्यैकस्माद् मृत्तिकापात्रात् किमपि वस्तु समादधे। तदेकस्मिन् पात्रे विलाट्यानिनाय, मोहनलालस्य च पुरो निदधौ। मोहनलालस्तत् पानकं पीत्वा, पलालकटे चोपविश्य स्त्रीकथां शुश्राव।

(४)

स्त्री जगाद—''अस्माकं पतिरस्य प्रान्तस्य गण्यो भूस्वामी बभूव, वंशश्चाप्यस्माकं नितरामुच्चतरः। इदानीं यस्य ग्रामस्य नाम गृहीतं भवता, तस्मिन्नेवास्माकं पत्युः प्रधानं भूस्वामित्वमासीत्। कार्यवशात् कुन्दनलाल नामकाद् एकस्माद् महाजनात् किमप्यृणं जग्राह। किञ्चिदपि चिन्ताया अकरणात् तस्य धनं बहुतरं जातम्, एवञ्च सञ्जातेऽस्माकं पतिरनेकान् उपायान् विधाय धनं च संगृह्य तदन्तिकं निनाय, तदा तेन धूर्तेन निगदितम्-'श्रीमन्, का हानिः। भवान् अष्टसु दिवसेषु आगच्छु, वयं रूप्यकाणि ग्रहीष्यामः, या च क्षतिः भविष्यति, तां त्यक्ष्यामः, भवतो भूभागः प्रतिदास्यते, इदानीञ्च नोपलभ्यते 'ऋणपत्रम्' अपि।' तं विश्वस्यास्माकं पतिरवतस्थे, सोऽपि च न किमपि पप्रच्छ। तस्योदार्यात्तत् सञ्चितं धनमपि स्वल्पं जातम्, तत्र च तेनाभियोगं कृत्वा स्वेष्टो भूभागः स्वल्परूप्यकैः वाचमुच्चार्य (नीलामविधिना) क्रापितः। ततोऽस्माक पत्युर्हृदये एवं तत्क्षेत्रस्य क्षत्या, नितरां प्रहारो जातः, तस्मादेव तस्य निधनं बभूव। एवं घटिते वयमस्मिन् अन्यस्मिन् ग्रामे आगत्य निवासं चक्रिम। अत्रत्यो भूस्वामी नितरां धार्मिकोऽस्ति, कस्मिन्नपि समये करे भूमिरियं प्रदत्ता, इदानीमनयैव मम जीविकास्ति।....''

एतावद् वदन्त्याः स्त्रियाः कण्ठोऽभिमानादवरुद्धः, सा चान्यत् किमपि वक्तुं न शशाक।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीकथां श्रुत्वा मोहनलालोऽतीव दुःखितो बभूव। निशाया विशेषो व्यगच्छत्, अतो निशाया यापनं विधाय प्रभाते मलिनं पश्चिमगामिनं च चन्द्रमनुगम्योक्तपथा स जगाम।

किन्तु तस्य वदनं विषण्णं लज्जितं च बभूव, हि स्त्रिया भूस्वामिस्वस्यापहर्ता, तस्याः प्राणप्रियस्य पत्युनिधनहेतुरेवञ्च दुःखस्य प्रदाता कुन्दनलालो मोहनलालस्येव पितासीत्।

❀❀

निवेदन

ग्राहकों से निवेदन है कि दिव्यज्योतिः का शुल्क चैकद्वारा न भेजें बैंक ड्राफ्ट या मनिआर्डर से ही भेजें। चैक स्वीकार न होंगे।

— व्यवस्थापकदिव्यज्योतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथाद्वयी-

पत्रकम् (टिकटम्)

– डा० जीतसिंह: खोखर

❋

भ्रष्टाचारे संलग्नः एकः सापराधः नेता यदा निर्वाचनार्थं पत्रकं (टिकटं) प्राप्तुं पत्रक-विभाजकस्य अध्यक्षस्य कार्यालयं प्रति गतः तदा कार्यालयस्य सूचनापटे 'सापराधं नेतारं निर्वाचनपत्रकं (टिकटं) न मिलिष्यति' इति पठित्वा निराशो भूत्वा च कार्यालयस्य अभ्यन्तरे प्रवेशमकरोत् ।।

यदा स बहिर् आगच्छत् तदा अतीव प्रसन्न आसीत् । तत्रैव एकः नेता तमपृच्छत्–'अधुना तु सापराधकारणात् निर्वाचनार्थं प्रवेशपत्रं न प्राप्स्यति भवान् ।' 'नहि भ्रातः ! मया तु पत्रकं (टिकटं) प्राप्तम्', सोऽवदत् ।

कथम् ?

'कथम्' इति न जानामि परञ्च सत्यं वदामि, मया तु पत्रकं प्राप्तम् ।'

किं सत्यम् ?

नेता प्रत्यवदत्—'हे भ्रातः ! सम्प्रति मया न अपितु मे पुत्रेण पत्रकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तम् यतः सोऽपराधी नास्ति ।"

तदैव तेन नेत्रा उक्तम्---

न जाने कदा दुरी
भविष्यति चुनाव त भ्रष्टाचारम्: ।।
नायका मे देशस्य,
मृगयन्ति नवयुक्तिं हि सदा ।।

—[००]—

देवालये विवाहः

सुन्दरलालः स्व सुकन्याया अनीतायाः विवाहं स्वमित्रस्य सोहनलालस्य सुपुत्रेण महेशेन सह कर्तुं निश्चयमकरोत् । तेन वाग्दानमपि कृतम् पश्चच्च सोहनलालः विवाहार्थं विलम्बमेव करोति स्म । स आम् आम् इति कथयित्वा केवलं सत्यापयति स्म । सुन्दरलालोऽचिन्तयत्—'सोहनलालस्तु यौतुकस्य कूपे अपतत्" । एकदा सोऽपृच्छत्–" रे मित्र ! त्वं मम बाल्यकालस्य सहचरोऽसि । त्वं जानासि यत् जदीया आर्थिकावस्था न उत्तमा, अहञ्च यौतुकं दातु न शक्नोमि, त्वमेव वद, अहं किं कुर्याम् ? किं त्वमपि यौतुकाय स्पृहयसि ? किं त्वमपि लोलुपोऽभवः ? " सोहनलालोऽहसत् अवदत् च–नहि मित्र ! न एषा वार्ता । मदीया आर्थिकदशा अपि त्वं जानासि यत् अर्जामि तत् खादामि परं तव हृदये यौतुकस्य वार्ता कथं प्रविष्टा । ' सुन्दरलालः प्रत्यवदत्-मित्र ! त्वं विवाहार्थं दिवसस्य निर्णयं न कारयसि केवलं आम्, आम्, न, मा, मा, ओम् इति कथयित्वा सत्यापयामि । अत एव मम हृदये शंका उत्पन्ना जाता यौतुकस्य वार्ता चापि समागता । 'नहि मित्र ! नैषा वार्ता अस्ति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न यौतुकस्य ग्रहणा.....?' 'पुनः का वार्ता मित्र !' सुन्दरोऽवदत्। 'वार्ता तु एषा वर्तते यत् साम्प्रतं मम समीपे अपि विवाहार्थं धनं नास्ति। अतोऽहं आम् आम् न, न, इति सत्यापयामि। अधुना तु इच्छा वर्तते, यत् तव मम च आर्थिकदशां दृष्ट्वा देवालये एव विवाहो भवेत्, अपव्ययमपि न भविष्यति।' सोहनलालः प्रत्यवदत्। सुन्दरलालस्तु तस्य वार्तां श्रुत्वा प्रसन्नोऽभवत् तथा च आगामिदिवसे एव सुनीताया महेशेन सह देवालये यौतुकं विना अपव्ययं च विना विवाहो जातः।

सत्यम्:...

घातकं करोति विवाहं नरः,
यौतुकेन मुक्तहस्तव्ययेन च।
यौतुक-व्यय-नाशाय,
कुरु देवालये विवाहम्॥

– राजकीय संस्कृत महाविद्यालयः, नाभा-१४७२०१
(पटियाला, पंजाब)

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य स्वतः प्रामाण्यम्

— डा० धीरेन्द्र झा
दरभङ्गा

☆☆

वेदानां स्वतः प्रामाण्य विषये पूर्वपक्षिभिः शास्त्रज्ञैः महती आशङ्का क्रियते। तत्सर्वं केवलं विनोदाय एव इति मन्मतम्। वेदानां लक्षण प्रमाण शाहित्यात् कथमपि सत्ता न प्रतीयते यतः "लक्षण प्रमाणाभ्यां वस्तुसिद्धि इति" नैयायिकाः ब्रुवते। प्रत्यक्षानुमानागमेषु प्रमाण विशेषेषु अन्तिमो वेद इति न घटते मन्वादिस्मृतिषु अतिव्याप्तेः। समयबलेन सम्यक् परीक्षानुभवः साधनं। इत्येतस्य आगम लक्षणस्य तास्वपि ससद्भावात्।

अपौरुषेयत्वे सति इति विशेषणदानेन न निर्दोषता भवति। वेदस्यापि परमेश्वर निर्मितत्वेन पौरुषेयत्वात्। शरीरधारी जीवनिर्मितत्वाभावात् अपौरुषेयत्वमिति न प्रमाण पुष्टं यतः वेदेनैव परमेश्वरः पुरुषत्वेन स्तुतत्वात् "सहस्रशीर्षा पुरुषः" इत्यादिमन्त्रेषु पुरुषस्मरणात्।

कर्मफलरूप शरीरधारि जीवनिर्मितत्वाभावाद् अपौरुषेयत्वं विवक्षितं इति चेत् न। जीव विशेषैः अग्नि वायुरादित्यैः वेदानाम् उत्पादितत्वात्—"ऋग्वेदाग्नेरजायत यजुर्वेदो वायोः सामवेदः आदित्यात्" इति ऐतरेयश्रुतेः ईश्वरस्य अग्न्यादि प्रेरकत्वेन निर्मातृत्वेन सिद्धम्।

'मन्त्रब्राह्मणात्मकः शब्द राशिर्वेद' इति चेत् न। ईदृशो मन्त्र ईदृशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणं इत्यनयोः अद्यापि अननुभूतत्वात्। तस्मान्नास्ति किञ्चिद् वेदस्य लक्षणं नापि तत् सद्भावे प्रमाणं पश्यामः—

'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामाथर्वाणं चतुर्थम्' इत्यादिछान्दोग्य वाक्यं प्रमाणमिति चेत् न। तस्यापि वाक्यस्य वेदान्तः पातित्वेन अप्रमाण्यप्रसंगात्। न खलु निपुणोऽपि स्वस्कन्धमारोढुं प्रभवति। 'वेद एव द्विजातीनां निःश्रेयस्करः परः' इत्यादि स्मृतिवाक्यम् प्रमाणं इति चेत् न। तस्यापि उक्तश्रुतिमूलत्वेन निराकृतत्वात्।

प्रत्यक्षादिकं तु शंकितुम् अपि न युक्तम्। वेदविषयात्तु लोकप्रसिद्धिः सार्वजनीनापि नीलनभः इत्यादिवद्भ्रान्ता। तस्मात् लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नैवास्ति।

उपर्युक्त विचाराः पूर्वपक्षाश्रयीनां कुतर्कपूर्णाः प्रतीयन्ते यतः मन्त्रब्राह्मणात्मकत्वं वेदस्य निर्दिष्टं लक्षणं सर्वैरपि मानवैः स्वीक्रियते अतएव 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यापस्तम्बेन यज्ञपरिभाषायां स्पष्टं सतर्कं समवीतम्। 'अपौरुषेयत्व वाक्यत्वं' इति इदमपि मीमांसाशास्त्रे जैमिनिना सुदृढं प्रतिपादितम्—'ईश्वर निःश्वसितत्वम्' वेदस्य अपौरुषेयत्वे प्रमाणान्यपि यथोक्तश्रुतिस्मृति लोकप्रसिद्धिरूपाणि वेदसत्तादृढ़करणि वर्तन्ते। यथा—'घटपटादिद्रव्याणां स्वप्रकाशकत्वाभावेऽपि सूर्य चन्द्रादीनां स्वप्रकाशकत्वं अविरुद्धं तथा मनुष्यादीनां स्वस्कन्धारोहणं संभवेऽपि अकुण्ठित शक्तिर्वेदस्य इतरवस्तु प्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्तु। अतएव संप्रदायविशेषज्ञाः अकुण्ठितां शक्तिं वेदस्य वर्णयन्ति..."चोदना हि भूतं भवन्तं भविष्यं सूक्ष्मं व्यावहारिकं विप्रकृष्ट्यमित्येवं जातीयकमर्थं शक्नोति अवगमयितुं इति शाबरभाष्ये शबरस्वामिना प्रतिपादितम्।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा सति वेदमूलाया। स्मृतेः तदुभयमूलाया। लोकप्रसिद्धेश्च प्रामाण्यम् सर्वैरपि अङ्गीकर्त्तव्यम् तस्मात् 'लक्षणप्रमाणसिद्धो वेदो न केनापि चार्वाकादिना अपोढुं शक्यते' अतः मैथिल मूर्धन्येन विदुषा मीमांसकवरेण श्रीमता मण्डन मिश्रेण स्पष्टं वेद विषये निर्भ्रान्तं प्रतिपादितम्-

'स्वतः प्रमाणं परतः प्रमाणं
कीराङ्गना यत्र गिरो गिरन्ति ।
शिष्योपशिष्यैरुद्गीयमानम्
अवेहि तन्मण्डनमिश्र धाम ।। '

- प्रधानाचार्य।
डा० कार्त्तिक स० वि० मंदिरम्
मुंगरौड़ा जमालपुर
जिला-मुंगेर (बिहार)

★★

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं। -व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



Gurukul Kangri Vishwavidyalaya
HARDWAR

संस्कृत-सप्ताह-समारोहः सम्पन्नः

खीरी लखीमपुरम्, २४-११-०२। गतवर्षेष्विव अस्मिन् वर्षेऽपि १३-११-०२ दिनाङ्कतः १९-११-०२ पर्यन्तम् आचार्य बाबूराम अवस्थिनो वाजपेयी कालोनी स्थिते निवासस्थाने तस्यैव सयोजकत्वे संस्कृत सप्ताह-समारोहः सम्पन्नः।,

तत्र प्रथमदिने वेदगीता रामायणादि ग्रन्थपाठः' इति कार्यक्रमे श्री राजकुमार त्रिवेदी अधिवक्ता अध्यक्षतां तथा कु० ममता यादव महोदया उद्घाटनमकार्षीत्। कु० दिव्या 'शिवसंकल्प सूक्तम्' कु० रीना रञ्जना ब्रह्मो अञ्जली छात्राः सूर्यसूक्तम्' अपाठिषुः। कु० नमिता मीतू वर्षाः श्रीमद्भगवद्गीतायाः श्लोकानाँ, श्री रामनारायणमिश्रः दुर्गा सप्तशतीश्लोकानाम्, अध्यक्षश्च श्रीरामचरित मानसस्य सुन्दरकाण्डस्य वन्दनाश्लोकानां सस्वरं पाठमकार्षुः। श्रीराजेश सिंहः देशप्रेमगीतं गीतवान्। श्रीचन्द्रभाल वाजपेयी गीतामधिकृत्य संक्षिप्तमभाषत। आचार्यः बाबूराम अवस्थी तु प्राचीनगौरवग्रन्थानां महत्व तदध्ययनस्य चावश्यकत्व विज्ञापितवान्।

द्वितीयदिवसे श्री ब्रह्मदत्तमिश्र महोदयस्य अध्यक्षतायां बालसंस्कृ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तम्' इति कार्यक्रमः समपद्यत । अत्र चत्वारिंशद् बालक बालिकाः वेद-मन्त्र गीत लोकगीत श्लोकांश्च सोत्साहं श्रावितवन्तः । अध्यक्षमहोदयोऽवादीत् यत् अभिभावकैः स्वबालकबालिकाः संस्कृतपठनाय प्रेरणीयाः । आचार्यैः अवस्थी शुद्धोच्चारणाय कवितांकण्ठस्थीकरणाय च निर्दिष्टवान् ।

तृतीयेऽहनि जिलानियोजन सहायकाधिकारिणः श्री चन्द्रचूड़ दुबे महोदयस्य अध्यक्षतायां छात्राणां संस्कृतश्रुतलेख सामान्यज्ञानप्रतियोगिता कार्यक्रमः सम्पन्नः । श्री विश्रुत कुमारः वन्दनाम कथोत् । प्रतियोगितायां षष्ठ कक्षातो द्वादश कक्षां यावत् छात्राः भागमग्रहीषुः तत्र श्रुतलेखे कु० मुदिता कु० रेखा चेति छात्राद्वयं प्रथमं स्थानं प्राप्नुवत् । सामान्यज्ञाने च कु. इति सिंहच्छात्रा प्रथम स्थानं प्राप्नोत् । अद्य कालिदास जयन्तो मुपलक्ष्य कु० रञ्जना कु० अञ्जली कु० अन्नो चेतिच्छात्राः कालिदास प्रशस्तिगीतं सस्वरं गीतवत्यः । डा० सन्तोष कुमार मिश्रः श्री राज कुमार त्रिवेदी च भाषणं कृतवन्तौ । अध्यक्षीयानन्तरं सभा विसर्जिता ।

चतुर्थदिने डा० गीता शुक्ला महोदयायाः अध्यक्षतायाम् 'अर्वाचीनसंस्कृतसाहित्यपरिचयः' इति कार्यक्रमः सम्पन्नतामगात् । आचार्य बाबूराम अवस्थिना कथितं यत् संस्कृतस्य प्राचीनकवीनां वाल्मीकिव्यास कालिदासप्रभृतीनां नामानि काव्यानि च प्रायः सर्वे एव जानन्ति किन्तु स्वतन्त्रताप्राप्तेरनन्तरं यैः साहित्यकारैः महत् साहित्यं रचितं तेषां नामानि काव्यानि चाल्प संख्याका एवजनाः जानन्ति । अतोऽर्वाचीनसाहित्यकाराणां परिचयो दीयते ।

तत्र आचार्य डा० बच्चूलाल अवस्थी (उज्जैन) डा. राजेन्द्र मिश्रः (शिमला) डा. कृष्णलालः, डा० रमाकान्त शुक्लः (दिल्ली) डा० राम किशोर मिश्रः (मेरठ) डा० हरिदत्त शर्मा (प्रयाग) डा० अभिषवन्द्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्री (मथुरा) डा० प्रशस्य मित्र शास्त्री (राय बरेल) डा० नलिनी शुक्ला, डा० नवलता (कानपुर) श्री वासुदेवद्विवेदी शास्त्री (काशी) डा० मिथिलेश कुमारी मिश्रा (पटना) आचार्य गिरिजा शङ्कर मिश्रः (सीतापुर) डा० अनन्तशर्मा मश्रः (गोला) इत्या दीनां कवीनां तत्कृतीनां च संक्षिप्तः परिचयः पुरस्कृतः ।

डा० पुष्पा मलिक महोदया आचार्य बाबूराम अवस्थिनः कृतीनां नामग्राहं वर्णनं ददाना 'युगदर्शनम्' इति काव्यस्य साहित्यिकसमीक्षां प्रास्तौषीत् । अध्यक्षमहोदया च 'लोकगीताञ्जलिम्' अधिकृत्य तद्वैशिष्ट्यं प्रत्यपादयत् ।

पञ्चमदिवसे डा० सन्तोष कुमार मिश्र महोदयस्याध्यक्षये संस्कृतलोकगीतगायन कार्यक्रमः' सम्पन्नः। चि० शाश्वतकुमार-शोभित कुमारौ चतुर्वर्षीयौ शिशू मेरी मञ्जरी वादन पुरः सरं—

'गणेशो विघ्नं हरति भगवान्'

इतिलोकगीतं प्रगीय कार्यक्रमारम्भमकुरुताम् । महिलानां प्रथमवर्गे श्रीमती प्रभा वर्मा श्रीमती ऊर्मिला अवस्थी श्रीमती कुसुमलता शुक्ला—

विपिने वसति विन्ध्ये सुन्दरी जगदम्बा देवी' इत्यादिगीतम्, द्वितीयवर्गे च श्रीमती कलेशी वाणी श्रीमती मीनाक्षी श्रीमती कल्पनाश्च महिलाः—

'माता ममतामयी मे विभाति भुवने'

इतिगीतं गीतवत्यः। छात्रावर्गेषु च कु० रञ्जना कु० मञ्जली कु० पन्नोसिंहश्छात्राः

'वाचं शृणुत मम पुत्रा अहं जगदम्बा भणामि'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति जगदम्बावरदानगीतं, कु० सुनीता यादव कु० दिव्याङ्गोनिगम इति छात्राद्वयो—

'वासन्ती नवागत वेला लसति बहु वृन्दा वनम्'

इति गीतं पृथक्-पृथक् लयं परिवर्त्यं गीतवती कु. दिव्या छात्रा तालघ्न (लवला) वादन पूर्वकं कु मुदितया सह 'वर्धतां संस्कृतां प्रत्यहं वर्धताम्' इति गीतगायन मकरोत्। श्री राजेन्द्रप्रसादतिवारी 'कण्टकः' जयदेव-कविकृतं दशावतारगीतं गीतवान्। सर्वाणि लोकगीतानि आचार्यं बाबूराम अवस्थिना रचितानि प्रयुक्तानि।

अध्यक्षमहोदयः प्राबोचत् यत् लोकगीतानां माध्यमेन संस्कृतं गृहे प्रापयितुं शक्यमिति।

षष्ठेऽहनि डा० विमला शर्मा महोदयानामध्यक्षतायां 'विद्वत्स-मागमः' कार्यक्रमः समपद्यत। मङ्गलाचरणानन्तरम् आचार्यं बाबूराम अवस्थी प्रोक्तवान् यत् साहित्यकारेण विरचित सत्साहित्यं सम्पूर्णसमाजस्य भवति। तेन स्वरचितानि युगदर्शनम्, गीतगङ्गा, लोकगीताञ्जलिः कथाद्वादशी, नाट्यनीराजनम्, लेखलतिका इत्यादीनि पुस्तकानि उपस्थित विदुषां सम्माने तत्करकमलेषु सादरमुपायनी कृतानि। मुख्यागतः डा. दयानन्द शुक्लः अवादीत् यत् प्राचीनं नवीनं वा संस्कृतसाहित्य मद्यापि जीवनोपयोगि वर्तते। ततश्च श्री ब्रह्मदत्त मिश्रः, श्री श्याम मनोहर वाजपेयी, श्री सन्तराम अवस्थी शास्त्री प्रभृतयो विद्वांसः स्व-विचारान् प्रकटितवन्तः। अवसरेऽस्मिन् डा० केवलकृष्ण मलिकमहोदयः पाद्य प्रावारक पुष्प फलादिभिः आचार्यं मवस्थिनं सम्मानितवान् तस्य संस्कृत सेवां च प्रशंसितवान्।

संस्कृतविद्वत्सु पूर्वोक्तानतिरिच्य डा० पुष्पा मलिक, डा० गीता शुक्ला, डा० निरुपमा दीक्षित, श्रीमती सुरचनात्रिवेदी, श्रीउमाकान्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिपाठी, श्री सत्यप्रकाशः शिक्षकः' श्रीराजकिशोर पाण्डेयः 'प्रहरी' डा० चन्द्रभाल वाजपेयी, श्री दामोदर प्रसादमिश्रः इत्यादीनां नामानि उल्लेखनीयानि सन्ति।

सप्ताहस्य सप्तमेऽथ च चरमे दिने श्री यज्ञ दत्त मिश्र महोदयस्याध्यक्षतायां पुरस्कारवितरण कार्यक्रमः सोल्लासं सम्पन्नः। डाकविभागस्य सहायकाधीक्षकः श्री अवधेश कुमार दीक्षितः मुख्याभ्यागतस्थानमग्रहीत्।

देववन्दनानन्तरं श्री मती मनोरमातिवरी सखीभिः सह समवेत स्वरेण कार्तिक मासे श्रीतुलसी मातृमहिमव्यञ्जकम्—

'श्रीतुलसी माता विष्णुप्रिया भुवि भाति'

इति लोकगीतं सवाद्यं सस्वरं च गीतवती। अस्मिन् अवसरे कु० रञ्जना पाण्डेय (युवराजवीर सिंहः) कु० अञ्जली वैश्य (राजवधू सुन्दरी बाई) कु० सरिता वर्मा (सखीमनीषा) कु० अन्नोसिंह (द्वारपालजयसिंहः) कु० मुदिता (सूत्रधारः) विश्रुत कुमारः (विदूषकः) इति छात्रच्छात्राः आचार्य अवस्थिना लिखितं वीराङ्गना सुन्दरी' इति एकाङ्करूपमभिनीतवत्यः। कु० दिव्याङ्गी छात्रा 'लसति शिशु कन्या कोमला रे' इति लोकगीत लयमनुसृत्य सुन्दरं नृत्यं प्रस्तूय दर्शकानां मनोऽरञ्जयत्। सप्ताहकार्यक्रमेषु ये भागं गृहीतवन्तः ते सर्वे कलाकाराः पात्रपुस्तकलेखन्यादिभिः पुरस्कृताः। अध्यक्षीयानन्तरम् आचार्यः अवस्थी सवीन् प्रति कृतज्ञतां प्रकटय्य सन्दिष्टवान् यत् संस्कृतानुरागिणोऽधिकाधिकं संस्कृत कार्यक्रमाणामायोजनं कुर्युरिति शम्।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत शोधसंस्थानस्य तथा दिव्यज्योतिषः आजीवनसदस्यनिर्माणाभियानम्

मान्याः संस्कृतविद्वान्सः संस्कृतानुरागिणश्च । जयतु भारती

श्रीमतां परमसहयोगेनाशीर्वादेन च संस्थानस्य तथा दिव्यज्योतिषः ४५ पञ्चचत्वारिंशत् वर्षाणि विद्यमानासु विविधबाधास्वपि नियमितप्रकाशनपूर्णानि व्यतीतानि । अक्टूबरमासात् ४६ षड्चत्वारिंशततमः वर्षः प्रारब्धः । अस्य अमरभारतीप्रसारयज्ञस्य सफलतायाः श्रेयोभाजः तत्र भवन्त एव । अहंतु एकलः श्रमिकोऽस्मि । अतीते दीर्घसमये सं. संस्थानेन १२ पुस्तकानि प्रकाशितानि । ४६ तमे वर्षे संस्थानस्य दिव्यज्योतिषश्च दीर्घजीवनाभिवर्धनाय च आजीवनसदस्यनिर्माणार्थं प्रयतमानोऽस्मि ।

ये दिव्यज्योतिषः पाठका संस्था वा आजीवनसदस्याः भविष्यन्ति ते एकवारमेव १००० मितं सदस्यताशुल्कं प्रेषयिष्यन्ति जीवनपर्यन्तं च सदस्या भविष्यन्ति । तेभ्यः दिव्यज्योतिस्तथा संस्थानस्य प्रकाशनानि निःशुल्कं मिलिष्यन्ति । ये विद्वांसः पी. एच. डी. विद्यावारिधि प्रभृति उपाधि प्राप्तये शोधग्रन्थं संस्कृतभाषायां लिखिष्यन्ति । तद्ग्रन्थमुद्रणार्थं संस्थानं यथाशक्तिअनुदानप्रदानं करिष्यति इति योजना अपि विचाराधीना वर्तते । आजीवनसदस्यनिर्माणे सहायता क्रियताम् ।

संस्कृतमासिक दिव्यज्योतिषा समस्तविश्वे संस्कृतविकासाय तथा सं. विदुषाम् अधिकारसंरक्षणायमहत्प्रयतितम् ।

—:★★:—

– कृतज्ञः

आचार्य दिवाकरदत्त शर्मा

संस्कृतशोध संस्थानस्य तथा

दिव्यज्योतिषः संस्थापकाध्यक्षः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रत्नकुमारी संस्कृतशोध संस्थानस्य तथा दिव्य-ज्योतिः सं० मासिकस्य गतपञ्चचत्वारिंशत्—४५ वर्षाणां महत्वपूर्णाः उपलब्धयः

१- संस्थान माध्यमेन १३ संस्कृत ग्रन्थाः प्रकाशिताः ।

२- विविधानि संस्कृतसम्मेलनानि समायोजितानि ।

३- संस्थाने दुर्लभाः संस्कृत -फारसी पाण्डुलिपयः संकलिताः ।

४- संस्थाने महत्वपूर्णा समस्तभारतस्य सं० हि० अं० क्षेत्रीयभाषा-मासिकवार्षिकपत्रिकाः सुरक्षिताः सन्ति ।

५- संस्थानेन अनेकसंस्कृतशोधकर्तृभ्यः छात्रेभ्यः शोधसम्पादने सहायता प्रदत्ता ।

६- दिव्यज्योतिषः माध्यमेन अनेके ग्रन्थाः तथा शोधलेखाः प्रकाशिताः ।

७- समये २ दिव्यज्योतिषः माध्यमेन केन्द्रियप्रदेशीयसर्वकारैः सह संस्कृतप्रसारसम्बन्धिविषयाणां समीक्षणं विहितं विदुषां विचाराश्च प्रेषिताः ।

८- दिव्यज्योतिः सचित्रसंस्कृतमासिकम्—१९९७ वर्षे दिल्ली संस्कृत-अकादम्या ११००० सहस्रपुरस्कारप्रदानेन सम्मानितम् ।

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्थान के प्रकाशन

१. फलादेश कल्पतरु: (मूल संस्कृत में)
हिन्दी अंग्रेजी टीका सहित ४० वर्ष के अनुसन्धान और अनुभव पर आधारित जातकफल कहने का ज्योतिष का अनुपम ग्रन्थ —मू.७०/०

२. संस्कृत कोशवाङ्मयम् (संस्कृत में)
संस्कृतकोशसाहित्यपर अनुसन्धानपूर्ण विवेचन —मू. १७५/०

३. झञ्झा (संस्कृत में)
शेक्सपीयर के द टम्पेस्ट नाटक का सचित्र रूपान्तर ...मू.५०/०

४. हिमाचलप्रदेशे संस्कृतस्य प्रसारो विकासश्च (संस्कृत में)
हिमाचल में संस्कृत के प्रसार विकास की सचित्र विस्तृत कहानी.. मू.५०/०

५. वैजयन्ती (हिन्दी काव्य)
नवीन प्राचीन विचरधाराओं का गीतिमय समन्वय ...मू.१५/०

६. सूनृता (संस्कृत काव्य)
आधुनिक गीतों में गुम्फित उपहार — ...मू.२५/०

७. शक्तिसौरभ (हिन्दी में)
संस्कृत लेखिकाओं का इतिहास ... ... मू. १५/०

८. विचारामृत (हिन्दी में)
आचार्य जी के विभिन्न विषयों पर जीवनोपयोगी लेख दो भाग...मू. १५/०

९. पथ्यापथ्यविनिर्णय
सं. हिं. टीका सहित आयुर्वेद का दुर्लभ ग्रन्थ —मू. २०/०
(डाकव्यय सर्वत्र पृथक्)

१०. सरिता
(अभिनव सचित्र संस्कृत कथानिकाएं) — —मू.५०/०

११. हिमानी दिव्यभूमि हिमाचल के सचित्र चित्रण सहित
(संस्कृत गीति काव्य हिन्दी अनुवाद सहित) ...मू.१००/०

(५८५ रु. मूल्य की पुस्तकें २९२ में प्राप्य)

सम्पर्क सूत्र :— सचिव,

संस्कृत शोध संस्थान

भारती विहार मशोबरा शिमला १७१००७ (हि.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०५९ माघः ख्रीष्टाब्दः २००३ जनवरी

वर्षम् ४७ अंकः ४

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखां चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पात्राणि— परिवर्त्तनम्

– डा० शम्भु कुमार झा

★★

नागेशः-पण्डितः प्राचीन विचारधारायाः पोषकः।

शीला-नागेशस्य पत्नी (ग्राम्य महिला)

शेखरः-नागेशस्य पुत्रः संस्कृतेन सहाधुनिक विषयाणां ज्ञाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोरमा-नागेशस्य पुत्री

विद्यातीर्थः-अखिलशास्त्रावतारः कालेन सह परिवर्तनशीलः

सख्या-मनोरमायाः

धर्मराव:-आंग्लविद्वान् संस्कृतस्य जिज्ञासुः

प्रताप:- ग्राम्य पण्डितः

श्रुतिधरः—

काव्येषु नाटकं रम्यमिति सर्वे जानन्ति। प्रस्तुतेऽस्मिन् नाटके प्राचीन विचारधारायां परिवर्त्तनस्य प्रयोजनं दृष्ट्वा लेखकेन 'परिवर्त्तनम्' नामक नाटकं विरचितम्। नागेशः विशिष्टो विद्वान् असौ परम्परायां कुत्रापि परिवर्त्तनं न वाञ्छति। नागेशस्य पुत्रः शेखरः समयेन सह गन्तुमिच्छता परिवर्त्तनस्य प्रबलसमर्थंको विद्यते। तस्यानुसारं परिवर्त्तनं संसारस्य अपरिहार्यः नियमः अस्ति। दिनानि, मासाः, वर्षाणि यदा परिवर्त्तन्ते तदास्माकं व्यवहारे, क्रियायां, नियमे, पठनपाठनशैल्यां धर्मे परिवर्त्तनं कथं न स्यात्। नाटकेऽस्मिन् संस्कृतविदुषि एको महान् दोषो भवति यदसौ सर्वज्ञा भवति सर्वज्ञतायाः भावना संस्कृतस्य विकासे बाधकोऽस्ति। संस्कृतज्ञः संस्कृतेतरविषये उदासीनः हीन भावयुक्तो भवति। समाजे प्रचलितायाः रूढिविचारधारायाः खण्डनं नाटकस्य माध्यमेन लेखकेन कृतम्।

अवतरणिका—

मनोरमायाः वयोदृष्ट्वा नागेशः चिन्तितोऽस्ति यतो हि सा एकादश वर्षीया जाताऽस्ति। नागेशः बहुकालात् केनापि सह सम्यक् प्रकारेण वार्त्ता न करोति सर्वदा शिरसि हस्तं दत्वा शोचति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्चे नागेशस्य पत्नी गृहकार्यं क्रियमाणा वर्तते तत्रैव नागेशः सुप्रसन्न-मनः प्रविशति गायति च ——

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजन प्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

अद्य प्रसन्नोऽस्मि ।

शीला—श्रीमतः प्रसन्नतायाः किं कारणं विद्यते । वर्षत्रयानन्तरं भवतः प्रसन्नता पुनरागता । विवाह समयेऽपि भवान् एतादृक् प्रसन्नः नासीत् । का वार्तास्ति ?

नागेशः— अये शीले ! त्वया प्रश्नाः एव करिष्यन्ते अथवा पादप्रक्षालनाय जलमपि दास्यते नाऽत्र जलं विद्यते न च आसन्दिका। उत्तिष्ठन्नेव सर्वं वक्ष्यामि किम् ?

शीला—(ईषत् हसन्ती) क्षम्यताम् । क्षम्यताम् । इदं जलं इयं च आसन्दिका ।

नागेशः— (पादं प्रक्षाल्य उपविशति) शीले अद्य विलासपुरस्य रंगनाथ शर्म्मणा सह मनोरमायाः विवाहसंस्कारस्य वार्ता पूर्णा जाता। रंगनाथः पञ्चविंशद्वर्षीयः परमयाज्ञिकः उत्तमकुलोत्पन्नश्चास्ति ।

नागेशः— मिष्टान्नमेतत् विद्यते प्रतिवेशिभ्यः देहि ।

(शीला मिष्टान्न वितरणाय गच्छति)

शेखरः— मातः । भो माता । कुत्रासि ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागेशः- अरे शेखर! कथं कोलाहलायते। तव माता मिष्टान्नदानाय गतवती।

शेखरः – मिष्टान्नम् ? कस्मिन्नुत्सवे ?

नागेशः – रंगनाथेन सह मनोरमायाः विवाहस्य स्वीकृतिर्जाता।

शेखरः- श्री रंगनाथजीवस्तु भवदीयः वयस्यः वर्तते कथमेतत्।

नागेशः- अरे जानासि ! रंगनाथस्य पितापितामहश्च संस्कृतस्य विशिष्टो विद्वान् आसीत्।

शेखरः— तेन किम् ?

शीला- कथं भो शेखर ! शुभसन्देशः त्वया श्रुतः। किं प्रसन्नोऽसि।

शेखरः- कथं मातः ! त्वमपि। मम मन्ये नोचितम्।

नागेशः- अरे कुलकलङ्क। उचितानुचितयोः विचारे आवां करिष्यावः।

शेखरः— तत् कथम् ? अहमपि गृहस्य सदस्यः। व्यवहारपक्षस्य ज्ञानं ममाप्यस्ति।

नागेशः- अरे दुष्ट ! पित्रा सह प्रत्युत्तरं करोषि। त्वं न जानासि अहं अहं तव पिता अस्मि।

शीला- कथं भवानपि लघ्वीवार्ता विस्तारयति। अयं तु बालोस्ति।

नागेशः- हुँ बालः। वार्तया वृद्धः प्रतीयते।

मनोरमा- (गृहं प्रविशति) अत्र कोलाहलं कथं भवति ?

(सर्वे मौनमवमवलम्ब्य अधः पश्यन्ति)

मनोरमा- कथं यूयम् मौनाः अवलोक्यन्ते ?

शीला- अये ! मयि स्नेहपरि पुत्रि। त्वं गृहम् गच्छ।

शेखरः- नहि मनोरमे ! अत्र एहि अहं सर्वं कथयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागेशः- हे विधातः ! कीदृशोऽयं पुत्रः । त्वदीयामतिः तव पार्श्वे अस्ति न वा । मतिभ्रष्टः प्रतीयसे ।

शेखरः- अहम् उन्मत्तोऽस्मि । मूर्खः, मतिभ्रष्टश्चास्मि । गृहं त्यक्त्वा गच्छामि (गृहात् गच्छति)

मनोरमा- अयि गायत्रि । किं भवति विवाहः..... कथं न वदसि ।

गायत्री- नाहं जानामि ।

(एका सखी- विवाहे अन्यग्रामात् एकः पुरुषः सम्बन्धिभिः सह तिलकार्थं तः आगच्छति । स्त्रियः गीतं गायन्ति । पण्डितः मन्त्रं पाठयति । अन्ते च पुरुषेण सह बालिका क्रन्दती गृहात् व्रजति ।)

मनोरमा- ममापि विवाहः भविष्यति इति मात्रा अहं श्रुतम् । (शुभे दिने मनोरमायाः विवाहः ग्रामपरम्परानुसारं रगनाथेन साकं भवति परन्तु दौर्भाग्येन मासाभ्यन्तरे एव सा वैधव्यं प्राप्नोति)

द्वितीय दृश्यम्

(मनोरमायैं पितुरादेशः आसीत्-सर्वदा त्वया शुक्ला शाटी धारयितव्या सखिभिः सह क्रीडा न कर्तव्या, पुरुषेण सह वार्ता न विधेया इत्यादयः)

मनोरमा- (कुमारिकावस्थायाः वस्त्रं परिधाय क्रीडनाय गृहात् निर्गच्छति)

नागेशः- अरे कुलक्षणे । कुत्र गच्छसि । किं ते मनसि वर्तते वारं वारं उक्तम् । त्वं गृहात् बहिर्न गमिष्यसि ।

मनोरमा- कथं तात ।

शीला- (अश्रूणि पातयन्ती) हे भगवन् । त्वं विधवासि । शृंगारस्य साधन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रीडा न कर्तव्या त्वया। हसनं न विधातव्यम्। सवदा भगवतः गुणानुवादः कर्तव्यः।

मनोरमा- (बालस्वभावात्) न हि मातः। अहं सर्वं करिष्यामि।

शीला- (मनोरमायै चपेटिकां ददाति) तव मृत्युः कथं न भवति।

मनोरमा- (क्रन्दती बहिः खेलनाय गच्छति)

शेखरः- (किञ्चिदिदूनानन्तरं ग्राममागच्छति) (श्वेतवस्त्रपरिधा पितां अश्रुयुतां खिन्नां कृशतनूं भगिनीं दृष्ट्वा) हे विधातः। त्वया किं कृतम्। मनोरमे कथं रोदिषि? तव भ्रातास्ति नु त्वया सह न्यायं करिष्यति। चिन्ता मा कार्षीः।

मनोरमा- (पादौ स्पृशति) हे भ्रातः। पितरौ निन्दतः। अपशब्दं भाषेते। अग्रे न जाने किम् किम् .....

शेखरः- इत्थं भवति त्वया सह। हन्त। अहमागतोऽस्मि। मया सह गृहं चल। (हस्तं धृत्वा गृहमानयति शेखरः)

नागेशः- हा पुत्र। अनर्थोऽभूत्। मनोरमा आजीवनं पितुः गृहम् लप्स्यति हा देव.....(रोदिति)

शीला- (गद्गदया वाचा।) न जाने कस्मिन् जन्मन्यहं गोगृहं पुप्लोष। कस्य पापस्य फलमेतत्।

शेखरः- कथं भवन्तौ क्रन्दतः। परमेश्वरः सर्वं कल्याणं करिष्यति क्रन्दनेन समस्यायाः विपत्तेश्च समाधानं न भविष्यति। अतो वयमुपविश्य समाधानं गवेषयामः।

तृतीयं दृश्यम्

(धर्मशावः मद्रास महानगरस्य संपन्नपरिवारस्य पितुः एकाकी (अति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीय छाया) पुत्रः आंगलभाषयाः विशिष्टो नवोदितो विद्वान् अस्ति। तेन एकदा मन्दिरं गत्वा भगवतः शिवस्य संस्कृतविद्वदिभः भावपूर्णा प्रार्थना श्रुता। तस्मिन्नेव काले धर्माशावस्य मनसि संस्कृतानुरागः उत्पन्नो जातः धर्माशावः संस्कृतपठनाय विद्यातीर्थगुरोः पार्श्वं आगच्छति।

धर्माशावः (गुरोः पार्श्वं गत्वा।) नमस्ते सर।

विद्यातीर्थः- को भवान् ? कुतः समायातः। किं ते कार्यं वर्तते।

धर्माशावः- I am Dharmaraw Coming From south India
I want to learn sanskrit from you.

विद्यातीर्थः- त्वं संस्कृतं पठितुमागतोऽसि। परमः जिज्ञासुः प्रतीयसे। जिज्ञासवे संसारेऽस्मिन् दुर्लभः किमपि नास्ति। त्वं सत्यसंकल्पः, श्रद्धावान् विश्वासी चास्ति। अहमवश्यमेव त्वां पाठयिष्यामि परन्तु आश्रमस्थाः सर्वे छात्राः त्वत्तः आंग्लभाषां पठिष्यन्ति।

धर्माशावः- (परिश्रमेण संस्कृतं पठति) (पाठनाय आंग्लभाषां छात्रान् प्रति गच्छति) अहमस्मि धर्माशावः। आंग्लभाषायां षड्विंशतिः वर्णाः भवन्ति।

(सर्वे छात्राः कक्षां परित्यज्य बहिर्गच्छन्ति)

शेखरः- भो धर्माशाव ! अस्माभिः आङ्ग्लभाषा न पठिष्यते।

धर्माशावः- कथं भोः। अहं संस्कृतं पठामि जानामि च तदा यूयमपि पठत। अद्य विश्वस्मिन् सर्वप्राचीना संस्कृतं परन्तु अस्याध्येतारः न्यूनाः सन्ति कथं जानासि संस्कृतज्ञैः आत्मानं सर्वेषु श्रेष्ठाः सर्वज्ञाः मन्यन्ते। अन्यासां भाषां प्रति उदासीनाः भवन्ति। सर्वदा अस्मत् सदृशः संसारे न कोऽपि अस्ति इत्थं जल्पन्ति। यदि संस्कृतज्ञाः आंग्लभाषां ज्ञास्यन्ति तदा ते स्वकीयानि ज्ञानानि वैशिष्ट्यं च अन्येभ्यः दास्यन्ति।

शेखरः- आम वयम् आंग्लभाषां पठिष्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अति श्रमेण संस्कृतेन सह सह आंग्लभाषामपि पठन्ति धर्मारावः अपि संस्कृते दक्षो जातः ।)

धर्मारावः- शेखर ! तव गृहे के के सन्ति । तव पितरौ, भ्राता, भगिनी

शेखरः— अग्रे वक्ष्यामि । सम्प्रति गृहं गच्छामि ।
(गृहं गत्वा आंग्लभाषायाः पुस्तकं पठति भगिनीमपि पाठयति)

नागेशः- शेखर ! किं वदसि (पठसि) न ज्ञायते ।

शेखरः— पितः । आंग्लभाषायां वच्मि । मनोरमामपि पाठयामि ।

नागेशः- कथं त्वं वंशस्य प्रतिष्ठां हन्तुम् उद्यतोऽसि । किं वयं गृहं त्यक्त्वा कुत्रापि गच्छेम ।

शेखरः- वयं कुत्रापि न गमिष्यामः । श्वः गुरोः आश्रमे गमिष्यामः ।
(नागेशः प्रातः पितुः वार्षिक श्राद्धे संलग्नो भूत्वा आश्रमं गन्तुं शीलां निषेधयति)

नागेशः-युवां भ्रातृभगिन्यौ गच्छतां आश्रमम् ।

शेखरः- (गुरुं प्रणमति) प्रणमामि गुरुवर ! इयं मनोरमा ।

विद्यातीर्थः- हे भगवन् । (मनोरमां दृष्ट्वा) कदा इयं विपतिः आपतिता ।

धर्मारावः- किमस्ति गुरुदेव ! केयं विद्यते । शेखर का वार्तास्ति वद ।

शेखरः— इयमस्ति मनोरमा । मम अनुजा । सा विधवा अभवत् ।

धर्मारावः शेखर ! मनोरमा पठनं लेखनं च जानाति किम् ?

शेखरः- किमहं कथयिष्यामि । त्वया वार्ता कर्तव्या ।
(धर्मारावः मनोरमया सह संस्कृते आंग्ले च वार्तां कृत्वा प्रसन्नो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति । मनोरमां प्रति तस्य हृदि अनुराग उत्पन्नो जातः मनोरमा अपि धर्माराव्स्य मूर्ति मनसि स्थाप्य गृहं आगतवती । धर्मारावः यस्मिन् कस्मिन् दिने शेखरस्य गृहं गत्वा मनोरमया सह वार्तां करोति परन्तु पितरौ (शेखरस्य) अनेन व्यवहारेण असंतुष्टौ आस्ताम् ।

नागेशः... शीले ! कुत्रासि मनोरमायाः व्यवहारः परिवर्तितो वर्तते नास्ति शोभनकरम् ।

शीला- मनोरमे ! अद्य पञ्चषड्मासेभ्यः त्वं प्रसन्ना दृश्यसे । धर्मारावेन सह वार्तां त्वया न विधेया ।

मनोरमा— धर्माराव: सच्चरित्रः, विद्याविनयसंपन्नः, धैर्यवान् गुणवान् तथाऽधुनिक समयस्य सम्यक् ज्ञानाऽस्ति । दोषः एकोऽपि न वर्तते ।

शीला- अरे वाचाटे । भाग्यहीने किं त्वं वदसि । तव जिह्वा कथं न पतति

मनोरमा- भाग्यहीना नाहमस्मि । भवन्तौ व्यर्थं चिन्तयतः ।

शेखरः- अस्य गृहस्य शान्तिः कुत्र गता । अहमद्य कथयामि वयं सर्वे गुरोः आश्रम प्रातः गमिष्यामः ।

सर्वे आश्रमं प्रति गच्छन्ति

चतुर्थदृश्यम्

नागेशः- (आश्रमस्य व्यवस्थां दृष्ट्वा चकितो भवति) अरे शेखर ! इमे कन्दुकक्रीडकाः वैदेशिकाः सन्ति किम् ? सर्वे यवनानाँ परिधानं परिधाय इतस्तत, भ्रमन्ति तत् कथम् ।

श्रुतिधरः- प्रणमामि सर्वान् । चलन्तु सर्वे । गुरुवर्योऽपितत्रास्ति कान्दुक-क्रीडां पश्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागेशः किमहं पश्यामि । गोशाला कुत्र गता यज्ञमण्डपो नावलोक्यते । अत्र सर्वं परिवर्तितं वर्तते ।

शेखरः इदं सर्वं दर्शनाय एवाहम् भवतः अत्र अनेषम् ।

नागेशः- गुरवः कुत्र विराजन्ते । वयं गमिष्यामः ।

(सर्वे गुरोः समीपमागत्य)

नागेशः प्रणमामो वयम् ।

विद्यातीर्थः — सुखं चिरं तिष्ठन्तु ।

नागेशः- गुरुवर ! भवद्भिः आंग्लभाषायाः समाचारपत्रं पठ्यते आश्चर्यमेतत् ।

विद्यातीर्थः— नागेश । भवान् जानाति । परिवर्तनमस्य संसारस्य नियमोऽस्ति । यो हि जनः परिवर्तमानेन समयेन सह स्वयं न परिणमति (परिवर्तयति) परिणमयति वा असौ जगति द्रुतगतौ असफलो भवति । स्वं जीवनं नाशयन् सन्ततिं च विनाशयति ।

धर्मारावः - मनोरमे ! अत्र एहि । त्वया सह वार्ता कर्त्तव्या वर्तते ।

मनोरमा- (अधोमुखी पादाङ्गुल्या भूमिं स्पृशन्ती) अहम् ?

विद्यातीर्थः— गच्छ पुत्रि ! (श्रुत्वा गच्छति)

नागेशः — (क्रुद्धमनः) गुरुवर ! मद्गेहे शान्तिर्नास्ति । शेखरः धौतवस्त्रं विहाय यवन परिधानं (शर्टं पेन्ट परिधाय क्रीडार्थं गच्छति अपि च वदति सर्वदा अहं संस्कृतमाध्यमेन प्रतियोगितापरीक्षायां गन्तास्मि । तद्धेतो आंग्लस्य ज्ञानं परमावश्यकम् ।

विद्यातीर्थः— हे महाभाग ! भोजनवस्त्रावासानां निर्णयः कालः देशः, परिस्थितिश्च करोति । संस्कृतस्य सभ्यतायाः रक्षकाः अस्माकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिमे छात्राः सन्ति । अस्माकं समये संस्कृतं केवलं कर्मकाण्डस्य, शास्त्रार्थस्य, काव्यस्य, विद्याऽऽसीत् । परन्त्वद्य विज्ञानस्य, यन्त्रस्य, विविध क्रियाकलापस्य, प्रतियोगितायाः, संगणकयन्त्रस्य च विद्याऽस्ति ।

नागेशः – संस्कृतेऽपि परिवर्तनं भवति । संस्कृतव्यवहारः, धर्मश्च त्रैकालिकः वर्तते अहं मन्ये ।

विद्यातीर्थः – कोऽपि व्यवहारः, नियमः, धर्मः, किमपि शास्त्रं, ज्ञानं कापि नीतिः सार्वकालिकी न भवति अपितु समये समये नवीनः धर्मः नियमश्चागच्छति । मनुष्यात् राष्ट्रं श्रेष्ठम् । राष्ट्रस्य समृद्धि एव विधायाः ज्ञानस्य, व्यवहारस्य प्रयोजनमस्ति ।

नागेशः- तदा शेखरः यत् करोति तत् सर्वं सत्यम् (साधुः) मनोरमां विधवां भूत्वाऽपि हसति, पठति, गायति, पुरुषेण सह वार्तां करोति एतत् सर्वं शोभनम् ।

विद्यातीर्थः- आम । निखिलं सत्यं शोभनञ्च शास्त्रसम्मतं चाद्य राष्ट्रस्य विकासाय "संविधानं" वर्तते अस्य स्थानं सर्वोपरि वर्तते । यैः (पुरुषैः स्त्रीभिः) संविधानं न मन्यते ते राजपुरुषाः दण्ड्यन्ते । द्वादश वर्षीया बालिका भवद्भ्यः रंगनाथाय प्रदत्ता । पृच्छामि कथम् ।

नागेशः – श्रीमन् शास्त्रे-अष्टवर्षा भवेद्गौरी.....

विद्यातीर्थः— संविधानं शास्त्रमस्ति । तस्मिन् स्पष्टोल्लेखः वर्तते न्यूनामष्टादशवर्षीयां बालिकां यो हि विवाहं करोति कारयति च उभौ दण्ड्यौ स्तः । तव पापस्य प्रायश्चित्तस्वरूपे मनोरमायाः पुनर्विवाहः अद्य भविष्यति ।

नागेशः– ग्राम्याः किं वक्ष्यन्ति । मम वंश परम्परायाः किं भविष्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यातीर्थः— हे विद्वांसः अत्रागच्छन्तु भवन्तः ।

सर्वे ग्राम्याः- नमामो वयम् । श्रीमन्तः यदवक्ष्यन्ति अस्माकं हिताय एव स्यात् ।

विद्यातीर्थः- धर्मराव ! मनोरमा तुभ्यं रोचते ।

धर्मरावः— आम श्रीमन् ।

(विवाहेन विधिना संस्कारो जातः)

विद्यातीर्थः- हे ग्राम्याः छात्राश्च शृणुत । जीवनमेका प्रयोगशाला वर्तते । अत्र सिद्धान्तेन किमपि न लभ्यं भवति । व्यवहार कुशलः पण्डितो भवति । युष्माभिः परिवर्तनस्य समर्थनं कर्त्तव्यम् । पुत्र्याः विवाहे वरस्य सम्यक् परीक्षणं कर्त्तव्यम् (आदौ तात वरं पश्येत् पश्चात् कुलशीलयोः) वंशपरम्परया अथवा धनाढयेन किमपि न प्राप्यते । वरः गुणवान् आचारयुक्तः, व्यसनरहितः, विद्यावान् अस्ति चेत् श्रेष्ठः वरः । भवन्तः सर्वे अत्रागताः अतो धन्यवादार्हाः संस्कृतज्ञैः उदात्तभावनाभिः भवितव्यम् । परिवर्तनं स्वीकरणीयम् ।

— यजुर्वेद ऋग्वेद साहित्य धर्मशास्त्राचार्यः
प्रवक्ता संस्कृत दर्शन एवं वैदिक अध्ययनविभागस्य ।
टोंक राजस्थान वनस्थली
विद्यापीठ ३०४०२२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



हिमालयो विशिष्यते

– डा० शिव कुमार मिश्रः

★★

राष्ट्रस्य प्रहरी नूनं विशिष्टगौरवान्वितः।
रक्षको भारतस्यास्य हिमालयो विशिष्यते ।१।

रक्षां करोति राष्ट्रस्य सदा प्राचीनकालतः।
गायन्त्यस्य यशोगानं राष्ट्रभक्ता निरन्तरम् ।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमवतो महत्त्व वै सिध्यति सर्वतो मुखम् ।
राष्ट्रियं धार्मिक चैव सांस्कृतिकं निसर्गतः ।३।

महत्त्वं गिरिराजस्य स्पष्टं समवलोक्यताम् ।
राष्ट्रियभावना यस्मात्सर्वत्र परिलक्ष्यते ।४।

रक्षां करोति शत्रुभ्य आपत्काले हि सर्वथा ।
तस्माच्च प्रहरी ख्यातः राष्ट्रस्यास्य न संशयः ।५।

पक्षरसाङ्कचन्द्राब्दे आर्यावर्तस्य शत्रुणा ।
आक्रमणं यदा जातं चीनदेशेन भारते ।६।

तदैव राष्ट्ररक्षार्थं दृश्यन्ते स्म समुद्यताः ।
हिमवता समाहूता राष्ट्रभक्ताश्च सैनिकाः ।७।

इत्थं रक्षति शैलेशः राष्ट्रमिदं दिवानिशम् ।
गृहस्य प्रहरी नूनं यथा रक्षति प्राङ्गणम् ।८।

शंलोऽयं श्लाघनीयोऽस्ति सदा धार्मिक पक्षतः ।
पूर्वकालाद्धि राष्ट्रेऽस्मिन् संशयो नात्र वर्त्तते ।९।

सनातनस्य धर्मस्य कीर्तिस्तम्भः प्रकीर्तितः ।
पर्वतोऽयं हिमाच्छन्नः समस्ते विश्वमण्डले ।१०।

पार्वत्या जनको नूनं गङ्गायाश्च निसर्गतः ।
अनयोः जनकत्वेन शैलो जातः प्रतिष्ठितः ।११।

षष्ठिसहस्रपुत्राणां सगरस्य निसर्गतः ।
समुद्धाराय सर्वेषां गङ्गा जाता प्रकीर्तिता ।१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उमापि तपसा नूनं शिवं प्राप्य प्रयत्नतः ।
जनयित्वा तदा स्कन्नं देवानां रक्षणाय वै ।१३।

इत्थमिमे प्रयत्नेन यशो वितनुता सदा ।
हिमवतो हि निःसृत्य धार्मिकदृष्टिकोणतः ।१४।

गङ्गा नारायणी कोशी वाङ्मती संज्ञकादयः ।
समुद्गताः सदा नीरा नद्यस्त स्मान्निसर्गतः ।१५।

हिमालयस्तपोभूमि र्देवालयोऽपि भण्यते ।
स्वर्गादागत्य सप्तर्षिः प्राप्नोति कुसुमानि वै ।१६।

गुरुत्वं दृश्यतामस्य समागत्य महर्षयः ।
साधनां सफलीकर्तुं तपश्चरन्ति सर्वथा ।१७।

विश्वदेवो महादेवस्तपस्विनां धुरंधरः ।
कैलाशशिखरे रम्ये तपश्चरति सर्वदा ।१८।

प्राकृतिकं च दृश्यं हि रम्यं यस्य न संशयः ।
राष्ट्रियगौरवस्तम्भः प्रख्यातो भुवि राजते ।१९।

प्राकृतिकं प्रकर्षेण दर्शं दर्शं हिमालयम् ।
अतिशयेनमुग्धैर्वै चिन्तितं कविभिः सदा ।२०।

एतादृशो हिमालय ! कैलाशपतिना सह ।
त्रायस्व राष्ट्रमस्माकं राष्ट्रस्य प्रहरी सदा ।२१।

— संस्कृत विभागे
कुँवरसिंहमहाविद्यालयः लंहेरियासरायः
(बिहारः) ८४६००३

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्टवृत्तिम्प्रति

हे दुष्ट वृत्ते ! मम वासभूमिं त्यक्त्वाऽन्यभूमिं कुरुवासयोग्याम् ।
मदीय लोकादपि दिव्यलोकः विराजते पश्चिम भूमिभागे ।१।

दृष्ट्वा त्वया किं भरतस्य भूमिः निवास रूपेण परि गृहीता ।
सद्वृत्तिरत्रैव मृता यथा किं तथा गतिस्ते न भविष्यतीति २।

न भूमिरेषा तव वासयोग्या त्वं सर्वपूज्या जनितादरा च ।
अत्रत्यलोकाः मनसा वदन्ति दुर्वृत्त वृत्तं धिक्धिक् सहस्रम् ।३।

मदीय गेहे समुपागता त्वं भिनत्सि नित्यं मम भावभित्तिम् ।
निराश्रया संश्रयनाशनाय समुद्धता त्वं कुलटेव भसि ।४।

अत्रत्यलोकेषु सदा किरन्ती मधुप्रदत्तं नवयौवनेन ।
तृप्तिं न यासि स्खलिताङ्गवन्धां करोतु शीघ्रं जलजोद्भवः त्वाम् ।५।

लोकान् स्वदेहा दिह तोषयन्ती वाराङ्गना त्वं मदन प्रमत्ता ।
त्वत्तो प्रशस्या बहुकुक्कुरेभ्यो आस्वादयोग्यास्ति शुनी स्वभूमौ ६।

शीघ्रं परित्यज्य मदीयभूमिं यथेष्टदेशे कुरु चात्मवृत्तिम् ।
नग्नां विधायात्र जनेषु नूनं त्वां भ्रामयिष्यामि किमन्यथा वा ।७।

सौशील्यमालोक्य समागतासि राज्ञीव वाञ्छास्ति तवेति मन्ये ।
दौर्जन्यमालोक्य चिरान्न भृत्या भविष्यसीहेति विचारयामि ।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्राय मित्राणि सदा भवामः स्वजीवनेनापि समर्चनाय ।
परञ्च दुष्टानवलोक्य शीघ्रं वज्रप्रहारेऽपि सदा समर्थाः ।९।

निशम्य वाचं विनिवेदनस्य मदीय भूमिं त्यज शीघ्रमेव ।
दण्डप्रहारादयवा करोमि सुस्वागतं ते रमणीयगात्रे ।१०।

गन्तुमिच्छसि चेद् गच्छ त्यक्त्वा भूमिमिमांस्वयम् ।
गर्दभेन विवाहं ते कारयिष्यामि वाऽन्यथा ।११।

– निरञ्जन मिश्र

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं। –व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा प्रथमा संस्कृतिविश्ववारा

मध्यप्रदेश संस्कृत अकादेमी

(मुल्ला रमूजी संस्कृततिभवन, वाणगंगा भोपाल-३)

वर्ष १९९९ एवं २००० का श्रेष्ठ कृतियों पर पुरस्कार हेतु

कृति आमंत्रण

संस्कृत की श्रेष्ठ रचनाओं पर पुरस्कार देने की योजना के अंतर्गत म. प्र. संस्कृत अकादेमी, भोपाल निम्नलिखित पुरस्कारों के लिए लेखकों से १. जनवरी, १९९९ से ३१ दिसम्बर, २००० त० की अवधि में प्रकाशित पुस्तकें आमंत्रित करती है। पुस्तकों की तीन प्रतियां दर्शाए गए घोषणा-पत्र के साथ दिनांक १५ फरवरी, २००३ (संध्या ५.३०) तक अकादेमी कार्यालय में पहुँच जानी चाहिए।

पुरस्कार का नाम	विषय
१. अखिलभारतीय कालिदास पुरस्कार रू. २०,०००/- (रू. बीस हजार)	'संस्कृत की कृति'
२. प्रादेशिक पुरस्कार —	
(क) भोज पुरस्कार रू. १०, ०००/- (रू. दस हजार)	संस्कृत साहित्य संबन्धी समीक्षा संस्कृत अथवा हिन्दी में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ख) राजशेखर पुरस्कार
रू. १०,०००/- (रू दस हजार)
'पारम्परिक अनुशासनों की संस्कृत अथवा संस्कृत की रचनात्मक कृति'

(ग) व्यास पुरस्कार
रू. १०,०००/- (रू. दस हजार)
'पारम्परिक में संपादन अथवा संस्कृत से हिन्दी या हिन्दी से संस्कृत में किसी साहित्यिक अथवा शास्त्रीय कृति का अनुवाद'

१. उपर्युक्त पुरस्कार अकादेमी द्वारा स्वीकृत नियमों के अंतर्गत होंगे

२. दिनांक १-१-१९९९ से ३१-१२-२००० के बीच प्रकाशित पुस्तकें पत्रिकाएँ या कतरनें इस योजना में शामिल की जाएँगी।

३. इस स्थिति में अकादेमी द्वारा घोषित निर्णय अंतिम होगे। उसके विषय में किसी प्रकार का भी पत्र व्यवहार नहीं किया जाएगा।

४ आवश्यकतानुसार नियमावली अकादेमी कार्यालय से कार्यालयीन समय में प्राप्त की जा सकती है।

५. लेखक द्वारा की जाने वाली घोषणा सभी पुरकारों के लिए इस प्रकार है।—

"मैं घोषणा करता/करती हूँ कि ..... पुस्तक का नाम मेरी मौलिक/अनुदित कृति है और। जनवरी १९९९ से ३१ दिसम्बर २००० के बीच पहली बार प्रकाशित हुई है। इससे पूर्व यह किसी अन्य नाम अथवा रूपान्तरण में प्रकाशित नहीं हुई है।'

लेखक के हस्ताक्षर/पता

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल प्रदेश संस्कृतअकादम्याः द्वितीयो द्विदिवसीयः सम्मेलन समारोहः

श्री ज्वालामुखी सिद्धशक्तिपीठस्थले गीताभवने प्रदेश संस्कृत अकादम्या विशालमेकं सम्मेलनमायोजितम् दिसम्बरमासे २७ तः २८ दिनाङ्कपर्यन्तं दिवसद्वये सत्र चतुष्टयात्मकोऽयं समारोहः महता साफल्येन सम्पन्नोऽभूत यत्र सहस्राधिका विद्वांसश्छात्राश्च समुपस्थिताः।

तत्र प्रथम सत्रं वेदिक विद्वत्समेलनात्मकमासीत् अस्य मुख्यातिथिः प्रमुखव्याख्यानकर्ता च डा० व्रजविहारी चौबे होश्यारपुराभिजन आसीत्। सत्रस्याध्यक्षता राष्ट्रियप्रादेशिक विद्वत्सम्मान प्राप्तकर्ता प्राप्तकालिदासपुरस्कारेण सोलनवास्तव्येन श्री केशवराम शर्मणा कृताऽभूत् तत्र पूर्वं मङ्गलाचरणात्मकवेदपाठादिकानन्तर मध्यक्षमहोदयेन सरस्वती पूजनं विहितम्। अकादम्याः सचिवमहोदयः डा० हरिदत्त शर्मा अध्यक्षमुख्यातिथिवतृमहाभागेभ्यः सतिलक माल्यार्पणमकरोत्। समागतानां विदुषां च स्वागत मकरोत्। अकादम्याश्च विविधगतिविधि परिचयमदात्।

ततो विशिष्टो वेदविद्वान् आचार्यहरिदत्तमहोदयः वेदाभ्यासमहत्त्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदपाठप्रकारं वैदिकपाठशुद्धि आदि विविधविषयप्रतिपादनात्मकं गम्भीरं व्याख्यानं शोधशैल्या उदीरयामास । डा० चौबे महोदयश्च वेदविषये व्यापकचर्चासमृद्धं व्याख्यानम् अनेकविशिष्टविषयान् प्रतिपाद्य वैदिक प्र सम्परासुरक्षार्थमनेकपरामर्शानदात् । अध्यक्षीयभाषणे श्री केशवशर्मा वेदान् राष्ट्रस्यात्मस्थानीय न् अभिधायाकथयत् यत् वितथमिदमुच्यते आधुनिकसमाजे वेदस्य प्रासङ्गिकताऽन्वेषणं विधेयमिति । वस्तुतश्चायमिदमन्वेषणीयं यदाधुनिक समाजस्य वेदेन सह का प्रासङ्गिकताऽस्तीति । अस्य सत्रस्य सयोज । प्रसिद्धो विद्वान् प्राचार्यः श्री भक्तवत्सलमहाभागोऽभूत् ।

द्वितीयसत्रं कालिदाससाहित्यचर्चात्मक गोष्ठीरूपमासीत् । तस्याध्यक्षता राष्ट्रपतिपुरस्कृतेन कविवर श्री दुर्गादत्त शास्त्रिणा कृता । तत्र मुख्य प्रवक्ता प्राचार्य भक्तवत्सलः 'कालिदाससाहित्ये लोकतन्त्रम्' इति विषयमधिकृत्य शोधप्रबन्धमुपस्थापयामास विषयेऽस्मिन् डा० संध्याप्रकाशः डा० तिवारी, मित्रानन्दादयश्च चर्चा चक्रुः । अन्तेऽध्यक्षमहाभागः श्लोकात्मकं विक्रमोर्वशीयस्य पर्वतीयभाषानुवादरूपञ्च सपद्यपाठं व्याख्यानमकरोत् ।

तृतीयसत्रे निशीथे संस्कृतकविसम्मेलनायोजनमासीत् । विद्युत्प्रकाशविलोपेन होराद्वय बाधितमपि पश्चात्प्रारब्धमेवाभूत् । तत्र प्रदेशशिक्षामन्त्रिण ईश्वरदत्तधीमान् महाभागा अध्यक्षपदासीना अभूवन् । विशिष्टातिथिरूपेण च दिल्लीसंस्कृत अकादमी सचिवा विद्वत्तल्लजा आशाष्ट्याप्तकीर्तयः श्री श्रीकृष्ण सेमवालमहोदयाः सम्मेलन मलञ्चक्रुः । तत्र विशेषतः डा० हरिदत्त केशवशर्म सेमवालादीनां कवीनां कमनीयकवितामिः श्रोतृवृन्द मानन्दसिन्धुमग्नं व्यधीयत । अध्यक्षमहोदयेन चान्ते संस्कृतकल्याणादिविषयकं प्रलम्बं व्याख्यानं विधाय सभासमाप्तिः कृता ।

द्वितीयदिने चतुर्थं समाप्तिसत्रायोजनमासीत् । तास्मिन् प्रदेशमुख्यमन्त्रिणो मान्य श्री प्रेम कुमार धूमलमहोदयस्याध्यक्षता समाशोह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौरवमवर्द्धयत् । प्रभूतजनसम्मर्दन पूर्वं मुख्यमन्त्रिणामन्येषां च मन्त्रिणां स्वागतसभाजनमभिहितम् । सभामञ्चमलङ्कृतवत्सु तेषु पूर्वम् डा० हरिदत्तमहोदय: अकादमी सचिवो विशिष्टसदस्यसहित: मुख्यमन्त्रिमहाभाग मन्यांश्च मन्त्रिणोऽधिकारिणश्च स्मृतिचिन्है रङ्गवस्त्रैश्च सभाजयामास । डा० भक्तवत्सलश्च सभासंयोजन सौष्ठव पूर्वकं व्यधात् । डा० सेमवाल महोदयोऽत्र विशेषव्याख्यानमदात् ।

मान्यमुख्यमन्त्रिणा कथितं यत् संस्कृतं राष्ट्रसंस्कृतिमूल सर्वरपि रक्षणीयम् । अस्य सम्यक्ज्ञाने सम्यगुच्चारणशुद्धौ च भूरिप्रयत्ना विधेया: । मन्त्रोच्चारणत्रुटयो निराकरणीया: । सर्वकार: संस्कृतज्ञेभ्य आर्थिकसम्मानं दातुमर्हति दिदित्सते च परं वास्तवं सम्मानं चरित्रेण योग्यतया च संस्कृतज्ञवर्गेण स्वयं प्राप्तव्यमस्ति । प्रशासनिकसेवार्या नाहनसंस्कृतविद्यालयाध्यापक श्री गिरिराज वत् अपरैरपि प्रवेष्टव्यं येन समाजे संस्कृतसंस्कृतिजन्या आदर्शा व्याप्नुयू राष्ट्र च प्राक्तनं गौरवशिखरमारोहेत ।

पर: सहस्रं जना: सम्मेलनेऽस्मिन् सम्मिलिता अभूवन् । संस्कृतमयवातावरण निर्माणकर्मणि एतादृशाणां समारोहाणामनुकरणीयं योगदानं सिद्धयति अकादम्याश्चास्यां दिशि समुद्योग: प्रदेशे संस्कृतहिताय शुभशकुनकल्प: स्वागतव्याहारमहतीति ।

— केशव शर्मा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषोत्तमः पुरुषोत्तमे विलीनः

गत पौषकृष्ण दशम्यां आयुर्वेदशास्त्रस्य प्रकाण्डो विद्वान् नाड़ी विज्ञानस्य विशेषज्ञः पक्षाघातरोगस्य सिद्धहस्तः चिकीत्सकः धन्वन्तरीकल्पः हिमाचलप्रदेशीयः राजवैद्य पुरुषोत्तम शर्मा दिवं प्रस्थितः। अयं महाभागः ८७ वर्षायुः पर्यन्तं आयुर्वेद सेवामकरोत्। सहस्रशः रोगिणः स्वास्थलाभमकुर्वन्।

दिव्यज्योतिषः आदरी प्राधन सम्पादक महाभागस्य केशव शर्मण पितृपादाः स्वनामधन्याः आसन्।

पुरुषोत्तम शर्माणः मन्त्रचिकीत्सका अपि आसन् प्रतिदिनं गायत्री जाप परायणाः स्तोत्र पाठादि जापे अधिक समयं जीवनस्य यापितम्। चरक सुश्रूतादय ग्रन्था एतेषां कण्ठगता आसन्।

वार्धक्य कारणात् गत वर्षेभ्यः एते प्रायः अस्वस्था आसन् तथापि अन्त्य काले गीतापाठं श्रृण्वन्तः ब्रह्मलीनाः समभवन्। हिमाचलप्रदेशस्य नृपतिप्रवराणामेते राजवैद्य पदमधिगताःसमभूवन्। एतेषां पूर्वपुरुषा आयुर्वेद विज्ञानस्य परम विद्वान्सः समभूवन्। श्री पञ्चानन राजवैद्यः पथ्यापथ्य विनिर्णय ग्रन्थस्य प्रणेता आसीत्। पक्षाघात रोगस्य औषधं एतेषां पार्श्वे चमत्कारिकं आसीत्। स्वपुत्राय केशव शर्मं महाभागाय तदौषधमुदिष्ट मस्ति।

समस्तः दिव्यज्योतिः परिवारः पुरुषोत्तम महाभागस्य वियोगेन दुःखितोऽस्ति। पुरुषोत्तमस्य ब्रह्मसायुज्यप्राप्तये पुरुषोत्तमं प्रार्थयते।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०५९ फाल्गुनः ख्रीष्टाब्दः २००३ फरवरी
वर्षम् ४७ अंकः ५

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखीं चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयति कविवरकालिदासः

– आचार्य भगवद्दत्त मिश्रः 'विनयी'

❀❀

कविकुलमुकुटचूडामणिस्त्वं मादृशां चिन्तामणिः
विबुधवाणीवियन्मण्डलदिनमणिः प्रसरत्प्रकाशः ।१।
त्वदीयामरवाणिसेवावर्णने शस्यन्ति देवाः
अल्पसंविल्लधीयो यद् वर्णनेक्व जनावकाशः ।२।
यदीयाप्रतिहा प्रतिभाऽधरी कुरुते बृहस्पतिभाः
मुक्तकण्ठ यस्य गुणिभि र्गीयते सुरगिर्विलासः ।३।
रसगुणालंकारशुभ्रं यस्य काव्यादिकमदभ्रम्
त्वदुपमाक्षत्रे न वाणो नैव हर्षो नापि भासः ।४
हा सुधामपि मुधाकुरुते तवमधुरमृदुकाव्यमरुते
महायात्रावर्णनेऽपि स्पन्दते शृंगारश्वासः ।५।
नैव भारत केवलस्य गौरवं जगतोऽखिलस्य
गायतीदं विदेशीयो पिहित विविधव्याजकाशः ।६।
भारतं भा-रतं जातं येन वसुधातलं भातम्
अर्प्यंते तुभ्यं 'विनयिना' पद्यपुष्पाञ्जलिसुवासः ।७।
समग्रं सौहित्यमयते सुरगिरः साहित्यमिह ते
प्रतियुगं तव यशोगानं गास्यन्ति प्रेम्णेतिहासः ।८।

... — — जयति कविवरकालिदासः

डालटनगंज,
पलामू (झारखण्ड)

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलकापुरीरहस्यम्

– श्रीरमणशर्मा
वेदविज्ञानगुरुकुलम्
जनसेवाविद्याकेन्द्रम्, चन्नेनहलिल
बेङ्गलूरु

पुराणेषु धनदेवतायाः कुबेरस्य राजधानी 'अलकापुरी'-नाम्नी हिमालये क्वचिद् अस्ति इति श्रूयते। तत्रत्यं वैभवं दृष्ट्वा स्वयम् अतिसमृद्धायाः लङ्कायाः अधिपतिः दशमुखः रावणः लोभी सञ्जातः, स्वस्य भ्रातुः कुबेरस्य सकाशात् तां पुरीम् अपहृतवान्. अधुनातने लोके तावत् अलकापुरीसदृशं स्थानं नाम अमेरिका इति सर्वत्र काचित् प्रथा अस्ति। अत्रत्यं वैभवं दृष्ट्वा अस्मदीयाः जनाः सहस्रशः गतवन्तः सन्ति तत्र, सम्पदर्जनार्थम्. किन्तु अमेरिकायाः समृद्धेः वास्तविकं स्वरूपं किम् इति प्रायः बहूनां भारतीयानाम् अविदितम्। तत्र गतवन्तः भवन्तु, तादृश 'सौभाग्य' रहिताः अत्रैव तिष्ठन्तः वा भवन्तु, सर्वेषां मनसि अमेरिकायां विपुला सम्पद् अस्ति इति भावना विद्यते। अत्रस्थाः स्वप्नं पश्यन्ति, तत्रस्थाः सः स्वप्नः फलितः इति भ्राम्यन्ति। किन्तु स्वप्नविषयभूतायाः सम्पदः वास्तविकं स्वरूपम् अज्ञातमेव, यथा शुक्तौ भासमानस्य रजतस्य।

अमेरिकीय 'संस्कृति' विषये अनादरे सत्यपि तत्रत्यायाः आर्थिकव्यवस्थायाः विषये मम असम्यक्त्वभावना पूर्वं नासीत्। किन्तु अतीते नवम्बरमासे तुक्लक्नाम्न्यां प्रसिद्धतमिल् भाषापत्रिकायां प्रकाशितं श्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतः एस्. गुरुमूर्तिवर्यस्य कञ्चित् लेखं पठितवतः मम सुमहान् विस्मयः सञ्जातः। तमेव लेखं समेषां संस्कृतज्ञानां गोचरं कर्तुं तस्य भावानुवादं संग्रहरूपेण अत्र प्रस्तौमि। एतस्य मूललेखकः श्रीमान् गुरुमूर्तिवर्यः राष्ट्रियप्रज्ञावतां न अविदितः यतः सः अत्यन्तं प्रभावी राष्ट्रियविचारप्रस्तोता च। तेन उपस्थाप्यमानेषु विषयेषु सन्देहस्य कर्तव्यता नास्ति। अतः अतिविस्मयावहम् इमं लेखमपि पठित्वा अविश्वासभावं न उपगच्छन्तु इति प्रार्थये।

अमेरिकारहस्यम्

जगति समृद्धतमः देशः इति परिगण्यते अमेरिका। तस्य वर्णनं कुर्वन्तः 'बलिष्ठराष्ट्रम्', 'आर्थिकतायां तन्त्रज्ञाने अन्यथा सर्वथा च अत्युत्कृष्टं राष्ट्रम्' इत्यादिपदपुञ्जानां प्रयोगं कुर्वन्ति जनाः। सम्पद्वत्तायां तत्तुल्याः देशाः न सन्ति इति भाव्यते। तैलराष्ट्राणि (मध्यएशियाभागे विद्यमानानि सौदि-अरेबियाप्रभृतीनि) अपि तन्त्रज्ञानादिदृष्ट्या न तथा प्रगतानि। अधुनातने लोके सम्पदर्जनं कर्तव्यं चेत् अमेरिकां गत्वा एव। सर्वोऽपि बुद्धिमान् युवा बुद्धिमती वा युवतिः सङ्गणकतन्त्रज्ञानं प्राप्य अमेरिकां गत्वा तत्र सम्पदम् अर्जयेत्, सुखेन च जीवेत् इति जनाः चिन्तयन्ति।

एतादृशं गन्धर्वनगरम् अमेरिका। किन्तु धनिकतमत्वेन परिगण्यमाना एषा एव अमेरिका वस्तुतः जगति अत्यधिकऋणवान् देशः! इतरेषां सर्वेषां देशानां संहतम् ऋणम् एकतः, अमेरिकादेशस्य ऋणम् अन्यतः इति स्थापयित्वा यदि तोलयामः, तदा ज्ञायते यत् अमेरिकीयम् ऋणम् इतरसकलदेशऋणापेक्षया बहुकृत्वः भूरि इति। यदि सङ्ख्याविवरणं दीयते, शिरः भ्रमति।

अमेरिकादेशस्य संकलितम् ऋणपरिमाणम् अधुना २, ७५, ०००;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

००, ००, ०००, ००, ००, ००० रूप्यकाणि ! अर्थात् पञ्चसप्ततिसहस्राधिक-लक्षद्वय-कोटि कोटि-रूप्यकाणि । किं विश्वसितुं शक्यम् ? तावन्तः शून्याङ्काः एव विस्मयं जनयन्ति खलु ? प्रतिदिनम् अमेरिकया इतरदेशेभ्यः प्रतिगृह्यमाणम् ऋणं नाम १०, ०० कोटिरूप्यकाणि । एतावत्तं दैनन्दिनम् ऋणसङ्ग्रहणं विना अमेरिकायाः जीवनं न प्रचलति । किञ्च अमेरिका एव कृत्स्ने जगति अधिक-आयातकर्ता देशः । अमेरिकायाः आयातः निर्यातापेक्षया प्रतिवर्षं २, ५०, ००० कोटिरूप्यकाणि अधिकः । तावता आयातेन अपि ऋणमेव वर्धते ।

ऋणप्रतिग्रहहेतुः

ऋणं किमर्थं प्रतिगृह्णाति अमेरिका ? यतः सर्वेऽपि तत्रत्याः जनाः ऋणं प्रतिगृह्णन्ति । तदपि न तथा, यथा अस्मासु कश्चन स्वीयस्य उद्यमस्य आरम्भणार्थं, गृहनिर्माणार्थम् अथवा एतादृशेन कादाचित्केन निमित्तेन वा ऋणं करोति । किं तर्हि ? दैनन्दिनं व्ययं कर्तुमपि तत्रत्याः ऋणमेव गृह्णन्ति ! किं, दैनन्दिनं व्यय कर्तुम् ऋणं प्रतिगृह्णन्ति ? आम् । एतच्च कथम् इति मुञ्जयतया दर्शयामः ।

यदा अस्माभिः उद्यमारम्भणाय गृहनिर्माणाय वा ऋणं वित्तकोशात् प्रार्थ्यते, तदा ते अस्मदीयं वेतनं, प्रकारान्तरेण वा विद्यमानम् आयमूलं, संगृहीतां सम्पदं च परीक्ष्य, 'एतस्मै एतावत् ऋणं दातुं शक्यते' इति निर्णयन्ति । स्वीकृतस्य ऋणस्य परिमाणम् अनुसृत्य तस्य प्रत्यर्पणव्यवस्थापि भवति । सामान्यतः एतावत् ऋणं स्वीक्रियते चेत्, प्रतिमासम् इयदीयत् इत्यनेन प्रकारेण वर्षद्वयाभ्यन्तरे सर्वम् अस्माभिः प्रत्यर्प्यते । किन्तु वयं दैनन्दिनव्ययस्य ऋणं प्रतिगृह्य न कुर्मः ? किं तर्हि ? यावान् वित्तायः तावति एव कञ्चन भागं सङ्ग्रहे स्थापयित्वा कञ्चन भागमेव व्ययीकुर्मः । ते तु दैनन्दिनव्ययम् अपि ऋणादेव कुर्वन्ति । तच्च ऋणं बहुभिः वत्सरैः प्रत्यर्पणीयं भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'क्रेडिट्कार्ड' इति नाम्नोम् एताम् ऋणस्वकारव्यवस्थां सामान्यतः वित्तकोशाः ददति । तदनुसारम् अस्माभिः यावान् व्ययः क्रियते, तावन्तं व्ययं वित्तकोशः विभर्ति, पश्चात् अस्माभिः तत् प्रत्यर्प्यते इति मत्वा। प्रतिमासं च निर्दिष्टपरिमाणेन अस्माभिः वित्तकोशाय कश्चन भागः प्रत्यर्पणीयः । किन्तु एषः 'कश्चन भागः' एव तेन च वस्तुतः न कदापि यावत् अस्माभिः स्वीक्रियते तावत् प्रत्यर्प्यते ।

कौटुम्बिकव्यवस्था, आर्थिकता च

अस्मद्देशे अस्याः व्यवस्थायाः उपयोक्तारः बहुविरलाः । 'तथैव च अस्तु' इति भगवन्तं प्रार्थयामहे । यतः अस्मद्देशे आर्थिकदृष्टिः 'मितव्ययः पर्याप्तसंग्रहश्च' इत्येतादृशी । तत्र च कारणम् अस्मदीया कुटुम्बव्यवस्था एव । अत्र एकः यत् अर्जयति, तत् न केवलं तस्य उदरम्भरणाय, प्रत्युत तदीयानां कलत्रपुत्रादीनाम् अपि जीवननिर्वहणाय । एवं च अस्माकं सामाजिकव्यवस्थायाम् एकेन अर्जितं वित्तं चत्वारः उपजीवेयुः । एतच्च मितव्ययम् अन्तरा न घटते । कर्मकराः भवन्तु, येषाम् अत्यल्पः आयः, उद्यमपतयः वा भवन्तु येषां भूरि आयः, तेषां सर्वेषामपि इदं मितव्ययसूत्रं युज्यते एव । यतः अतिव्ययी निन्द्यते सर्वत्र, सः राजा अस्तु दीनो वा । एवं मितव्ययं कुर्वन्तः एते सर्वेऽपि आपत्कालसम्भावनया वा, कादाचित्कगृहनिर्माणादि-अधिकव्ययनिमित्ततया वा अवशिष्टं वित्तं संग्रहे स्थापयन्ति । एतेन च सर्वस्य सकुटुम्बस्य जीवनम् आर्थिकदृष्टया असन्दिग्धं भवति । एषा एव व्यवस्था भारते, इतरेषु च सामान्यतः प्राच्य एशियादेशेषु । अतः अस्मदीयकुटुम्बव्यवस्थाकारणात् मितव्ययं पर्याप्तसंग्रहं च कुर्वन्तः वयं निश्चयेन दैनन्दिनजीवनाय न ऋणम् अपेक्षामहे।

किन्तु पाश्चात्यदेशेषु व्यक्तिस्वातन्त्र्यस्य अधिकं माहात्म्यम् । तत्रत्या कुटुम्बव्यवस्था सिकताकूपवत् शैथिल्यपराकाष्ठायाम् अस्ति । कुटुम्बस्य आधारभूतौ दम्पती एव दम्पतित्वेन न स्तः, किमुत इतरेषां कुटुम्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

बन्धवानाम् ! स्त्री पुरुषः वा विवाहं विना केनापि कयापि वा सह कियन्तं वा कालं यापयितुं शक्नोति इत्येषा खलु तत्र जीवनशैली । तादृशसम्बन्धात् उत्पद्यमानाः प्रजाः कुतः लालनपालनादि प्राप्नुयुः ? 'एषः मम पुत्रः, त्वम् एतं रक्षितुं नार्हसि' इत्येवमादिरूपेण दम्पतिनाममात्रयुक्तयोः मध्ये न्यायालये विवादः प्रचलति तत्र । तेन च मातापितरौ इत्येवं चिन्तनमेव यत्र नास्ति, तत्र 'मातृदेवो भव, पितृदेवो भव' इत्यस्य वेदवाक्यस्य उन्मत्तावस्थायामपि का प्रसक्तिः ? अतः एव अनाथाः एव अधिकाः तेषु देशेषु । न केवलम् अनाथाश्रमनामकस्थाने विद्यमानाः अनाथाः, प्रत्युत गौरवजीवनाभासं दर्शयन्तः एकचारिणः अपि तत्रत्याः तादृशाः एव । तेन च सकुटुम्बानां पालनं स्वप्नेऽपि चिन्तयितुम् अशक्यं तैः ।

भवन्तः जानन्ति किं यत् विश्वे घनिकतमत्वेन परिगण्यमाना अमेरिका वस्तुतः जगति अत्यधिकऋणवान् देशः । इतरेषां सर्वेषां देशानां संहतम् एकतः, अमेरिकादेशस्य ऋणम् अन्यतः इति स्थापयित्वा यदि तोलयामः, तदा ज्ञायते यत् अमेरिकीयम् ऋणम् इतरसकलदेशऋणापेक्षया बहुकृत्वः भूरि इति !

(प्रासङ्गिकरूपेण एतदुपोद्बलकरूपेण च पाश्चात्यदेशाः एतादृशानाम् अनाथानां रक्षणे कियत् वित्तं व्ययीकुर्वन्ति इत्येतत् पश्यामः । पुत्रपौत्रादिकर्तव्यं वृद्धानाम् अशक्तौ पालनं तत्र सर्वकारस्य शिरोभारः । प्रजाभिः अकृतं 'सर्वं कुर्यात्' खलु 'सर्व – कारः !' ततः तादृशानाम् अनाथानां निमित्तं सर्वकारेण 'समाजभरणधनम्' इति नाम्ना वित्तं दीयते । एतस्य च परिमाणं श्रूयताम्–अमेरिकादेशे समग्रस्य राष्ट्रिय-आयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०%, इंग्लेण्ड्देशे ४८%, फ्रान्स्देशे ४९%, जर्मनीदेशे ५६%, स्वीडन्देशे ६५% ! किञ्च अन्यदपि अस्ति यत् २००१ तमक्रिस्ताब्दस्य एप्रिलमाससमये स्वीडन्-देशस्य सर्वकारः एकां व्यवस्थां प्राकल्पयत् '५८ वर्षापेक्षया अधिकं वयः येषां, ते स्वसाहाय्यार्थम् एकं साहाय्यकं नियोक्तुम् अर्हन्ति, तस्य साहाय्यकस्य वेतनं सर्वकारेण दीयते' इति ! तन्निमित्तं पुनरपि भूयान् एव व्ययः भवतीति किं वक्तव्यम् ?)

कुटुम्बव्यवस्थाह्रासात् जायमानं फलम्

एवं च इतरेषां स्वसपिण्डानामपि विषये चिन्तां अकुर्वन्तः जीवन्ति ते । कस्य अन्यस्य रक्षणाय मितव्ययं कुर्युः, किमर्थं वा सञ्चयं कुर्युः ? तर्हि अमेरिकायां के वा वित्तं संगृह्णन्ति इति चेत्, भारतीयाः ये तत्र निवसन्ति ते, अन्ये च प्राच्य-एशियादेशीयाः । इतरेषां विषये तु –

यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् ।
भस्मी भूतस्य देहस्य पुनरागमनं कुतः ।।

इत्येषः चार्वाकमतानुवादकः श्लोकः एव आत्मानं मनसि श्रावयति । भेदस्तु पाश्चात्यदेशे घृतं न पिबन्ति इति । देहश्च न भस्मीक्रियते इति । ते च देहान्तरे न विश्वसन्ति इति च । अतः उचितरूपेण 'सुरा पिबेत्' इति, 'प्रस्तब्धहृदये देहे' इति च परिवर्त्यंताम् । विवक्षितार्थस्तु उभयथा ज्ञायते एव ।

अतः ते सुखजीवनार्थं भूयोभूयः द्रविणं कामयमानाः समुद्रे म्रियमाणः काष्ठं यथा तथा क्रेडिट्कार्ड्-व्यवस्थां गृह्णन्ति, आतृप्तिं व्ययं कुर्वन्ति च । (हन्त, मयो आतृप्तिं इति दुर्लिखितम् । तृप्तिः इति का सा पदार्थं ? अश्रुतपूर्वः खलु ?) एतादृशव्ययकर्तृभ्यश्च वित्तकोशेन धनं दातव्यम् । किन्तु कुतः दद्युः ते ? यतः एते वित्तकोशे धनं न संगृह्णन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि अन्यतः ऋणं स्वीकृत्य 'रामात् ऋणं प्रतिगृह्य कृष्णाय ऋणं प्रत्यर्पयति' इतिवत् एभ्यः दातव्यम् एताभिः संस्थाभिः।

तस्मादेव प्रतिदिनम् अमेरिकादेशः १०,००० कोटिरूप्यकाणि इतरदेशेभ्यः प्रतिगृह्णाति। एतत् उपयुज्य ते व्ययं कुर्वन्ति, तदर्थं पुनः व्ययः। लवणार्थं वित्तम् अपि ऋणतया एव तैः ग्रहीतव्यम्। 'भूयोऽव्ययकर्ता देशः' इत्येतावन्मात्रं दृष्ट्वा 'धनिकदेशः' इति महत् नामधेयम् अमेरिकायै दीयते इतरैः। किन्तु अमेरिकया व्ययीक्रियमाणं वित्तं कुतः आगच्छति? ऋणदातृदेशेभ्यः। के ते ऋणदातारः देशाः? येषु देशेषु जनाः एतादृशम् अतिव्ययं न कुर्वन्ति ते। तच्च कुटुम्बव्यवस्थाकारणात्। ते च जपान्, चीना भारतम् इत्यादयः।

किम्? भारतेन अमेरिकायै ऋणं दत्तम् अस्ति? आम्। भारतेन अमेरिकायै दत्तम् ऋणं प्रायः २,६०,०००,००,००,००० रूप्यकाणि, अर्थात् षष्टिसहस्राधिकद्विलक्षकोटिरूप्यकाणि। तावता परिमाणेन अमेरिकासर्वकारस्य मान्यपत्राणि (securities) भारतेन क्रीतानि सन्ति। इयमेव अस्माकं ६०,०००,०००.०००. (६० बिल्लियन्) डालर्-आत्मिका अन्तराष्ट्रियसम्पत् (foreign exchenge)। चीनदेशेन अमेरिकायै १५,००,०००,००,००,००० (१५ लक्ष-कोटयः) रूप्यकात्मकम् ऋणं दत्तम् अस्ति। किन्तु प्राधान्येन अमेरिकायै ऋणं ददत् वर्तते जपान् एव।

ग्राहकाय ऋणम्

बहवः प्राच्य-एशियास्थाः एव देशाः अमेरिकायै ऋणं ददतो वा निर्यातं कुर्वन्तो वा तत्र उद्यमस्वाम्यं (foreign investment) प्राप्नुवन्तः वा सन्ति। प्रत्येकमपि देशः अमेरिकायै एतैः प्रकारैः वित्तं प्रयच्छन् अस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र प्रथमं जपानदेशस्य विषयं परिशीलयाम । विश्वे अधिकम् अर्जि. तवान् देशः जपान् एव । तत्रत्याः अर्जितं सर्वं धनं वित्तकोशे अन्यत्र वा सुरक्षितं कृत्वा स्थापितवन्तः सन्ति । तैः संगृहीतं धनं कियत् इति जानन्ति किं भवन्तः ? अमेरिकायाः ऋणं यावत् तस्य द्विगुणितं जपानदेशेन सम्पादितम् अस्ति । जपानीयैः एतावत् वित्तं संगृहीतम् इत्यत्र कारणं न अस्माकं विस्मयावहम् । वयमिव तेऽपि कुटुम्बव्यवस्थायां कौटुम्बिकानुशासने च जीवन्ति । न तु ते स्वैरचारिणः । (इदमपि पाश्चात्यीकरणवशात् परिवर्तमानम् अस्ति, किन्तु सम्प्रति स्थितिः न तावती शोककरी ।) तस्मात् ते मितव्ययसूत्रं संग्रहसूत्रं च अनुसरन्ति । तस्मात् तेषां सम्पादनं बहु ।

अत्र इदं द्रष्टव्यम् । जपानदेशेन एतावत् सम्पादितम् इत्यत्र मूलकारणमपि अमेरिकादेशः एव । अमेरिका जपानदेशात् बहुविधान् अल्पोपयोगिनः अपि पदार्थान् आयातयति । न केवलं जपानदेशात्; चीना, कोरिया, तैवान्, सिङ्गापूर्, मलेशिया-इत्यादिभ्यः अपि देशेभ्यः अमेरिका नानाविधानि वस्तूनि आयातयति । एते च देशाः प्रायः सर्वेऽपि अमेरिकायाः व्ययीकरण 'क्रयणशक्तिम्' एव उपजीवन्ति । तद् उपयुज्य एव तैः स्वस्वदेशः समृद्धिं नीतः । किन्तु एतत् अमेरिकाम् अधमर्णीकृत्य एव । एतेभ्यः वस्तूनि आयातयन् अमेरिकादेशः तेभ्यः धनं ददाति, तच्च धनम् ऋणरूपम् । अमेरिकायै ऋणं यच्छन्ति च एते एव देशाः ।

जपानदेशेन अमेरिकायै क्रियमाणः निर्यातः आयातापेक्षया प्रतिवर्षं ४,००,०००,००,००,००० (चतुर्लक्षं कोटयः) रूप्यकाणि यावत् अधिकः। संहृत्य च सर्वेभ्यः देशान्तरेभ्यः अमेरिकया क्रियमाणः आयातः निर्यातापेक्षया प्रतिवर्षं २०,००,०००,००,००,००० (विंशतिलक्ष कोटयः) रूप्यकाणि अधिकः। एवं तर्हि सर्वेभ्यो देशेभ्यः अमेरिकया प्रत्यर्पणीयं वित्तं प्रतिवर्षम् एतावत् ! तर्हि तेभ्यः दातुम् अमेरिकया एतावत् वित्तम् अपेक्ष्यते । तच्च कुतः आगच्छेत् ? ऋणस्वीकारात् एव । अनया दृष्ट्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमेरिकया यावत् जपानदेशाय देयं, तत दातुम् अपि अमेरिका जपान् देशात एव ऋणं प्रतिगृह्णाति । चित्रम् इदं, यत् आपणिका स्वस्मात् वस्तु क्रेतुं ग्राहकाय स्वयम् ऋणं ददाति !

प्रापञ्चिक-आर्थिकता-'सुस्थिति'-हेतुः

अत्रैव ज्ञायते, प्रापञ्चिक-आर्थिकसमृद्धेः रहस्यं किमिति । अद्य जागतिक-आर्थिकतायाः 'सुस्थितौ' मूलकारणम् अमेरिकीयानाम् अतिव्ययकरणम् एव । ते आवश्यकताम् अनावश्यकतां वा अपश्यन्त. ऋणं स्वीकृत्यापि स्वदेशस्य विदेशस्य वा वस्तूनि क्रीणन्तः एव भवन्ति इत्येतत् एव भूमण्डलस्य आर्थिक—'कल्याण' हेतुः । यदि अमेरिकीयः वस्तूपभोगः (consumption) न्यूनः भवति, तर्हि ये ये देशाः अमेरिकायं स्ववस्तुनिर्यातनम् एव आश्रित्य दैनन्दिनं भोजनं कुर्वन्ति, तेषां का गतिः स्यात् ? वस्तूपभोगन्यूनतया न केवलम् अमेरिकीया आर्थिकता ह्रासं गच्छेत्, प्रत्युत एतेषां देशानाम् अपि । केचन बिभ्यति यत् जागतिकी आर्थिकता एव तेन कारणेन कम्पिता भवेत् इति ।

अमेरिकाम् उपजीवन्तः प्राच्य-एशियादेशाः

एवं च स्वीयां क्रयणशक्तिम् (क्रयणव्यसनं वा) उपयुज्य एव अमेरिका सर्वान् एतान् देशान् स्ववशे करोति । यतः, स्वस्वदेशाभिवृद्धयर्थं सर्वे अमेरिकायाः आर्थिकसुस्थितिं, ततः तत्रत्यानां क्रयणप्रवृत्तिं च वर्धयितुम् उत्सुकाः । जपान् एव च अत्र निपुणतमः उत्सुकतमश्च देशः । अमेरिकायाः क्रयणप्रवृत्तिं वर्धयितुं ते अमेरिकायं एव ऋणं दातुम् अपि सज्जाः सोत्सुकाश्च । धनहीनाय अमेरिकादेशाय कोऽपि ऋणं ददाति चेत् खलु, सः देशः वस्तुक्रयणे प्रवृत्तो भवेत् ? तस्मात् एते अमेरिकायं वित्तं ददति । किन्तु ऋणं दत्त्वा तैः अमेरिका एव उपजीवनीया भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतत् अधिकृत्य भारतीयरिसर्व-वित्तकोशस्य भूतपूर्वाध्यक्षेण एस्. वेङ्कट-रमणवर्येण उक्तम्-'कश्चन एककोटयात्मकम् ऋणं प्रतिगृह्णाति चेत् सः दातरि विश्वस्यात्। किन्तु स एव सहस्रकोटयात्मकम् ऋणं प्रतिगृह्णाति चेत्, दात्रा तस्मिन् विश्वासः कर्तव्यः भवति' इति।

नूतनः आर्थिकव्यवस्थावादः

कियन्तं वा कालम् एवमेव अनुवर्तेत, यत् अमेरिका भूयोभूयः अधमर्णः सञ्जायमानः एव भवेत्? कियन्तं वा कालम् एषा अनर्थध्रुवपर्यवसायिनी क्रीडा प्रचलेत्? भगवान् एव जानाति। यदि अमेरिकायाः आर्थिकतायाः पतनं भवेत्, तर्हि किं स्यात् इति कल्पनां कर्तुम् अपि न प्रभवेम।

एवं सति भूयोभूयः अपरिमितं व्ययीकरणम् इत्येतत् आर्थिकसूत्रत्वेन अवधारयितुम् अयुक्तम् इति स्फुटमेव प्रतिभासते चेदपि ईदृश्याः व्यवस्थायाः एव अनुकरणं बहवः समृद्धिपथं मन्यन्ते। प्रपञ्चीकरणसिद्धान्तः (globelisation) 'सरलीकरण' सिद्धान्तः (liberalisation) निर्यातप्रेरिता आर्थिकता (exportdriven economy) इत्यादयः वादाः अधुना अत्रापि आनेतुम् इष्टाः प्रगतिवादिनाम्। अस्मदेशीयाः वित्तमन्त्रिणः अपि एतदेव पुरस्कुर्वन्तः सन्ति। 'पाश्चात्यदेशानां सिद्धान्तान् अनुसृत्य एव अस्मदेशे आर्थिकसमृद्धिः सम्पादनीया' इत्येषा मतिः प्रशिक्षितेभ्यः आरभ्य पामरजनपर्यन्तम् अपि प्रचारं गता विद्यते। अस्मिन् प्रचारे अस्मदेशीयाः बुद्धिजीविनः आर्थिकविद्वांसः, राजकीयाधिकारिणः, पत्रिकाकाराः चेति एते सर्वे भागभाजः। किन्तु एतत् सर्वम् अस्मदेशस्य न युज्यते इत्यत्र अस्मदेशीया संस्कृतिः कौटुम्बिकता आर्थिकव्यवस्थापरम्परा एव च हेतुः।

अत्र एकां घटनाम् उदाहर्तुम् इच्छामः। १९९२ तमे वर्षे अस्माकं देशः यदा आर्थिकदुःस्थितौ क्लेशम् अनुभवन् आसीत्, तदा सर्वकारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमेरिकादेशात् डा० जगदीशभगवतिनामानम् आर्थिकव्यवस्थानिपुणम् आकारयत् । तं च दुःस्थितिपरिहाराय उपायान्वेषणे प्रार्थयत अत्रत्यां स्थितिम् अवेक्ष्य जगदीशवर्यः पञ्चाशत्पुटात्मकम् एकम् उपदेशात्मकम् उत्तरं प्रादात् । तत्र लिखितम आसीत् —'भारतीयाः अनपेक्षिततया वित्तसङ्ग्रहं कुर्वन्ति । तथा अकृत्वा ते व्ययं कुर्युः । तत्र ते चोदनीयाः । विदेशेभ्यः वनितालङ्करणसाधनानि (cosmetics) अन्याश्च आकर्षकान् पदार्थान् आयातयन्तु । जनाः च एतान् पदार्थान् यथा क्रीणीयुः, तथा तान् चोदयन्तु । एवं क्रियते चेदेव आर्थिकसमृद्धिः भविष्यति' इति । एतत् श्रुत्वा सञ्जातवेपथुः भारतीयसर्वकारः जगदीशवर्यस्य प्रतिप्रेषणेन धन्यम् आत्मानम् अमन्यत ।

नूतन्याः आर्थिकव्यवस्थायाः प्रथमसूत्रं 'सङ्ग्रहं मा कुर्वन्तु ! व्ययं कुर्वन्तु ! ऋणं कृत्वा वा व्ययं कुर्वन्तु ! तदेव आर्थिकसमृद्धिं' इत्येतत् कियत् फलदायि इति तु अमेरिकानाम्याः आधुनिक-अलकापुर्याः साम्प्रतिकस्थितिवीक्षणादेव ज्ञायते । एवं सति अस्मदेशीयाः बुद्धिजीविनः मादृशान् दृष्ट्वा आक्षिपन्ति-'सर्वोऽपि लोकः प्रगतिं प्राप्नुवन् अस्ति । भवन्तः किमर्थम् अस्मदेशं प्रगतिविरुद्धपथे विप्रकर्षन्ति ? इति । हन्त ! एते चक्षुष्मन्तोऽपि अन्धाः । किं वक्तव्यं तेभ्यः ?

अलकापुरमाहात्म्यं ज्ञात्वा कुर्वीत यः सुधीः ।
मितव्ययं सङ्ग्रहं च योगक्षेमौ स विन्दति ॥

—:★★:—

(संभाषणसंदेशस्य फवरी २००३ अंकात् साभारम्)

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाम्यं हृतं हा, कुटिलैर्विदेशैः

— जनार्दनः

प्रायः गायत्रीमन्त्रस्य द्रष्टा विश्वामित्रः न जानाति स्म यत् कलियुगे कदाचित् स च मन्त्रः अपहृतः भवेत् इति ।

वेदानां विभागं कृतवान् वेदव्यासोऽपि न जानाति स्म गायत्री वेदः वा अपहृतः भवेत् इति ।

वेदरक्षणाय घन-जटा-पदादिपाठान् चिन्तितवन्तः ऋषयः अपि न जानन्ति स्म गायत्री अपहृता भवेत् इति ।

विविधापराधानां कृते दण्डं विहितवन्तः स्मृतिकाराः अपि न जानन्ति स्म-मन्त्रः कोऽपि अपहृतः भवेत् इति ।

किं प्राचीनानां विषये चिन्तनेन ? दशसहस्राधिकवर्षाणि यस्याः जपः कृतः तस्याः गायत्र्याः स्वाम्यम् अपहृतं भवेत इति आधुनिकः कोऽपि अपि न जानाति स्म ।

वस्तुतः तु मन्त्रः कोऽपि अपहर्तुं शक्यः इत्येषा कल्पना एव केनापि न कृतप्रायः अद्यावधि ।

'ॐ भूर्भुवस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचोदयात्' इति गायत्रीमन्त्रस्य उच्चारणम् इतः परं विधि (law) विरोधाय भवेत् !!

अत्र कारणम् जर्मनीया 'संहिता' नामिका संस्था गायत्र्याः 'स्वाम्यं' स्वायत्तीकृतवती अस्ति एषु दिनेषु ।

तया एव संस्थया १९९८-१९९९ तमे वर्षे 'वास्तु' विषयकं स्वाम्यम् अपि स्वायत्तीकृतम् अस्ति ।

'वेद' स्य स्वाम्यं स्वायत्तीकृतम् अस्ति १९८४ तमे वर्षे जर्मनीयैः ।

'एवं गायत्री-वास्तु वेदादीनाम् इव अन्येषां ४० प्राचीनभारतीय-परिकल्पनानाम् अपि स्वाम्यं स्वाधीनीकृतवन्ति सन्ति जर्मनीयानि कानिचन सङ्घटनानि' इति श्रूयते । अतः वातपित्त कफादीनाम् अपि स्वाम्यं पञ्जीकृतम् अस्ति जर्मनीदेशे ।

वास्तुस्वाम्यं यया पञ्जाकृतं सा संहिता-नामिका संस्था अस्ति महेशयोगिभक्तानाम् । ते यदा वेदायुर्वेदयोः पञ्जीकरणाय उद्युक्ताः तदा ज्ञातं यत् तादृश पञ्जीकरणम् इतः पूर्वम् एव अन्यैः कृतम् इति । तस्मात् तैः 'महर्षिवेदः' 'महर्षि-आयुर्वेदः' इति पार्थक्येन पञ्जीकरणं कारितम् । महेशयोगिना प्रतिपादितं यत् मया आयुर्वेदस्य अन्यासां प्राचीनौषधि-परिकल्पनानां च गवेषणं कृतम् इति ।

जर्मनीयेन वास्तुविदा मार्सस् स्किमैकेन यदा 'वेद अकादमी' संस्थापनाय प्रयासः आरब्धः तदा कयाचित् संस्थया सूचना प्रेषिता यत् १९८४ तमे वर्षे एव वेदशब्दस्य पञ्जीकरणं जातम् इति । अतः स्किमैकः स्वस्य संस्थायाः नाम वेदन्-अकाडमी' इति कारितवान् । तेन 'Vastu The Indian Origin of Feng Shui' इत्येतत् पुस्तकं १९९८ तमे वर्षे यदा लिखितं तदा 'संहिता' संस्थया आक्षेपसूचकं पत्रं प्रेषितम् । तस्मात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन विक्रयणाय आपणेषु स्थापितानि सर्वाणि पुस्तकानि प्रतिस्वीकृतानि।

गायत्रीमन्त्रस्य स्वाम्यं येन पञ्जीकृतं सः वदति यत्—'कस्यापि पीडनाय मया एवं न पञ्जीकृतम्, अपि तु अन्ये मां न पीडयेयुः इति उद्देशेन कृतम्' इति।

एते सर्वे अंशाः वास्तुशास्त्रसंस्थायाः निर्देशकेन अश्विनीबन्साल्-वर्येण प्रकाशिताः। 'भारतीयकूटयन्त्राणां स्वाम्यम् अपि जर्मनीदेशे पञ्जीकृतम् अस्ति' इति वदति सः। 'भारतीय संस्कृतेः वाणिज्यलाभं यथा आये प्राप्तुं न शक्नुयुः तथा सर्वकारः अभ्यर्थ्यते मया, विश्वबौद्धिक सम्पत्तिसङ्घटनं [World-Intellectual Property Organisation (Wlpo)] प्रति अपि आक्षेपपत्रं दीयते' इति सः उक्तवान् अस्ति।

बन्साल्वर्यः विश्वबौद्धिकसम्पत्तिसङ्घटनस्य न्यायनिर्णायकसदस्यः अस्ति। यदा रतनटाटा, जे. आर्. डि. टाटा इत्यादयः अष्टसंस्थाः भारतात् बहिः नामस्वाम्यं पञ्जीकर्तुम् उद्युक्ताः तदा तासां प्रयत्नं विफलीकृतवान् आसीत बन्साल्वर्यः। अन्याः विदेशीयसंस्थाः कश्चन यदा भारतीयस्य नाम्नः स्वाम्यं विदेशे पञ्जीकर्तुं प्रयासं कृतवत्यः तदा अपि स्वविरोधप्रकाशनेन तासां प्रयत्नं विफलीकृतवान् आसीत् सः।

बासमतीतण्डुलः, निम्बः, कारवेल्लम्, योगः, सिद्धिः इत्यादीनां स्वाम्यम् इतः पूर्वं भारतात् अन्यत्र पञ्जीकृतम् अस्ति एव। इदानीम् आयुर्वेद-वेद गायत्र्यादीनाम् अपि स्वाम्यस्य पञ्जीकरणं साकाश्यं विश्व-वाणिज्यसन्धेः अङ्गीकारस्य कुफलानि एतानि। प्रबलानां राष्ट्राणां स्वेच्छाप्रवृत्तेः पोषणाय विश्ववाणिज्यसन्ध्यादयः रूपिताः इति वयं जानीमः एव। एतस्य परिणामतः न ज्ञायते, इतोऽपि किं किं सम्भवेत् इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतस्य अवरोधः किं न शक्यः ? अशक्यः तु न । मार्गः अस्ति एव 'एतद्विरोधेन न्यायालयं प्रति गमनम्' इति । किन्तु एवं 'गमनं' न सुलभ-साध्यम् । एतत्क्षेत्रीयाः परिणताः वदन्ति—'न्यायालयं प्रति गमनं नाम महासाहसकार्यम् । एतदर्थं यः आर्थिकव्ययः करणीयः तं वोढुं टाटाबिर्लाप्रभृतयः संस्थाः अपि कदाचित् न शक्नुयुः । सर्वकारः अपि एतस्य महाभारस्य वहने क्वचित् असमर्थः भवति । अन्यच्च न्यायनिर्णायकाः अपि प्रायः विदेशीयाः एव भवन्ति । तैः क्रियमाणः न्यायनिर्णयः प्रायः तदनुकूलः एव भवति इति पुनर्वक्तव्यं नास्ति' इति ।

एतस्मिन् स्वाम्यपञ्जीकरणप्रसङ्गे चिन्तनीयम् अन्यत् अस्ति । महेशयोगीयाः स्वकृत्यं समर्थयन्तः वदन्ति—'सजीवस्य जनस्य अङ्गानां स्वाम्यम् अन्येन स्वायत्तीकर्तुं न शक्यते । किन्तु मृतस्यैव तस्य अङ्गानां स्वाम्यम् अन्यः स्वीकर्तुं शक्नोति एव । एवमेव संस्कृतविषये अपि । सा तु मृता भाषा । तस्याः शब्दानां तत्रत्यानां परिकल्पनानां च स्वाम्यम् अन्येन स्वीकर्तुं शक्यन्ते एव । अतः वयं वास्त्वादीनां स्वाम्यं पञ्जीकृतवन्तः' इति ।

तेषाम् एतां धाष्ट्यंप्रवृत्तिं पश्यन्तु तावत् । संस्कृतं मृता भाषा इति घण्टाघोषं कथयन्ति खलु ते ? किं लज्जा न भवति तेषाम् । किम् अन्धाः ते ? किं ते संस्कृतजगतः कार्यजातं द्रष्टुं न शक्नुवन्ति ? आकाशवाणी-दूरदर्शनादिषु वार्ताप्रसारः, सज्जनात्मकानाम् असंख्यानां पुस्तकानां प्रतिवर्षं प्रकाशनम्, भाषात्वेन कोटिशः जनैः क्रियमाणम् अध्ययनाध्यापनं, शास्त्राध्ययनं, शास्त्रचर्चां, कोटयधिकैः दैनन्दिनजीवने क्रियमाणं सम्भाषणम् इत्यादिकं किं ते न जानन्ति ?

स्वाम्यापरणादीनि कृत्यानि इतोऽप्यधिकानि भवेयुः भाविनि काले । जागरूकैः भवितव्यम् अस्माभिः जनैः सर्वकारैः च । कस्य स्वाम्यस्वीकारात् कीदृशाः लाभाः प्राप्तुं शक्याः इति ते स्वाम्यस्वीकर्तारः जानन्ति । तेषाम् उद्देशः अवगन्तव्यः । काले विरोधोऽपि प्रकाशनीयः ।

(विविधेभ्यः मूलेभ्यः विषयः सङ्गृहीतः)

(संभाषण सन्देशात् साभारम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्यास्ते

– आचार्य केशवराम शर्मा
दिव्यदीप, सोलनद्द हि. प्र.

❀❀

धन्यास्ते भुवि ये विनश्वरमिदं ज्ञात्वा प्रपञ्चं खिलं
कूटस्थे चिति चित्तमात्मनि सदा संवेश्य याताश्रमम् ।
द्वन्द्वातीतमनः स्थितावविचलं सौख्यामृतं भुञ्जते
स्वात्मानं च जगच्च नित्यविमलाः संपावयन्ति स्वतः ।।
ते धन्याः पश्यमेश्वरं प्रतिकणं पश्यन्ति येऽनुक्षणं
स्वात्मानन्दसरोविहार निरता हंसाः प्रशंसास्पदाः ।
संसारे समदृष्टयो निजपरप्रज्ञामतीत्य स्थिता—
स्तेषां पावन पादपद्मसुरभेरामोदिता मेदिनी ।।
येषां प्रेम परेश्वरेऽथ करुणा दीनेषु च प्राणिषु
हर्षः सत्सु दया द्विषत्सु नितरां भोगेषु निष्कामता ।
सम्माने विरति र्धृतिश्च विषमे निष्ठा जगन्मङ्गले
ते धन्याः कृतिनः सृतिं हि महतां ये चास्थिताः सर्वथा ।।
मायामोहमयादसत्यजगतः प्रत्याहृतं यैर्मनो
धारावाहिकता चिदात्मनि परे नीताश्च यैर्वृत्तयः ।
अन्तर्नादमहासुखभुजो विभ्रान्तितृष्णात्यज—
स्ते धन्याः प्रतिपूरिता जगति ये यांत्रा मृषाक्लेशदा ।।
साम्यं न च्यवते निरूममनसां त्यक्कारसम्मानयोः
स्नाता धूलिमिव त्यजन्ति खलु ये भोग्यप्रपञ्चं क्षरम् ।
ब्रह्मानन्द महोदधौ निमग्नजनुषो विप्लुष्टबन्धेन्धना
धन्यास्ते भवपाशनाशविशदा स्वातन्त्र्यसौख्यस्पृशः ।।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीतद्वयी

हे मातः सरस्वति

(घनाक्षरी छन्दः)

ज्वलद् गृहं वीक्ष्य शवानां गृहस्य मध्य एव,
कीदृशी कुबुद्धिः काऽपि चिन्ता क्रियते कथन्न ?

स्वीयपरिवारजन-क्रन्दनमाकर्ण्य परं—
हृदयविदारकं हा ! तद्वा त्यज्यते कथन्न ?

सर्वदा समस्त विश्वशिक्षकैः दृढव्रतैश्च
हीनतां विहाय शौर्यमद्य धार्यते कथन्न ?

भूरि वित्तलिप्सया स्वदेशद्रोहलीनभ्योऽद्य
भारति ! स्वपुत्रेभ्यः सुबुद्धि र्दीयते कथन्न ?

★★

जय जय दुर्गे

जय जय दुर्गे दुष्टविनाशिनि ।
जय सज्जन-हृत्कमल-विकासिनि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१

चतुर्दिक्षु विचरन्ति राक्षसा हन्त ! साम्प्रतं भारतदेशे
एते मादयन्ति तत्र भक्तान्, शान्ता कथमसि चण्डविघातिनि।

२

यदा यदैव धरण्यामस्यां बर्धिष्यन्ते खलकृतबाधा।
हनिष्यामि चागत्य शत्रुमिति' निजवचनं स्मर हे वाग्वादिनि।

३

वार्ताभिर्नहि कथमपि शाम्यति, यस्तु भवति निर्लज्जः शत्रुः,
अधुना तद्बध एषोपायः, सोत्साहान् ना कुरु बलशालिनि।

४

कृपां प्राप्य तव वयमपि मातः ! सततं युद्धार्थं सन्नद्धा।
अस्माकं हस्ते विजयो यदि, पार्श्वे गर्जसि सिंह-निनादिनि।

— डा० शिवशरण शर्मा
५१-विनयनगर, सेक्टर-१
जेलरोड, ग्वालियर (म०प्र)
४७४०१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकार्यक्रमः सम्पन्नः

खोरीलखीमपुरम्, ४-१-०३। 'श्रीभुइयां मातामन्दिर समिति:' इत्याख्यसंस्थाया: तत्वावधाने गतवर्षेष्विव अस्मिन् वर्षेऽपि मातृमन्दिरस्य वार्षिकोत्सवमुपलक्ष्य अष्टदिवसीयेषु प्रचलत्सु विविधकार्यक्रमेषु अद्य डा० कृष्णकुमार श्रीवास्तवमहोदयस्य अध्यक्षतायां छात्राणां संस्कृतश्लोकपाठप्रतियोगिता सम्पन्ना। प्रतियोगितायां प्रायेण पञ्चाशच्छात्रच्छात्रा: भागमग्रहीषु:। तत्र पञ्चमकक्षापर्यन्तप्रति योगितायां छात्रेषु श्री विश्रुत कुमार:, छात्रासु च दीपांशुतिवारी तथा अष्टमकक्षापर्यन्तप्रतियोगितायां छात्रेषु विनय वाजपेयी, छात्रासु च कु० श्वेता सिंह प्रथमं स्थानं प्राप्नुवन् चतुर्वर्षीयौ श्रीशाश्वत कुमार श्रीशोभितकुमारौ यमलौ शिशू स्वयमेव भेरीमञ्जीरवादनपूर्वकम्—

'आभातिभारतमाता भवानीरूपा त्रिभुवने'। इत्यादिगीतं प्रगीय जनमना समनन्दितवन्तौ पुरस्कारं च प्राप्तवन्तौ। कु० मुदिता लोकगीत लये—

'कालिन्दीतटे कलकुञ्जे प्रियं भर राधावरम्। शिरसा दधानं मुकुटं सुकण्ठे मालां मनोहारिणीम्, हे सखि ! मालां मनोहारिणीम्। अङ्गे च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्ये कौशेयमच्छपुण्यं सुपीताम्बरम् इत्यादिगीतं प्रगीय श्रोतृणां प्रशं. साभर्जितवती, विशिष्ट पुरस्कारं च प्राप्तवती।

अस्मिन्नवसरे कार्यक्रमसंयोजकस्य आचार्य बाबूराम अवस्थिना प्रतिनिधत्वेन उपस्थितः सपरिवारः श्री विजय कुमार तिवारी उक्तवान् यत् छात्राः संस्कृतश्लोकान् कण्ठस्थी कुर्वन्तु शुद्धमुच्चारयन्तु चेति। अध्यक्षमहोदयः श्रीभृग्यां मातुर्गुणगानं कुर्वाणः आचार्य बाबूराम अवस्थिनः संस्कृत सेवां प्रशंसितवान् समिति सदस्येभ्यः साधुवादं च दत्तवानिति शम्।

संस्कृतात् संगीतोद्भवः

दिल्ली संस्कृत अकादम्याः संस्कृतकाव्यालिप्रतियोगिता २९-११-२००३ तिथौ श्यामाप्रसादमुखर्जी महाविद्यालये समायोजिता। दिल्लीप्रदेशस्य १५ महाविद्यालयछात्राः अत्र भागः गृहीतः। सर्वैः प्रतिभागिभिः शोभनप्रदर्शनमकारि। अस्यां प्रतियोगितायां दौलतराम कालेजछात्राभिः प्रथमस्थानं प्राप्तम्। इन्द्रप्रस्थमहाविद्यालयेन द्वितीय स्थानं जितम्। श्यामाप्रसाद मुखर्जी महाविद्यालयः तृतीयस्थाने स्थितः। विजेतृदलेभ्यः रु० ८००/, रु० १५००/, रु० १२००/, रु० ९००/, रु० ६००/, पुरस्काराशिः प्रदत्तः। अन्यप्रतिभागिदलेभ्योऽपि प्रोत्साहनसान्त्वनापुरस्काराः प्रदत्ताः।

श्यामाप्रसाद मुखर्जी कालेजस्य प्राचार्यया डा० सुरजीत कौर जौली महाभागया कालेऽस्मिन् भणितम्—"संस्कृतभाषा साहित्यस्य अद्यतनीयप्रगतिशील अर्थं व्यवस्थायां सुदृढस्तम्भरूपेण चर्चा भवति। संगीतञ्च संस्कृतसाहित्य अंगभूतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकादमी सचिवः श्रीकृष्णसेमवालः प्रावोचत् यत् संस्कृतस्य सम्पर्कभाषारूपेण प्रयोगः स्यात्तु भाषायाः भविष्यमत्युज्वलं स्यात् । एतत्कार्यकरणे च छात्राः महत्वपूर्णं योगदानं कर्तुमर्हन्ति । समारोहेऽनेके गण्यमान्यः जना अपि उपस्थिताः आसन् ।

संस्कृतभाषा वैज्ञानिकभाषा

– डा० कमल आनन्द

दिल्लीसंस्कृत अकादम्याः ३०-११-२००२ दिने स्वीयभवने झण्डावालास्थाने छात्राणां कृते संस्कृतवादविवाद प्रतियोगिता समायोजिता । अत्र मुख्यअतिथिरासीत् डा० कमल आनन्द लक्ष्मीबाई कालेजस्य संस्कृतविभागाध्यक्षा । सा कथितवती यत् कापि भाषा भवेत् समाजस्य कियदुपकारं कृतवती इति विचार्य एव तस्या श्रेष्ठता भवति । भाषावैज्ञानिकैः विश्वभाषाणां वर्गीकरण कृतम् । तत्र संस्कृतस्य श्रेष्ठतमस्थानमस्ति । वादविवादप्रतियोगिताभिः छात्राणां मानसिकविकासे महती वृद्धिर्भवति ।

अकादमी सचिवः श्रीकृष्णसेमवालः आह–प्राविधिकप्राद्योगिक युगे संस्कृतभाषायाः उपयोगिता सर्वाधिका । यतोहि संस्कृतभाषायाः वेदाः विज्ञानस्य, संगणकं गणितस्य, दर्शनानि परमाणुविज्ञानस्य, ज्योतिषं खगोलस्य, वास्तुशास्त्रं प्राविधिकविज्ञानस्य, आयुर्वेदः चिकित्साविज्ञानस्य, छन्दः शास्त्रं संगीतविज्ञानस्य, पाणिनेरष्टाध्यायी भाषायाः भारद्वाजसंहिता वैमानिकविद्यायाश्च समुत्पादकाः सन्ति अतः संस्कृतस्य वर्तमानकाले भारते कियती आवश्यकता वर्तते इति सर्वेऽपि भवन्तः स्वयं निर्णेतुं शक्ताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतियोगिभ्यः १२००/ ९००/ ८००/ ६००/ ४००/ रूप्यकाणां पुरस्काराः प्रदत्ताः। अत्राप्यनेके जनाः प्रबुद्धभारतीयाश्चोपस्थिताः आसन्।

मातुः रत्नकुमार्याः चतुर्वार्षिकपुण्यतिथिः

२००३ खीष्टाब्दस्य जनवरीमासे ३ तिथौ स्वर्गीय आचार्यं श्रीरत्नकुमार्याः चतुर्थी पुण्यतिथिरत्र आचार्याणां आश्रमे मानिताऽभूत्। गायत्री पुरश्चरणहवनपूर्णाहुतिअखण्डरामायणपाठादिकार्यक्रमाः अभूवन्।

हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्रिणः श्री वीरभद्रसिंह राज्ञः राज्ञमहिषी श्रीमती प्रतिभासिंह महाभागा तथा च युवराट् श्रीविक्रमादित्यसिंह उपस्थितावास्ताम् समारोहे अनेकशिष्यप्रशिष्याः गणमान्याश्च जनाः समारोहं समलञ्चक्रुः।

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं।

—व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०५९ चैत्रः ख्रीष्टाब्दः २००३ मार्च
वर्षम् ४७ अंकः ६

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखां चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लीलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमणी साहित्यम्

– डा० मीरा रानी रावत

संस्कृतसाहित्ये वैदिकवाङ्मयस्य वैशिष्टयं को न जानाति । भारतीय दर्शनस्य धर्मस्य च जीवनं वेदा एव सन्ति । वेदाः न केवलं भारतीयानाम् अपितु भुवः सर्वासाम् अपि मानवानां कल्याणाय प्राचीनाः ग्रन्थाः सन्ति । ज्ञानस्य विमला धारा अखिल ब्रह्माण्डे सर्वास्वपि दिशासु वेदेभ्य एव निःसृत्य प्रससुः । प्रतीच्या विपश्चितो वेदान् ऋषिप्रणीतान् मन्यन्ते । तेषां हि आधि भौतिकी दृष्टिस्तान् शब्दराशिमेव सामान्यग्रन्थमेवाव गच्छति । परञ्च वेदमर्मज्ञाः भारतीयाः मेधाविनस्तान् न ऋषिकृतान् मन्यते । तेषां अवधारणास्ति यत् ऋषयो वैदिकमन्त्राणां द्रष्टारः सन्ति न तु कर्तारः । अलौकिकसामर्थ्यशालिनः ऋषयो दिव्यया प्रतिभया मन्त्राणां दर्शनलब्धवन्तस्तेषां प्रकाशस्तद्धियि अवततार ।

वेदार्थज्ञाने तस्य कर्मकाण्डस्य प्रतिपादने याप्युपयोगीनि शास्त्राणि सन्ति तान्येव वेदाङ्गानि इति कथ्यन्ते । वैदिकमन्त्राणामुच्चारणाय शिक्षायाः, यज्ञीयानुष्ठानस्य निमित्ताय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणस्य, निर्वचनाय निरुक्तस्य, वैदिकच्छन्दसां ज्ञान लाभाय छन्दस तथा अनुष्ठानस्योचितकालनिर्णयार्थं ज्योतिष शास्त्रस्य च प्रयोजनमस्ति । वेदस्य रक्षणाय एकस्यां नूतन शैल्या ग्रन्थरचनाऽजायत । अस्यां शैल्यां रचिता ग्रन्थाः 'अनुक्रमणी' इति नाम्ना प्रसिद्धाः सन्ति ।

याज्ञ कर्मणि पदे-पदे ऋषिदेवताछन्दसां ज्ञानमपेक्ष्यते । वेदाङ्ग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वपरिगणिता अप्यनुक्रमणी ग्रन्थाः वेदस्य रक्षार्थमेव प्रणीताः। मन्त्राणां द्रष्टारो ऋषयः के तेषां देवता काः काः तेषां छन्दोऽनुवाक सूक्तानि च कानि ? इति बोधयितुं ये ग्रन्था विरचितास्ते अनुक्रमणीग्रन्थाः कथ्यन्ते ।

षड्गुरुशिष्यः सर्वानुक्रमणीवृत्तिभूमिकायां शौनकप्रणीतान् दश ग्रन्थान् निर्दिदेश । तथा हि

'शौनकीया दश ग्रन्थास्तदा ऋग्वेदगुप्यते
आर्षानुक्रमणीत्याद्या छान्दसी दैवती तथा ।।

अनुवाकानुक्रमणी सूक्तानुक्रमणी तथा ।
ऋक्पादयो विधाने च बार्हद्दैवतमेव च ।।

प्रातिशाख्यं शौनकीयं स्मार्तं दशमुच्यते ।''

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARIDWAR

आर्षानुक्रमणी...

अयं श्लोकात्मकः ग्रन्थः । अस्मिन् ग्रन्थे २९२ श्लोकाः सन्ति । ग्रन्थेऽस्मिन् ऋग्वेदस्य मन्त्राणां दृष्टारः ऋषीणां विवरणं समुपलभ्यते । अयं ग्रन्थः षड्गुरुशिष्येण वेदार्थदीपिकायां पञ्चदशकृत्व उद्धृतः ।

छन्दोऽनुक्रमणी...

अयमपि ग्रन्थः श्लोकात्मकः । ऋग्वेदगतसूक्तानां यानि छन्दांसि विद्यन्ते तेषां विवेचनं ग्रन्थेऽस्मिन् विस्तरेण उपलभ्यते । अत्र हि राजेन्द्रलाल सम्पादिते संस्करणे दशसु मण्डलेषु संयोज्य ३८८ श्लोकाः प्रकाशिताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवतानुक्रमणी —

षडगुरुशिष्येण वेदार्थ दीपिकायाम् उद्धृतैः वचनैः एतद् अनुमीयते यत् ग्रन्थोऽयं पद्यात्मकमा आसीत् । अयं ग्रन्थः षड्गुरु शिष्येण वेदार्थदीपिकायां दशधा उद्धृतः । अस्य ग्रन्थस्य हस्तलिखित कोशा अद्य नोपलभ्यन्ते मेक्डानल: सम्भावयति यत् ग्रन्थोऽयं लघु कलेवर स्यात् इति ।

अनुवाकानुक्रमणी—

अयं ग्रन्थोऽपि पद्यात्मक एव । अनुवाकानुक्रमण्य आद्याश्च-दंश श्लोका भूमिकारूपा: सन्ति । तत्रादौ तावत् ग्रन्थप्रतिपाद्यविषयो वर्ण्यते ततो वेदाध्ययन रीति,प्रतिपादिता ।

सूक्तानुक्रमणी —

मेक्डानल: कल्पयति यत् सूक्तानां प्रतीकसूचीरूपेयमनुक्रमणी स्यादिति अत एवास्या उद्धरणानि नोपलभ्यन्ते । इयमनुक्रमणी केनचित् क्वचिद् न उद्धृता । किन्तु षड्गुरुशिष्यकालेऽस्या अस्तित्वं निर्विवादमेव ।

ऋग्विधानम् —

श्लोकात्मकोऽयं ग्रन्था । अस्मिन् ग्रन्थे मन्त्राणां विनियोगा विधय: फलानि च वर्णितानि सन्ति । ग्रन्थ: पञ्चस्वाध्यायेषु विभज्यते, तत्र संयोज्य ७५८ श्लोका: संगृह्यन्ते ।

पादविधानम् —

गद्यपद्यात्मकोऽयं ग्रन्थः । अत्र श्लोकाश्चतुर्दशसंख्यायन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य ग्रन्थस्य पञ्चश्लोका षड्गुरुशिष्येण वेदार्थदीपिकायां समुद्धृताः । पादविधाने भाष्ये पादप्रतीकानां पूर्ति, व्यवस्था, संख्यानं चान्तरेण न कश्चित् विशेष उपलभ्यते ।

बृहद्देवता —

प्रकाशितोऽयं ग्रन्थः सानुवादः । श्लोकात्मको ग्रन्थोऽयमष्टाध्यायेषु विभक्तोऽस्ति द्वादशशतकल्पाः श्लोका अत्र संगृहीताः सन्ति । यद्यप्ययं ग्रन्थोऽनुक्रमणी नाम्ना नाभिधीयते, तथापि व्यवहारत इयमनुक्रमण्येव । अस्मिन् ग्रन्थे यास्कशौनकशाकटायनः, शाकपूणि, गालवाचार्यस्य च मतानि बहुशः उल्लिख्यन्ते । अस्य ग्रन्थरत्नस्यालोके ऋग्वेदीयदेवतानां रहस्यस्पष्टता आलोकिताभवति । द्वादशशतेषु पद्येषु निर्मितोऽयं ग्रन्थः ऋग्वेदीय देवतानाम् विषये प्रामाणिक ज्ञानम् प्रस्तौति । काव्यशैल्या निबद्धान्येतान्याख्यानानि ऐतिह्यासिकरीत्या महाभारते निर्दिष्टैराख्यानैः सह सम्पर्कं स्थापयन्ति ।

कात्यायनीया सर्वानुक्रमणी —

ऋग्वेदस्य समस्तावश्यकविषयाणां ज्ञानाय कात्यायनस्य कृतिः 'सर्वानुक्रमणी' नितान्तप्रसिद्धा प्रमाणिका चास्ति ।

सूत्रात्मकोऽयं ग्रन्थो प्रकरणे द्वये विभज्यतेपरिभाषा सर्वानुक्रमश्चेति । तत्र ग्रन्थारम्भे द्वादशकण्डिका परिभाषा निबध्यते ततश्च चतुःषष्टिषु कण्डिकासु शाकल शाखीय ऋग्वेदाध्याय परिमितासु प्रधानविषयो वर्ण्यंते । परिभाषा प्रकरणस्य प्रथम कण्डिकायां ग्रन्थस्य प्रतिपाद्य विषयस्तदध्ययनफलं च वर्ण्यंते । द्वितीया द्वादश्योः कण्डिकयोः सर्वानुक्रमप्रकरणस्थ सन्देहस्थलनिवृत्त्यर्था परिभाषा संगृह्यन्ते । तृतीयातआरभ्येकादशी कण्डिका यावद् ऋग्वेदे प्रयुक्तानि छन्दांसि परिभाष्यन्ते । परिभाषा प्रकरणानन्तरं प्रधानग्रन्थः सर्वानुक्रमः प्रारभ्यते, यश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुः षष्टि कण्डिका अध्यायान् वा व्याप्नोति । प्रत्येकसूक्तस्यादि पदम् अनन्तर ऋचां संख्या सूक्तस्य ऋषेर्नाम तथा तस्य गोत्रं, सूक्तानां तथा तदन्तर्गतमन्त्राणां देवताया निर्देशस्तथा मन्त्राणां छन्दसां क्रमबद्धोल्लेख कृतवान् । अनेन प्रकारेण ऋग्वेदस्य विषये आवश्यक सामग्री सङ्कलन-त्वेन ग्रन्थोऽयं विशेषरूपेणोपादेयोऽस्ति ।

शौनकीया स्मृतिः—

अयं ग्रन्थः शौनकेन स्वयमेव स्वशिष्यस्याश्वलायनस्य प्रीत्यै विनाशित इति षडगुरुशिष्य कथनादेव परिकल्पयत उक्तचरेण पाद विधान सम्पादकेन । तथा हि वेदार्थ दीपिकाया उपोद्घाते षडगुरुशिष्यः प्राह—

सहस्रखण्डं स्वकृतं सूत्रं ब्राह्मणसन्निभम् ।
शिष्याश्वलायन प्रीत्यै शौनकेन विपाटितम् ।
मेक्समूलरः प्राचीन संस्कृतवाङ्मयेतिहासे पृ० २११

याजुष अनुक्रमणी— शुक्लयजु सर्वानुक्रम सूत्रस्याऽपि रचयिता कात्यायन एवाऽस्ति । सूत्रात्मकोऽयं ग्रन्थः षड्चस्वध्यायेषु विभज्यते । एतेषां सूत्राणामर्थविबोधनायास्य ग्रन्थस्य भाष्यमपि प्रकाशित मस्ति अस्मिन् ग्रन्थे ऋषिदेवता छन्दांसि कल्पकारोक्ताश्च विनियोगा अनुक्रम्यन्ते ।

ग्रन्थारम्भे ऋषेश्छन्दसो ज्ञानाय महिमा प्रतिपादितोऽस्ति । ग्रन्थान्ते भाष्यकारोऽनन्तदेवयाज्ञिकोऽपि षड्चमाध्यायस्या स्वकीयत्वमेव प्रतिपादयति । अस्मिन् ग्रन्थे समुल्लिखितः अस्ति यत् ऋषेश्छन्दसो ज्ञानस्य विना वेदाध्ययनं मरणमिव कष्टप्रदं भवति ।

अथान्तराश्चगतं वाऽऽपद्यते स्थाणुं वच्छेति प्रमीयते वा पापीयान् भवति । पृ० १०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् ग्रन्थे यागविधानस्य नियमस्तथाऽनुष्ठानानां वर्णनं विशेष रूपेण उपलभ्यते। छन्दसां विस्तृत विवेचनम् अस्यानुक्रमण्यां महती विशिष्टताऽस्ति।

सामवेदीयानुक्रमणी— कौथुमान्तर्गतनैगेयशाखाया अनुक्रमणी मुद्रितोपलभ्यते। अस्मिन् ग्रन्थे सामवेदीयमन्त्राणाम् ऋषयो देवताश्चानुक्रम्यन्ते। ग्रन्थस्य नाम नैगेयशाखानुक्रमणीति निर्दिश्यते, परमस्य नाम्नादि विषये किमपि न ज्ञायते। सामवेदस्य श्रौतयागेन सम्बद्धा अनेके ग्रन्था उपलभ्यन्ते। यथा कल्पानुपदसूत्रम् उपग्रन्थसूत्रम् अनुपदसूत्रम्, निदान सूत्रम्, उपनिदानसूत्रम्, पञ्चविधानसूत्रम्, लघुऋक्तन्त्र षडग्रहसामसप्तलक्षणम् च। विस्तार भयेन तेषां क्रमशः परिचयः न प्रदीयते।

अथर्ववेदीय ग्रन्थाः— अथर्ववेदेन सम्बद्धा अनेके ग्रन्था सन्ति। एभिर्ग्रन्थैरथर्वस्य विभाजनमन्त्रउच्चारणविनियोगादीनाम् वर्णनं उपलभ्यते। चरणव्यूहस्यानुसारेण अथर्ववेदस्य पञ्चलक्षणग्रन्थाः सन्ति चतुराध्यायी; प्रातिशाख्यम् पञ्चपटलिका, दन्त्योष्ठविधिः बृहत्सर्वानुक्रमणीश्च। अथववेदीय अनुक्रमणी साहित्यस्य बृहत्सर्वानुक्रमणी अतिमहत्त्वपूर्णः ग्रन्थः अस्ति। सर्वानुक्रमण्या यत्स्थानऋग्वेदीयसाहित्येऽस्ति तदैवास्य ग्रन्थस्यापि महत्त्वमथर्ववेदीय साहित्येऽस्ति ग्रन्थोऽयं सहस्रावद्विंशति काण्डेषु विभक्तोऽस्ति। अस्मिन् ग्रन्थे त्रिंशत् महाशक्तीनां निमित्तभेदेन वर्णनमस्ति। प्रत्येकस्य काण्डस्य सूक्तानां मन्त्रऋषिदेवताछन्दआदिभूतीनां पूर्णविवेचनमस्ति। अथर्ववेदस्य साहित्यम् अन्यवेदानां साहित्यमिव महत्त्वपूर्णमस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातिशाख्यसाहित्यम्—

प्रातिशाख्यं वेदस्य लक्षणग्रन्थोऽस्ति। वेदाभ्यासस्तु पञ्चधा विभज्यते (१) अध्ययनम् (२) विचारः (३) अभ्यासः (४) जपः (५) अध्यापनञ्चेति। ऋक्प्रातिशाख्यस्य सूत्रेषु एतेषां पञ्च प्रकाराणां वेदाभ्यासस्य विधिवद् वर्णनमस्ति। एतेषामध्ययनं अतिमहत्त्वपूर्णमस्ति। शौनककृतोऽयं ग्रन्थोऽतिप्राचीनः प्रामाणिकश्च। प्रातिशाख्यग्रन्थेषु ऋग्वेद प्रातिशाख्य शीर्षस्थानीयमस्ति। विषयप्रतिपादनदृष्टया प्रातिशाख्यमुद्देश्यम् वैदिकशब्दानां वेदमन्त्राणाञ्च व्याकरणप्रक्रियाप्रदर्शनमेव। उवटकृतविशदभाष्यम् अत्रोपलभ्यते। अष्टादशसु पटलेष्वत्र कारिकाभिः ऋग्वेदस्य शाकलशाखासम्बन्धिनः स्वरवर्णसंधिछन्दो विषयान् अधिकृत्य नियमा विहिताः।

चतुर्णां वेदानां चत्वारि प्रातिशाख्यानि सन्ति। तानि च ऋक्प्रातिशाख्य, वाजसनेयिप्रातिशाख्य तैत्तिरीय प्रातिशाख्य सामवेदीयप्रातिशाख्य अथर्ववेदीय प्रातिशाख्यानि च। संक्षेपतो वैदिकव्याकरण सम्बन्धि पदप्रयोग नियमानां ज्ञानाय प्रातिशाख्य ग्रन्थाः प्रणीताः सन्ति।

इत्थं वेदाङ्गेष्वपरिगणिता अत्यनुक्रमणी ग्रन्थाः संस्कृतसाहित्ये महत्त्वपूर्णम् स्थानं धारयन्ति। वेदरक्षार्थं तद्गतावान्तर विषयाणां विवेचनार्थं महत्त्वपूर्णाः सन्ति।

— संस्कृत प्रवक्ता
आर्यकन्या महाविद्यालय
हरदोई उ० प्र०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यास्कचिन्तने शिक्षास्वरूपम्

– डा० रामकृष्ण सराफः

❀❀

संस्कृतजगति यास्कमुनेर्निरुक्तरूपेण तादृश्येव प्रतिष्ठायादृशी महर्षिवाल्मीकेः रामायण चयितृरूपेण, महर्षिव्यासस्य महाभारतकाररूपेण, महर्षिपाणिनेरष्टाध्यायीकृद्रूपेण तथा च महर्षिपतञ्जलेर्व्याकरणमहाभाष्यकाररूपेण ।

महर्षियास्कसमये (ई० पू० ७ शताब्दी) यादृगासीद् भारतीय संस्कृतिस्वरूपं, तद्विषयेतद्युगीनं दर्शनं निरुक्तं प्राप्यते यास्कमिरुक्तरचनाकालो वैदिकयुगस्य चरमचरणः तस्मिन् युगे प्रणीता या कृतयस्तास्य स्तत्कालीनस्य समाजस्य, तस्य च सांस्कृतिकप्रवृत्तीनां परिचयः प्राप्यते ।

धर्मदर्शन शिक्षाविषये य आसन् यास्कविचारास्ते प्रकटिता यास्कमुनिना स्वनिरुक्ते शब्दानां निर्वचनप्रसङ्गे । ग्रन्थे तस्मिन् यास्कस्य शिक्षा विषयका विचारा विशदं व्यक्ताः । विद्याप्राप्त्यै विद्यते कस्याधिकारः इति विषये तस्य मतं स्पष्टम् । आचार्याचरण विषये तस्याभिव्यक्तिः परिस्फुटा । छात्राणां मानसिकस्तरानुरूपं तेषां विषयग्रहणक्षमतानुरूपञ्च छात्रास्त्रिविधा इति मुनिमतम् ।

---

१. संस्कृतसाहित्य का इतिहास वाचस्पति गैरोला चौखम्बा प्रका. पृ. ४०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसम्माना बभूवुः ।
आदघ्नास उपकक्षास उत्त्वे हृदाइव स्नात्वा उत्त्वदिहशे।। २

छात्राणाम् अक्षिसामर्थ्यं, कर्णसामर्थ्यम् अर्थात् करसामर्थं समानं भवतु नाम, किन्तु विषयग्रहणसामर्थ्यं न तेषाँ समानता । तदेव तेषां परस्परं स्तरभेदकारणम् । उत्तररामचरित नाटके महाकविभवभूतिनाऽपि छात्राणां क्षमताभेदेन स्तरभेदः कृतः ।

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे ।
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।

भवति तु पुनर्भूयान् भेदः फलं प्रति, तद्यथा,
प्रभवति शुचिर्विम्बग्राहे मणिर्न मृदादयः ।। ३

ज्ञान विषये ऋषेर्विश्वासोऽस्ति यत् तद्भवतु मानवानां हितार्थं कल्याणाय वा नान्यथा । स्वग्रन्थे महर्षियास्केन कृतः कस्या अपि शिक्षणसंस्थाया उल्लेखस्तथापि शिक्षास्वरूप विषये विद्यते यादृशी तस्य परिकल्पना तस्याः स्पष्टा मिव्यक्ति विद्यते यास्कनिरुक्ते ।

अस्मिन्देशे सामान्यधारणाऽऽसीद् यद् विद्या तस्मा एव दातव्या योऽस्ति तस्याधिकारी सुपात्रं वा । अर्थात् स भवतु सत्पात्रता समन्वितः शिष्यधर्मान्वितो वा । धारणेयं समर्थिता निरुक्ते ।

---

२. यास्क प्रणीते निरुक्ते प्रथमाध्याये तृतीयेपादे उद्धृतः मन्त्रः
१०/७१/७ (ऋग्वेदे)

३. उत्तररामचरित II–४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"उपसन्नायतुनिब्रूयात् । यो वा अलं विज्ञातुं स्यात् । मेधाविने तपस्विने वा" । निरुक्तस्य द्वितीयेऽध्याये वर्णितं यत् शास्त्रज्ञानं श्रद्धासमन्विताय जिज्ञासवे, मेधावते तपोनिष्ठाय च शिष्यायैव प्रदातव्यम् । स जिज्ञासुश्छात्रः पवित्र्यधर्मान्वितः प्रमादयून्यो, ब्रह्मचर्यधर्मवान् भवेते । स नोदुहेद् आचार्याय तथा च प्राप्तज्ञानसंरक्षणप्रवृत्तिस्तस्य भवेत् ।

विद्या हवै ब्राह्मणमाजगाम, गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती यथा स्याम ।

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ।। २

भगवता मनुनाऽपि प्रोक्तं यद् विद्या सुपात्रायैव प्रदातव्यान कस्मा अप्यसत्पात्राय ।

विद्याब्राह्मणामेत्याह शेवधिष्टेस्मि रक्ष माम् ।
असूयकाय मां मा दास्तथा मा दास्तथा स्यां वीर्यवत्तम ।। ३

एतेन स्पष्टं भवति यत् प्राचीनसमये विद्याद्वाराणि यद्यपि सर्वेषां कृते व्यपावृतानि, किन्तु श्रद्धाविरहितानां, भ्रष्टाचरणानां जडानाम-

---

१. यास्क प्रणीतं निरुक्तम् सम्पादकः प्रो. उमाशंकर शर्मा 'ऋषि'
चौखम्बा प्रकाशन वाराणसि (१९६७) पृ० ४१
२. तत्रैव पृष्ठं तदेव
३. मनुस्मृतिः २–११४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल्पमतीनां च। कृते तत्र किमपि स्थानं नासीत्। तस्मिन्युगे शिष्यत्वधर्मच्युतेभ्यो जडेभ्यो वा विद्यादानं स्पष्टरूपेण वर्जितम्। ४ एयूकेशन इन एन्शियेण्ट इण्डिया" इति डा० ए०एस० अल्तेकरस्य कृतावपि तादृगुल्लेखोवर्तते। ५

ये शिष्या आचार्यं न सम्भावयन्ति विद्यातेषां कदापिन भवति सफला। शिष्यकृते श्रद्धाभावः, प्रमादराहित्यं, मेधावित्वं, पवित्राचरणञ्चापरिहार्यगुणाः। किन्तु शिष्यस्यापवित्राचरणं सर्वदाऽऽसीद्व्याघातो विद्याधिगमाय। एषा धारणा स्मृतिग्रन्थेष्वपि समर्थिता भवति। ६

एवमाचार्याचरण विषयेऽपि महर्षियास्कस्य स्वकीया प्रकल्पना। आचार्यो भवेदुत्कृष्टाध्यापनक्षमताश्वितः। चारित्र्यनिर्मलत्वञ्च तस्यापरिहार्यम्। तदेव स भवति नूनमाचार्य पदवाच्यः। आचारवान् आचार्य एव स्वशिष्येभ्य आचारज्ञानम् उपदेष्टुं क्षमते। "आचारं ग्राहयती' तियास्कमुनिः। आचार्यश्छात्रेभ्यो विद्या वितरति। न करोति स विद्यावाणिज्यम्। विद्यावाणिज्यस्य तु महाकविना कालिदासेन नितरां निन्दा विहिता।

---

४. नानुपसन्नाया अनिदंविदेवा। ' यास्क प्रणीतं निरुक्तम् चौखम्बा प्रकाशन (१९७७) पृ० ४१

5. Education in Aucient India Wras Aitekar Puvlishers Nand Kishore & Bros. Banaras (1951) 40269-७०

६. नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः।
जाननपि हि मेधावी जडवल्लोक आचरेत्।। मनुस्मृतिः II – ११०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्यागमः केवलजीवियं तं ज्ञानपण्यं वणिजं वदन्ति । २ महर्षि-यास्कोऽपि शिक्षा जीविका साधनमिति कदापि नानुमेने । अथवा शिक्षा जीविकोपार्जनहेतुरित्यपि स न कदापि समर्थितवान् । आचार्यः स्वय विद्यावान् सन् स्वीयच्छात्रेभ्यो गूढज्ञानं प्रददाति । शिष्याणाञ्च ज्ञानम् प्रभिवर्धयति । एवं तेषां लोचने ज्ञानशलाकयोरुन्मीलयति । महाभारतं-ऽपि श्रेष्ठाचार्यस्य प्रशसा वर्तते ।

प्रवृत्तवाक् चित्रकथः ऊहवान् प्रतिभानवान् ।
आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते ।। उद्योगपर्व-३३-२८

एवम्भूतमाचार्यं यास्कमुनिः शिष्याणां कृते तेषां जननजनकवत् मन्यते ।

तं मन्येत पितरं मातरञ्च । ३

एवमाचार्यः स्वशिष्येभ्यः पितृ श्रेयस्करं प्रदेयं प्रयच्छति । आपस्तम्ब-धर्मसूत्रे उल्लेखो वर्तते यद् आचार्यो यदा स्वार्जितं ज्ञानं स्वशिष्यायन वितरति तदा तस्य ज्ञानं साफल्यंनभजते । ४

उत्तरवैदिकयुगे ई० पू० ६ शतीपर्यन्तं वर्णव्यवस्था देशे नासीत् कथमपि बाधिका व्यवसाय निर्धारणे तत्र क्षत्रियाद्यापकेन वेददर्शनयो-रध्यापनं कृतमिति ज्ञायते । एवमेव ब्राह्मणाद्यापकेनशास्त्रविद्या वेदेतरः

---

१. निरुक्तम्–यास्कप्रणीतम् चौखम्बाप्रकाशन (१९७७ पृ० ७
२. मालविकानिर्णमित्रम्–I-१७
३. निरुक्तम्–यास्कप्रणीतम् चौखम्बाप्रकाशन (१९७७) पृ०
4. Wras Altekr कृते Education in Aucient India इति ग्रन्थे ५५ तमे पृष्ठे उद्धृतम् आपस्तम्ब धर्मसूत्रम् तत्र ११,८.२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाश्चाऽव्यापिताः। तस्मिन्युगे कोऽपि प्राभवद् यथारुचि स्वव्यवसायं चेतुम्। ५ परवर्त्तियुगेऽवश्यमस्मिन् परिवर्तनमागतम्।

निरुक्ते यास्कमुविना स्वीकृतं यच्छात्राणां ज्ञानावगाहिनी क्षमता स्त्रीया स्त्रीया। तदनुरूपमेव ते विषयमाकलयन्ति। तदनुरूपमेव च ते स्वगृहीत विषयमभिव्यक्तुं क्षमन्ते। महर्षिमंन्यते यत समर्थं कर्णेंद्रियाणां समर्थचक्षुरिन्द्रियाणाञ्चान्तेवासिनामवबोधक्षमता न समाना। तत्र भिन्नत्वं वर्तत एव।

समानाचार्यतः विद्याप्राप्त्यनन्तरमपि छात्राणामुपलब्धिर्न समातेषामवगाहनक्षमता भिन्नत्वेन। तत्र दृश्यते यदृदत्तरम्। येषां तेषु महापण्डिता अन्ये च सामान्याः। केचनान्ये सन्ति येषां विषयावगमः भजते केवलं पल्लवग्राहित्वम्। विषगावगाहन सुखात् ते सर्वथावरिचिता। मेधाविनां छात्राणां त्ववश्यमेव विषये गहन प्रवेशः। एते छात्रा यास्कमुनिना प्रभूतं प्रशस्ताः। त एव विद्यावन्त इति मन्यते महर्षिः। विद्यावान् एव देशेच विदेशे च सर्वत्र सम्पूज्यते।

"स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।"

---

5. We have verfuid that Kshattriya teacher, Vedie and philosiphical suvgects existed down tolte 6 CBC and that the veeninletter of Brahmana Community was for a long time utiliged to further the bound. of human leuowletge in sveral branches of non- Vedic studies Education in Ancitnt India As Alteker P. 40. 41.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वान् सर्वदाऽभीतः। परिपक्वज्ञानेन स सुष्ठु समन्वितः अन्ये च ये प्रतिस्पर्धिनस्ते न तं प्रधर्षयितु क्षमन्ते। अर्थज्ञानविरहितोऽपक्वतानो-वाऽकृती' तिमन्यते महर्षिः। एवं निरुक्ते प्रशंसा ज्ञानस्याज्ञानस्य च विनिन्दा वर्तते।

यथार्थज्ञानविषये महर्षेर्धारणाभिन्ना। केवलं विद्याविशारदत्वमेव न हि ज्ञानसाफल्यमापकः। विद्यावतः ज्ञानं खलु समाजस्य कृते राष्ट्र-कृते वा विद्यावतां कर्त्तव्यं यत् तेषां ज्ञानस्य लाभो भवतु राष्ट्रकृते। तदेव तेषां ज्ञानस्य सार्थकत्वम्।

विद्यायाः प्रयोजनं निरूपयन् महर्षिः ताम् उदात्तवैचारिकभूमौ प्रतिष्ठापयति। विद्यावतो २ विद्या समाजस्य राष्ट्रस्य वानिधिः। तस्यो द्योगो भवतु समाजस्य राष्ट्रस्य कल्याणाय। एवं विद्यायाः महत्त्वं राष्ट्रि यदृष्ट्या स्थाप्यते। महर्षियास्कस्य दृष्टिरियं साम्प्रतिके युगेऽपि भजते प्रासङ्गिकताम् यथार्थं समहर्षिः दूरद्रष्टा।

स्त्री शिक्षाविषये निरुक्ते यद्यपि किमपि स्पष्टमुल्लेखो न हि विद्यते तथापि तस्मिन् युगे स्त्रीणां कृते शिक्षानासीदप्राप्येति प्रमा-णैरनुमातुं शक्यते।

---

१. स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥
यद् गृहीतमविज्ञातं निगदेनैवशब्द्यते।
अनग्वाविव शुष्कंधो न तज्ज्वलति कर्हिचित्।
निरुक्तम् सम्पादक प्रो० उमाशंकर शर्मा 'ऋषि' चौखम्बा प्रका० पृ ३०

२. आचिनोति बुद्धिम्। तत्रैव पृ० ७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवाचनं तथा ।। यमस्मृतौ

इत्यनेन ज्ञायते यत् स्त्रीणां कृते उपनयनस्याध्ययनाध्यापनयोश्चाधिकारो वर्तते स्म तस्मिन् युगे । तस्मात्पूर्वमपि संहिताकाले विश्ववारा, घोषा शोमशा, लोपामुद्रा चेत्यादीनां मन्त्रद्रष्ट्रीणां नामानि को न जानाति ?

छात्राणाम् अनुशासनसमस्या यादृशी साम्प्रतिककाले विद्यते, सा कदापि न हि दृष्टा यास्कयुगे नापि तदनन्तरमपि । यतः छात्राचार्ययोर्मध्ये सम्बन्धो यादृशः प्रियकर आसीत्, स भवति वर्तमानयुगे कल्पनातीत एव । यास्कयुगे आचार्य एवासीत् छात्राणां कृते माता च पिता च ।

"तं मन्येत पितरं मातरं च, तस्मै न द्रुह्येत्कतमच्चनाह । १ यत आचार्य एवासीत् तेषां दिव्यजीवन संस्कर्त्ता, तर्हि कथं न ते तस्यानुशासने वर्तेरन् ? अतएव तदा नासीत् विद्याकेन्द्रेषु कापि छात्रप्रवेश समस्या नापि कापि छात्रानुशासन समस्या ।

न केवलं यास्कयुगेऽपितु कालिदासयुगेऽपि, शिक्षणसंस्थायु अनुशासनसम्बन्धिनी काऽपि समस्यानासीत् । अनुशासन नियमानां परिपालनं तत्र दृढं विहितम् । सर्वैरन्तेवासिभिः समानभावेनाश्रमनियमा परिपालिताः । श्रमप्रधानस्य नियमान् न कोऽपि शशाकोल्लंघितुम् । भवतु सराजपुत्रोऽपि भवेत तर्हि स दण्डितस्तक्षणम् । महर्षिच्यवनस्याश्रमे महाराजपुरूरवसः सूनुः 'आश्रममर्यादामतिक्रम्य शकुनिवधं विहितवान् तेन सतत्कालमेवाश्रमान्निष्कासितः । आश्रमनियमाः शासनेनापि समादृताः । शिक्षाविषये नो तनिर्धारणेऽधिकार आसीत् कस्यापि कण्वस्य वा वरतन्तोर्वा च्यवनस्य वा । शासनस्य तत्र मनागपि हस्तक्षेपो नासीत् । ता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृशी श्रेष्ठ शिक्षाव्यवस्थाऽस्माकं देशे बहुकालपर्यन्तमासीत्। किन्तु हन्त। साम्प्रतिके काले सर्वं विपर्यस्तम्। विद्याकेन्द्राणि सञ्जातानि चिन्ताकेन्द्राणि। तत्कारणं किमिति सर्वैर्ज्ञायते।

एवं महर्षियास्को न केवलं भाषाशास्त्रविद् अपितु शिक्षाक्षेत्रेऽपि तस्य प्रकल्पनाऽपूर्वा। तस्मिन्क्षेत्रे तस्यावदानमद्वितीयम्। तस्य चिन्तनाधारोऽस्माकं सनातनी भारतीया संस्कृतिः। तस्य चिन्तने विद्याप्रकर्षोऽभिप्रत्यन्यते शिक्षायामूल्याङ्कनं तेन राष्ट्रियदृशाविहतिम्। तस्य मतेन संवयथार्थं शिक्षा यस्या उपयोगित्वं राष्ट्रकृते राष्ट्राभ्युदयाय वा। महर्षियास्कस्य विचाराः साम्प्रतिके युगेऽपि प्रासङ्गिका मननीयाश्च।

— आवास-ई-७/५६२ अरेरा कॉलोनी
भोपाल (४६२००१६

---

१. तत्रैव पृ० ४१

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तेन हर्षान्वितं जायते मे मनः

— प्रो० केशवराम शर्मा
दिव्यदीप सोलन (हि.प्र.)

★★

सन्ति तेजस्विनो देशमध्ये बुधा—
स्तेन हर्षान्वितं जायते मे मना ।

अन्धकारैः पवीता निशा यद्यपि
सर्वतो वारिवाहै र्निगीर्णा दिशः ।
मञ्जुलाम्भोजिनो जीवनाधायको
ह्यम्बरे नास्ति दूरे तु सूर्योदयः ।।

अस्ति सत्ता स्वेराध्यविध्वंसिनी
तेन हर्षान्वितं जायते मे मना—.....

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्टकानां वितानं सृतं यद्यपि
वल्लरी देहयष्टिः व्रणष्टच्छटा ।
पुष्पगुच्छोद्भवं किन्तु तत्सौरभम्
मार्जयेदश्रुधारामलं चिन्तया ।।

गन्धवाहप्रवाहो लतां स्पृक्ष्यति
तेन हर्षान्वितं जायते मे मनः.....

यद्यपि श्वेतता वर्द्धते शोणिते
रिक्तता रक्ततायास्तु नाद्यावधि ।
अक्षिणी घूर्णिते पक्ष्मणी वा नते
जागृतिर्निर्जिता नाधुना निद्रया ।।

जाड्यजेत्री मतौ वर्तते चेतना
तेन हर्षान्वितं जायते मे मनः.....

सिंहशावाः शृगालायिता यद्यपि
कुक्षिमद्यापि सिंही बिभर्त्युर्वराम् ।
यज्ञविघ्नं विधातुं रता दानवा
नास्ति दूरे परं राघवेन्द्रागमः ।।

कौशलेन्द्रप्रतापोदयः श्रूयते
तेन हर्षान्वितं जायते मे मनः.....

देववागिन्दिरा मन्दिरे दीपिका
म्लानिमानं तु याता न निर्वापिता ।
तैलसञ्जीवनी पात्रहस्ता बुधाः
पंक्तिबद्धाः स्थितास्तर्हि मा चिन्तया ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधु साध्यप्रबोधो वरीवर्द्धते
तेन हर्षान्वितं जायते मे मनः.....

कालिदासायते कोऽपि हर्षायते
कोऽपि माघायतेऽन्यस्तु बाणायते ।
सत्सु तेषु प्रयातेष्वपीयं धरा
वाचि वर्चोधरा नैव शून्यायते ।।

वेदुषी वैखरी मञ्जु गुञ्जायते
तेन हर्षान्वितं जायते मे मनः.....

—।★★।—

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं।

—व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिक्किमप्रदेशे संस्कृतमहाविद्यालय-स्थापना

– डा० हरिप्रसाद अधिकारी

संस्कृतं भारतस्य सर्वस्वमिति न तिरोहितं विदुषाम् । एतच्च संस्कृत समस्तस्य भारतीयज्ञानविज्ञानवैभवस्य मूलमितिजानन्तोऽपि न सर्वे संस्कृतोत्थानाय तथा बद्धपरिकरा विलोक्यन्ते । यद्यपि सांप्रतिकः केन्द्रसर्वकारः संस्कृतोन्नतये किञ्चित् प्रयतमानोऽवलोक्यते ।

अत्र तावत् पूर्वोत्तरभारते वर्तमानं सिक्किमराज्यम् आश्चर्यजनकरूपेण संस्कृतसंवर्धने प्रयत्नशीलमवलोक्यते । प्रदेशोऽयं १९७५ तमे वर्षे एव पूर्णतया भारतेन सम्बद्धः । अत्रत्या जनताः बौद्धाः हिन्दवश्च सन्ति । हिन्दुषु प्रायः सर्वे नेपालिभाषाभाषिणः वर्तन्ते । बौद्धास्तु भोटे-लाप्चे भेदेनद्वैविध्यमापद्यन्ते । संस्कृतं हिन्दूनां बौद्धानाञ्च कृते समानरूपेण उपास्यम् । एतच्च सिक्किमस्थोभयधर्मीयनागरिकैः सम्भूय संस्कृतविकासेन प्रमाणीकृतम् । सिक्किम संस्कृतभाषायाः विकासस्य मुख्यश्रेयः तत्रत्य मुख्यमन्त्रिमहोदयाय श्रीपवनकुमारचामलिंगमहोदयाय गच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन स्वव्यक्तिगतप्रयासेन सिक्किमे गेंजिगनामकस्थाने (पश्चिमस्थे) प्राय: पञ्चवर्षपूर्वं संस्कृतमहा विद्यालयस्य स्वयमेवोद्घाटनं कुर्वता कथि. तम्—"सर्वभाषाणाम् जननी संस्कृतम् इति तु अस्त्येव परमहन्तु निर्धनानां कल्याणार्थं सर्वदा प्रयते, संस्कृतं हि प्रायश: निर्धनै: जनै: अधीयते अत एव मयास्य संस्कृतमहाविद्यालयस्य स्थापना क्रियते।"

अनेन मुख्य-मन्त्रिणा न केवलं विद्यालयोऽयं स्थापित: अपितु अस्य विकासाय सर्वदा यतमानो दृश्यते। प्रथमतया श्री यु० सी० वशिष्ट. महोदय विद्यालयव्यवस्थार्थं सर्वकारेण नियुक्त: आसीत्। इदानीं श्री टी० एन० तिवारी विद्यालयस्य व्यवस्थायें नियुक्तो वर्तते। कार्यवाहक. प्राचार्यरूपेण व्याकरणाचार्य: शिवप्रसादपोखरेलमहोदय: कार्यं कुर्वाणो. ऽस्ति।

अस्मिन्नेव वर्षे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिमहो. दयेन श्रीमता प्रो० शजेन्द्रमिश्रण अस्य महाविद्यालयस्य निरीक्षणं विधाय विश्वविद्यालयस्य सम्बद्धता प्रदत्ता।

अस्मिन् विद्यालये प्राय: शताधिका: बालक-बालिका: पूर्वमध्य मात: शास्त्रिकक्षां यावत् व्याकरणप्रभृतिविषयाणां विस्तरेणाध्ययनं कुर्वन्तो वर्तन्ते।

एवमेव सिक्किमस्य विभिन्नेषु भागेषु दशाधिका: संस्कृतपाठशाला: सञ्चाल्यमाना: वर्तन्ते।

अत्रापरमपि तथ्यमुल्लेखयितुमिच्छामि यत् सिक्किमसर्वकारेण प्रदेशवर्तिषु समस्तेषु आङ्गलविद्यालयेषु संस्कृतस्य पदमेकं निर्माय संस्कृ. तस्नातकेभ्य: सेवावसरो दत्त:। एतेनानुमीयते यत् सिक्किमे संस्कृतभ. विष्यम् इतोऽपि सम्यक् भविष्यति। अन्यप्रदेशा: अपि सिक्किमस्यानु. करणं कुर्युरिति तत्प्रेरणार्थं आशुतोष: भगवान् विश्वेश्वर: प्रार्थ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीप्रेमशर्मणे निदेशकपदे नियुक्तिः

शिमला। प्रदेशप्रशासनेन श्रीप्रेमशर्मा भाषासंस्कृतिविभागनिदेशकपदे नियुक्तः पदोन्नतश्च कृतः। दिव्यज्योतिः परिवारः अभिनन्दनमस्य करोति वर्धापनानि च प्रेषयति।

अप्रकाशितप्राचीनसंस्कृतग्रन्थाः प्रकाश्याः

— रमाकान्त गोस्वामी

★★

दिल्ली। २६-२-२००३ दिवसे दिल्लीराज्यस्य सचिवालये मुख्यमन्त्रिणः संसदीय सचिवस्य कक्षे दिल्लीराज्य संस्कृत अकादम्याः अ-भा. संस्कृत पाण्डुलिपि प्रकाशन सहयोग योजनान्तर्गतप्रकाशितपुस्तकानां लोकार्पण समारोह समायोजितः।

मुख्यमन्त्रिसंसदीयसचिवेन श्रीरमाकान्त गोस्वामिना कथितमत्र समारोहे यत् संस्कृतस्य बहुमूल्यपाण्डुलिपिसमूहः अद्यापि भारतस्य विभिन्न क्षेत्रेषु विकीर्णः। तत्र खलु बहुतत्त्वस्तु विषयो भवेत् येन वयमनभिज्ञाः। अद्य च तस्य महती आवश्यकता भवेत्। अतः एवं विधपुस्तकप्रकाशनमावश्यकम्। एतदर्थं च संस्कृतअकादमी साहाय्यं ददाति। अकादमी उपाध्यक्षः कुलानन्दभारतीयोऽबोधत् साहित्यं हि समाजदर्पणभूतम्। प्राचीनकाले यदपि संस्कृतसाहित्यं लिखितम् आधुनिक परिदृश्ये तस्योच्चतमस्थानमस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णसमेवालः अकादमी सचिवः प्रकाशित पुस्तकानां २००१-२००२ वर्षीयं विवरणं एवं दत्तवान् ।

लेखकः	स्थानम्	पुस्तकम्
१ डा० राकेश शास्त्री	(राजस्थान)	लघुसंस्कृतकथामञ्जरी
२ डा० रामकिशोर मिश्रः	(उ०प्र०)	वैदिक कवि चर्चा
३ डा० रामाशीष पाण्डेयः	(चांची)	स्वतन्त्र भारती
४ डा० मदन लाल वर्मा	(हरियाणा)	कपिशा ।
५ डा० हरिहर शर्मा	(उ. प्र.)	काव्यत्रिवेणी ।
६ डा० कृपाराम त्रिपाठी	(उ. प्र.)	काव्यमन्दाकिनी
७ डा० सत्यदेव चौधरी	(दिल्ली)	चोमाचिका ।
८ डा० कृष्णलाल	(दिल्ली)	हृदयप्रसूनम् ।

अत्रैव २००२—२००३ वर्षंकृते द्वादशपुस्तकप्रकाशनार्थमर्थराशि रपि वितीर्णः समाशोहेऽनेकजनैः भागो गृहीतः ।

सम्पादकीयम्

हिमाचलप्रदेशेसत्तापरिवर्तनम्

अस्य खीष्टाब्दस्य फर्वरीमासस्य २६ दिने हि. प्रदेशेऽत्यजनैः कांग्रे-सदलाय सत्तादानमकारि । प्रदेशस्य जनैः एकदलाय बहुमतदानं कृत्वा न केवलं स्वबुद्धि वैभवपरिचय एव प्रदत्तः अपितु भारतस्य पथप्रदर्शनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० वैशाखः ख्रीष्टाब्दः २००३ अप्रैल

वर्षम् ४७ अंकः ७

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखीं चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लीलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातिशाख्येषु निपातनम्

नि उपसर्ग पूर्वकं यत् धातोः णिच् ल्युट् इति प्रत्ययद्वयात् निष्पन्नोऽयं निपातन शब्दः । १ पत् धातु अदन्तः (पत) तकारान्तश्च (पत्) अस्ति । चुरादिगणस्य पत धातुः गत्यर्थकोऽस्ति पतति अर्थ च सूचयति णिच् प्रत्यात् तस्य पतयति अर्थो प्राप्यते तकारान्तरूपेण च णिच् प्रत्ययात् पातयति अर्थो प्राप्यते । २ अतः निपातनशब्दस्य अर्थोऽस्ति 'पातनम्' अर्थात् व्याकरणशास्त्रेण निष्पन्नेषु शब्देषु यत् कार्यं नियमेन न भवति तत् 'निपातनात् सिद्धम्' इति स्वीक्रियते शब्दश्च निपातिताः कथ्यते । काशिकायां निगदितम्—

यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । ३

व्याकरणलक्षणानुत्पन्नं पदसाधनम् । यत् निपातनादिष्टसिद्धिः ४

अतः कथयितुं शक्यते यत् निपातनं शब्दस्य अनियमितरूपं भवति परं अनियतं भूत्वाऽपि एकस्मिन्नर्थे कार्ये वा नियमितं क्रियते साधु च मन्यते । सम्भवतः अनेनैव कारणेन शब्दकोशेषु 'नियातनम्' इति निपातनस्य पर्यायः उपलभ्यते । ५ अतः शब्दव्युत्पत्तेः या प्रतिष्ठा भवति तस्य व्यत्यय एव निपातनं कथ्यते ।

प्रकृतिप्रत्ययरूपे शब्दसंस्करणं व्याकरणस्य लक्षणं प्रोक्तम् । पाणिनि पतञ्जलि आदिभिः वैयाकरणैः अस्मिन्नेव रूपे शब्दा अनुशिष्टाः । निपातनप्रक्रियाऽपि आचार्यनिर्दिष्टत्वात् साधु मन्यते । निपातितशब्दः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न केवलं प्रकृति न च केवलं प्रत्ययो भवति। कैयटः निपातितशब्दान् प्रकृतिप्रत्ययात्मकं स्वीकरोति। सम् आङ् उपसर्गपूर्वकं हृ धातोः निष्पन्ने निघण्टुशब्दे दुर्गाचार्यः अतिपरोक्षप्रणालीं स्वीकरोति। एतादृशाः शब्दाः वस्तुतः प्रयोगेन रूढाः भवन्ति। अतः अतिपरोक्षप्रणाल्या तेषां निर्वचनं क्रियते। यत्र कुत्रापि प्रकृति प्रत्यय लोप आगम गुण वृद्धि वर्णविपर्ययादिनि कार्याणि नियमेन न भवन्ति तत्र निपातनप्रक्रियामाश्रयते वैयाकरणः। अतः निपातनं शब्दसिद्धेः विशिष्टप्रक्रियारूपेण प्रचलितं व्याकरणग्रन्थेषु परं शब्दा अर्थाश्चापि निपातिताः कथयितुं शक्यन्ते।

पाणिनि-अष्टाध्याय्यां पञ्चसूत्राण्येव (सूत्रं प्रतिष्णातं, कपिष्ठलो गोत्रे, प्रष्ठोग्रगामिनि, बृक्षासनयोर्विष्टरः छन्दो नाम्नि (८-३-९१-९४) आचार्यैः 'निपातनसूत्राणि' कथितानि परं निपातनस्वरूप केवलं पञ्चसूत्रेष्वेव न दृष्टिगोचर भवत्ति। अष्टाध्याय्यां यत्र तत्र निपातनकार्याणि अवलोक्यन्ते। सूत्रकृतविधिषु प्रत्यय आगम आदेश द्वित्व लोप समास अव्ययादिषु विविधकार्येषु निपातनं अस्य व्यापकतां प्रकटीकरोति। यथा नञ्पूर्वकं जृष् धातोः यत् प्रत्ययस्य निपातनम्, ६ 'अध्यायः इत्यस्मिन् शब्दे घञ् प्रत्ययनिपातनं भवति। ग्लहः शब्दे ग्रह् धातोः अप् प्रत्ययात् 'पण' अर्थे लत्वार्थं निपातनं भवति। ७ जूः इत्यस्मिन् शब्दे जु धातु निपातनात् दीर्घो भवति। ८ निपातनस्य पूर्णविकासो जातः पाणिनिकृत-अष्टाध्याय्यां पर पाणिनेः पूर्ववर्ती प्रातिशाख्यग्रन्थेषु तस्य प्रारम्भिकरूपोऽन्वेष्टुं शक्यते।

प्रातिशाख्येषु अपि व्युत्पत्तिशैली पर्याप्तविकसितरूपे दृग्गोचरी भवति। वैदिकशब्दानां व्युत्पत्तेः ज्ञानं भवति प्रातिशाख्यग्रन्थेभ्यः। एवं प्रतीयते यत् प्रातिशाख्य ग्रन्थाः स्वमूलरूपे पाणिनेः पर्याप्तं पूर्ववर्तिनः सन्ति। ९ डा० सूर्यकान्तमहोदयस्य स्पष्टमतमस्ति यत् अथर्वप्रातिशाख्यं विहाय सर्वाणि प्रातिशाख्याणि पाणिनेः पूर्ववर्तिनि सन्ति। प्रातिशाख्यग्रन्थेषु वैदिकमंत्राणां स्वराः वर्णसमाम्नायः सन्धि अपृक्तं इति व्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करणस्य आवश्यकोपादानानां स्पष्टमुल्लेखो प्राप्यते। १० एवं प्रतीयते यत् प्रातिशाख्यकालेऽपि केचन शब्दाः व्युत्पन्नाः केचन च रूढाः स्वीकृता आसन्। रूढशब्देषु च निपातनस्वरूपं निहितमस्ति।

यथा 'दिवस्परि' पदे विसर्जनीयस्य सकारः निपातनादेव भवति। ११ सास्मिन्, सेमभिः, साभिवेगः, सोपमाः आदयः शब्दाः निपातनात् सिद्धाः। अतः अस्मिन्नेवरूपे साधवः सन्ति। १२ 'दुष्वप्न्यम्', १३ 'सहेः पृतनायाः' १४ आदिसूत्राणां भाष्ये निपातनसूत्रमेतत्' कथयित्वा निपातनमेव स्वीकृतं प्रातिशाख्यभाष्यकारेण। एवं अनेके शब्दाः निपातनविधिना व्युत्पन्नाः दरीदृश्यन्ते। 'सस्पदीष्ट' उदाहरणे निपातनात् सकार अथवा षकार-आदेशस्य नियम उपलभ्यते। १५ एवमेव 'शब्दार्थः' शब्दस्य स्थाने 'शब्दा अर्थाः' इति सन्धिविच्छेदस्य अनियमितरूपमवलोक्यते।१६

एवं कथयितुं शक्यते यत् निपातनं शब्दसाधुत्वसाधिका एका शैली वर्त्तते या शब्दानां विकासं गतिं च द्योतयति। यस्याः मूलरूपं यद्यपि वैदिकमन्त्रेषु अप्रत्यक्षरूपेण उपलभ्यते परं प्रातिशाख्यग्रन्थेषु केषुचित् स्थलेषु स्पष्टरूपेण दृष्टुं शक्यते। व्याकरणस्य वैज्ञानिकरूपेण विश्लेषणकर्ता पाणिनि यमां शब्दसाधुत्वप्रक्रियां स्वीकरोति यत् व्याकरणस्य पूर्णतायां उपयोगी एव भवति।

---

१. शब्दकल्पद्रुमः पृ० ८६३
२. माधवीया धातुवृत्तिः पृ० ५६८
३. अ. सू. ३.१.१२३ पर काशिकावृत्ति।
४. श. क. दु. पृ० ८८३
५. माध. धा. वृ. पृ० ५४८
६. ३-२-१०५ अ. सू. पर न्या. वृ.।
७. ३-३-७० पर अ. सू. पर का. वृ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. ३.२.१७७ अ. सू पर प्रकाश, प्र. की.
९. सूर्यकान्त सम्पा. ऋक्तन्त्र पृ० ४०
१०. ऋ. प्रा. उवटभाष्य ४/५६
११. वही
१२. ऋ. प्रा. २/३४
१३. वा. प्रा. ३/७२ सूत्र पर उ. भा.
१४. ३/७४ वही
१५. ऋ. प्रा. ४/६०
१६. अथर्व प्रा. नोट पृ. ६३

– डा० लता गर्ग

रीडर, संस्कृत विभाग
मुन्ना लाल एवं जय ना. खेमका
गर्ल्स कालिज, सहारनपुर



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीदुर्गापञ्चकम्



– डा० कर्मसिंह शास्त्री

ज्ञानालोक प्रदायिनीञ्च सुखदां लोकेश्वरीं शारदाम् ।
लोकानामघनाशिनीं सुनयनां दुःखार्तलोकाश्रयाम् ।।

लोके सौख्यप्रवाहिनीं सुललितां पुण्यप्रदां पावकाम् ।
वन्दे तां जगपालिकां सुवरदां श्री तारकां तारिणीम् ।।

अज्ञानामघमोचिनीञ्च धवलां श्वेताम्बरीं गौरजाम् ।
पुण्यापुण्यफलप्रदान प्रवशां श्रीश्रीमतां श्रीमतीम् ।।

कन्यारूपधरां धरां विदधतीं पूज्यां शिवां मातृकाम् ।
वन्दे मौक्तिकमालिकां विदधतीं गौरां प्रियां मातरम् ।।

शूलेनासुरघातिनीञ्च सबलां रक्ताधरां चण्डिकाम् ।
वक्षे शक्षसमुंडमाललसितां शोणप्रियां मर्दिनीम् ।।

देवानाँ कुलतारिणीमभयदां सर्वार्थसाध्यां शिवाम् ।
वन्दे पुत्रप्रदायिनीञ्च धनदां श्री शारदामम्बिकाम् ।।

चण्डीरूपधरां प्रचण्डवदनां कालीं करालीं पराम् ।
कैलासासनमण्डितां गिरिसुतां शैवालिकां श्यामलाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्गां पापविमोचिनीं भगवतीं वीणाप्रियां मोक्षदाम् ।
वन्दे तां गिरिजां गणेशजननीं ज्वालामुखीं सादरम् ।।

शक्तिं शक्तिप्रदां प्रशान्तहृदयां ताराञ्च वीणाप्रियाम् ।
चण्डां राक्षसघातिनीं सुखप्रदां शोणप्रियां चण्डिकाम् ।।

अम्बां भक्तिपरां विमुक्तहृदयां योगासने संस्थिताम् ।
वन्दे कार्तिकश्रीगणेश जननीं लास्य प्रियां पार्वतीम् ।।

— हिमाचल कला संस्कृति भाषा
अकादमी शिमला-१७१००१

★★

—।★★।—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो ! धन्या ! कल्पना चावला सा

(प्रो० हरिश्चन्द्र रेणापुरकरः गुलबर्गा)

धन्याधन्या परममहिता कल्पना चावला सा
या तेजस्विप्रिय भरतभूकन्यका शूरवीरा ।
प्रत्यागच्छन्त्य मितगगनाच्छोधयात्रां समाप्य
हा ! हन्ताद्ये फरवरिदिने यानभङ्गात्प्रणष्टा ।१।

हर्याणान्तर्गत लघुपुरे लब्धजन्मा सुधन्या
बाल्यादासीदतिकुतुकिनी ह्यन्तरिक्षे विहर्तुम् ।
ताराभिश्च प्रणयभरितां संकथां तं विधातुं
साऽऽसीन्नित्यं भगणविषये कौतुकाकृष्टचित्ता ।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवर्षां च प्रबलविमर्ति सानुरोधं निरस्य
मेरोर्नांटीकलसममहायन्त्रविद्या विभागे ।
आत्माजस्रप्रततविहिताखण्डसङ्कल्पयत्नैः
प्राप्य स्थानं समभवदसौ स्नातिका यन्त्रशास्त्रे ।३।

गत्वाऽम्रोकां तदनु निजकौशल्य बुद्धिप्रभावात्
सर्वोच्चां तां परमपदवीं शोधशास्त्रेऽधिगम्य ।
नासासंज्ञे ह्यमितगगनान्वेषकेन्द्रे प्रविष्टा
तत्र प्रत्याशिषु च शतशो घोषिता शोधयात्री ।४।

पूर्ति तस्या अगमदिह सा दीर्घकालाभिलाषा
मुक्ताकाशे विहरणपरं कांक्षितं चाद्य तस्याः ।
पूर्तिं यातं प्रथममिह सा चान्तरिक्षं प्रयाता
प्रत्यागम्य प्रकटितवती हर्षमेवातिमात्रम् ।५।

तज्जिज्ञासाऽप्यमितगगने दीप्ततारागृहाणां
गूढं ज्ञातुं ह्युपचितिमगादद्ययात्रा प्रसंगात् ।
अज्ञातस्याकलनविषये मानवस्याभिलाषा
विज्ञानस्य प्रभवतितरां कारणं चाद्यमेव ।६।

मेदिन्याकर्षणविरहिते ह्यन्तरिक्षे मनुष्ये
का स्याद्वासायनिकविकृतिर्नूनमित्येव बोद्धुम् ।
यानं कोलंबियनिगदितं शोधवीरैः समेत —
मष्टाविंशे समय इह तत् प्रेषितं चान्तरिक्षे ।७।

सर्वं चावश्यकमवगमं यात्रिवीरैः संगृह्य
नासाकेन्द्रं प्रहितमभवद् ह्यद्भुतं चैव तत्र ।
यानं होरा द्वययुगमितं मीलवेगेन धावद्
आपदग्रस्तं अहह ! सहसा यात्रिवीराश्च नष्टा ।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यानारूढा निकटमगमच्चन्द्रतारग्रहाणां
नक्षत्राणां सविधमभवद् वस्तुमस्या मनीषा ।
प्राप्यानन्तं विपुलगगनं किं न तस्यांशमेव
स्यामित्येतत् तदभिलषित पूर्णतां यातमन्ते ।९।

दुष्प्रेक्ष्यान्धे तमसि विलसद्दीप्त विद्युद् यथाऽसौ
कृत्वा लोकान् प्रतिहतदृशो लीयते च क्षणार्धं ।
विद्युत्कल्पा क्षणविलसनात् कल्पना चावलाऽपि
हर्षाश्चर्याकुलनिजजनान् संविधात्री विलुप्ता ।१०।

षट्त्रिंशेऽसौ शरदि वयसो व्योमयात्रां यदा वा
उड्डीयायात् प्रथममिह सा ह्यन्तहीनान्तरिक्षम् ।
हर्षोल्लासो भरतविषये नूनमासीत् प्रचण्डो
यस्मादेका भरतमहिला शोधयात्रां गताऽऽसीत् ।११।

यात्रार्थं सा पुनरपि वृता प्रेषिता चान्तरिक्षे
अन्यैः षड्भिः परमसफलां शोधयात्रां समाप्य ।
प्रत्यायान्ती निधनमगमद् यानभङ्गात्समस्तै—
स्तस्मात्सर्वो भरतविषयः शोकसिन्धौ निमग्नः ।१२।

नूनं तस्या अमितविपुलप्रसृसद्योजिगीषा
तस्याश्चन्द्रोपरि जिगमिषा तत्र वस्तुं मनीषा ।
ताराज्योतिः सह लिलपिषा तत्र तस्या चिरंसा
हीर्षाऽसूयान्वितनियतिना खण्डिता मध्य एव ।१३।

तस्या एतत् परमविकटं साहसं दिव्यभव्यं
तस्या निर्धारितनिजदृढस्वप्नसकल्पपूर्त्यै ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घोद्योगो निरतिशयिता ध्येयनिष्ठाऽभियोगो
नूनं सर्वान् नवयुवजनान् प्रेरणादायकः स्यात् ।१४।

तस्यै पूर्णविशालभारतभुवि श्रद्धाञ्जलिर्ह्यर्पिता
नूनं भारतसंसदापि विनता भावाञ्जलिर्ढौकिता
नैकैर्मानपदैश्च शासकजनैः सम्मानिता कल्पना
नानोपायन पारितोषिकततिस्तस्या स्मृतौ घोषिता ।१५।

— जेवरगीनिवास। हाँटेल परिवारस्य पृष्ठतः
स्टेशन मार्ग, जि० गुलबर्गा (कर्णाटक) ५८५१०२

ॐ

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं। —व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी, दिल्ली सरकार
प्लाट न. ५, झण्डेवालान, करोल बाग, नई दिल्ली ५

'अखिल भारतीय संस्कृत लघुकथा संस्कृत लघु नाटक लेखन प्रतियोगिता २००३'

दिल्ली संस्कृत अकादमी अखिल भारतीय स्तर पर संस्कृत विद्वानों एवं विदुषियों से संस्कृत भाषा में लिखित लघु कथा/लघु नाटक पुरस्कारार्थ आमन्त्रित करती है। दोनो विधाओं में रू. १०००-, रू. ९००/-, रू. ८०००/-, रू. ७००/-, रू. ६००/-, रू. ५००/-, रू. ४००/-, रू. ३००/ के क्रमशः आठ आठ पुरस्कार होंगे। इसके अतिरिक्त, रू २००/— के छः छः पुरस्कार प्रोत्साहन स्वरूप प्रदान किये जायेंगे।

प्रतिभागी लेखक निम्नलिखित दिशा निर्देशों को दृष्टि मे रख कर ही अपनी रचना भेजें।

- कथा/नाटक स्वयं की मौलिक रचना होनी चाहिये।
- कथा/नाटक कम से कम ४ पृष्ठों में टंकित रूप में होना चाहिये।
- कथा/नाटक का कोई भी अंश राष्ट्र विरोधी तथा व्यक्तिगत आक्षेप युक्त नहीं होना चाहिये।
- कथा/नाटक बालोपयोगी तथा शिक्षाप्रद होना चाहिये।

रचना जमा करने की अन्तिम तिथि ३०.४.२००३ है। अंतिम तिथि के पश्चात् प्राप्त रचना प्रतियोगिता में सम्मिलित नहीं की जायेंगी।

— डा० श्रीकृष्ण सेमवाला
सचिव

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जयति भारतवर्षदेशः

– आचार्य भगवद्दत्त मिश्रः विनयी

★★

पूर्वपश्चिमयोरुदधिना दक्षिणोत्तरयोश्च गिरिणा
बद्धसीमः परमरम्यो भारतं मधुमयो देशः ।१।

यस्य पूर्वा परौ जलधी पदं क्षालयतो निरवधि
स देवात्मा यदुत्तरदिशि शैलजा जनको नगेशः ।२।

कृतप्राचीप्रभासर्गः दलिततरुणतमिस्रवर्गः
यत्र यं भूपयति पूर्वं करैः स्वर्णमयैः दिनेशः ।३।

भारतीय द्विजसकाशात् मानवाः शिक्षन्ति साक्षात्
पवित्रं स्वं चरित्रं भुवि धन्य आदिगुरु हि देशः ।४।

यस्य रत्ने द्वे प्रसिद्धे नियतिदत्तेऽयत्नसिद्धे
संस्कृतं संस्कृतिश्चैव पृच्छ्यते किं तद् विशेषः ।५।

यत्र रे रामावतारः क्षपित भूमीभूरिभारः
यच्छरस्य शरव्यमाप्याशराणामिह कथाशेषः ।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र रे कृष्णावतारः देवकी वसुदेवसारः
सरसतो रिवन्मुदो हरी नन्दनयननलिनदिनेशः ।७।

अहिंसा करुणंकसारः यत्र भुवि बुद्धावतारः
यः सहज वलिकर्म निन्दन् दयाशान्ति सन्दिदेश ।८।

यत्र रे राणाप्रतापः विहित मुगल विशेषतापः
स्वीकृतं न तदाधिपत्यं वपुषि यावत्प्राणशेषः ।९।

यत्र शूरः शिवाजीवः तृणायितावरंगजीवः
अमित साहसशौर्यशाली मन्यते ह्यपरो महेशः ।१०।

यत्र भुवि गान्धीमहात्मा स्वदेशस्य कृते हुतात्मा
अहिंसा सत्ये यदीयौ खेटखड्गौ मुक्तदेशः ।११।

यत्र राजेन्द्र प्रसादः राष्ट्रपतिपदमाससाद
प्रथममिहतन्नात्र चित्रं स्वतोनाम्ना सराजेशः ।१२।

यत्र रे भारतविभूतिः स्वर्गतो मोतीप्रसूतिः
श्री जवाहरलाल इड्यो यस्य रे चिर ऋणी देशः ।१३।

यत्र लालवहादुरोऽपि नेहरूत्तरदायरोपी
जय युवक जय कृषाणेत्थं यदीयालापो विशेषः ।१४।

श्री जवाहरलाल कन्या इन्दिरागान्धीह धन्या
अलं कुर्वन्त्या प्रधानं मन्त्रिपदमित ऐशदेशः ।१५।

— जयति भारतवर्षं देशः

★★★

— डालटनगंज
पलाम् (झारखण्ड)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वोपरिमानवो मानवोपरि मानवोऽन्यः

— आचार्य भगवद्दत्त मिश्रः

❀❀

कश्चिदंकुशहस्त-हस्तिपकमस्तको हस्ती स्ववलावलेपाद् गज निमीलिकया पथि पथिकानपरानवधीरयन् पतन्नासीत्। तदानीं तं प्रेक्ष्य साट्टहासं कश्चिद् दूरात्प्राहद्विरद ! तालोत्तुङ्गतनुस्त्वमीयान् वलवांश्च शिलातलोपमे स्वशिरसि त्वत्पददघनयितवपुष्कं वहमानस्तत्सृणिमारं च सहमानस्त्वं किं न हास्यास्पदंपदमुपैषि। धिक् तवाखर्व गर्वम्। यमदूतस्य वचो निशम्य मत्तगजः पप्रच्छ-अरे गजराजमाक्षेप्तु कामो विधिवामो नाम कस्त्वम् ? मदीये ह्यस्वेऽक्षिणी निरीक्षितुकामे त्वां पुरत आगच्छ, उपसृत्य पुरतः परेतराड् दूतो देवं निगद्येऽहमिति सदर्पमब्रवीत्। परेतेषु मृतेषु राजते तस्य परेतराजो दूतोऽहमित्याकर्ण्य करीन्द्रो विहस्यावादीद् यदि तव स्वामी एव निधनमुपेतेषु निष्प्राणेषु राजते तदा तदधीनस्यातिदीनस्य दूतस्य तव का कथा। शवानां स्वामिनस्त्वं दूत इति सम्प्रति सत्यं ज्ञातम्। नूनं महाप्राणवतो मानवस्य वृत्तेन याथा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थ्येन अनभिज्ञ स्त्वमत एव मामित्थमाक्षिपसि ! तव कार्यं तु शवप्राणां प्राणिनां यमपुरीं प्रापणम् । अस्तु मयोह्यमानो मानवो न केवलं ममो. परि प्रत्युत सर्वोपरि शक्तिमान् । एतस्य महामानवस्य महामानवस्य महत्त्वेन यदा त्वं विदितो भविष्यसि तदा स्वयमाक्षेपकर्मणो विरामो नान्यथा तवेति । बुद्धिबलशालिनो मनोरपत्यस्य महामानवस्य मर्मविग. त्यैव मत्पादमात्रायतलघुविग्रहमपि हस्तिपकमेनमाग्रहेण स्वशिरसा बहामीति नात्र संशीतिलेशः किं ज्ञास्यसे रहस्यं मानवस्य त्वम् ? यदि यदि तव मनो मद्वचसा प्रतीतिं नोपयाति चेद् व्रज यमराज-राजधानीं निवेदय च स्व स्वामिनं भुवस्तलस्य मानवस्योदन्तेन । दन्ताबल वाग्वाण. विद्धो दूतः सत्वरं यमसदनमासाद्य चतुष्पदेन द्विपेन संजातवृत्तं विस्तरेणा. वर्णयत् । शमनोऽपि दूत वचोनिशम्याश्चर्यचकितोऽचक्थद् दूत ! यद्येवं तर्हि त्वरित याहि यमलोकतो भूलोकं ततश्चानय महामानव द्रष्टुकामो. ऽहमस्मत्तो बलीयान् कोऽस्ति मर्त्यलोके का चाभूतपूर्वा विशेषता तन्म. र्त्य । व्याघ्राघ्रात इव कान्दिशीकोऽधुना लक्ष्यसे त्वम् । यथा ज्ञापयति देव ! दूतोऽपि द्रुतगत्यागान्मर्त्यलोकम् । यत्र कस्यचिदासन्नमृत्यो मान. वस्य द्वारदेशमुपेत्याह अस्ति कश्चिद् द्वारदेशमुपेतस्य मम वचः श्रोतु. कामः ? गृहस्वामी निर्गत्यागदत – को भवान् दिव्यरूपोऽदृष्टपूर्वः । कि. ञ्चागमन कारणमत्र भवतो भवतो मम द्वारि । जिज्ञासापिपासां शम. यन् सुमनोभिरहं शमनदूतो गंध इति जगाद । त्वां यमपुरीं नेतुकाम. या द्वारप्रान्तमुपाक्रान्तः । परं घण्टाद्वयस्य विलम्बस्तवमृत्यौ सम्प्रति घण्टाद्वयायुष्य स्त्वम् । यदि घण्टाद्वयात्पूर्वमेव यमपुरीं यातुकामाय तुभ्यं सर्व मनोवाञ्छितमैहिकं वितरिष्यते । ब्रूहि – घण्टाद्वयात्पूर्वं किं प्रस्थातु. कामः ? क्षणं विचार्य गृहस्थवीरः स्थविरोऽभाषत देवदूत ! – कुटुम्ब. कदम्बो नितरां निःसत्वश्च तदभरणपोषणनिर्भरभारो भमैव शिरसि तदपाश्रभारो मामन्यत्र यातुं क्षणमपि गृहं विहातुं नैवादिशति पूर्णतः परतन्त्रोऽहं तत्र गन्तुमतस्तदन्यद्वारंकपाटघटितं पीडय । व्यर्थवार्तया. ऽलं मदीयं बहुमूल्यं क्षणं न नाशय साञ्जलिरर्थयामि । मुहूर्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलम्ब्य मुहुरवोचत्—देव ! यदि ममैव तत्र निनीषा चेन्मदीयशिरस्थ-भारमपनीयाहं नेतव्यो भवता। दूतोऽपि दौत्यकर्मकिलैव श्रामित्युक्त्वा तस्मै स्थविराय तच्छिरार्थभारापनोदिनीं सम्पदमदितं साग्रश्च न्यवेदि आशु साकं नाकं गन्तुम्। इतपुरस्सरं प्रस्थातुमनसं पितृपतिं पुरं पितरं पुत्रा प्रोचुः अस्मत्कृतेपितः ! सर्वं कृतं किन्तु स्वात्मने स्वर्गफलाय न किमपि सुकृतमाचरितम्—श्रूयते स्वर्गकामाय गोदानमावश्यककर्मांतो गोदानं विधायैव पृस्थातुकामेन भवता भवितव्यमिति मन्मतिः। सुता-ग्रहगृहीत चेताः पिता निजगाद-क्षिप्रं गामानय। सुन्दर स्वस्थ धेनोर-नुसन्धाने विलम्बोऽपि सम्भवोऽतो नेदीयसि प्रतिवेशि वेश्मनि दृष्टपूर्वा यद्यप्यतीतप्रसवसमया परं स्वगृहमेव समया धेनुः कांचिद् द्रुततरं तामे-वादायागच्छ। तद्वारोपरान्तेऽन्तिकंनाकस्य पृस्थानम्। तथानुष्ठिते शभनदूते तेन सार्थं सार्थमना मानवो धर्मराजपुरीमुपागमत्। पूर्वंवाद-तवृत्तो धर्मराजस्तमवलोक्य चित्रगुप्तमाददेश मानवस्य चित्रित गुप्त चित्रदर्शनाय। आश्चर्यं चकित्त चित्तश्चित्रगुप्तोऽयंकथन्नाथ ! ममाभि-लेखे नास्य कोऽपि सुकृतोल्लेखो लक्ष्येत क्षणं विलम्ब्य आम् अगमन वेलायां सुकृतनाम्नि कृतधेनुदानस्य क्षीणोल्लेखोऽभिलक्ष्यते। गोदान दत्तगोरपि घण्टाद्वयायुष्या सापि घण्टाद्वयानन्तरमुपारमत। तत्सर्वमा-कर्ण्य कृतान्तः स्वर्गतं मानवं प्रति सरुषाभाषत कृतघ्न ! दुर्लभदेहमवा-प्यापि त्वया न किमपि सुकृतकर्म कृतं धिक् तव साधवनं जीवनम्। पुत्राग्रहेण कथं कथमपि प्रदत्ता घण्टाद्वय द्वयसायुष्या धेनुरियमिह प्रस्तु-ता तवाग्रे। इयं यथेच्छं स्वेप्सितं याचितुं यतस्व घण्टाद्वयवेला च नाति-क्रमणीयेति। ततो महामानवस्य पुरतो वार्धक्याधिक्यवर्धितविशाल-विषाणा धेनुरक्षिपथभवतरिता। तां निपुणं निरीक्ष्य निजगाद नर पुंगवः। मा धेनो ! यदीह मम पूर्वकृतपरिणामस्त्वमेवासि चेदहं यदिह वच्मि तत्तथैवमनु तिष्ठ—पूर्वं स्वोत्तुङ्ग शृंगशिखरे शमन महाराजगुप्ताय निर्भयं स्वनंमसि तरंगायस्व। शृंगान्तरे लम्बमानो भीत भीतो यमरा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जो मामेव मामेवं विवीयतामिति व्यग्रमनाः पुरुष पुंगवं प्रावोचत्- भटा. मानव क्षन्तव्यमज्ञातत्वन्महत्त्वस्य ममागो गो शृंगादवतारय तरसा मामितो नाहं कञ्चित्पुरुषं प्रति परुषवाग् भविष्यामि । क्षमादान प्रत्युपकारे तुभ्यं सर्वं मनोऽभलषितं प्रदत्तम् । तात ! का याञ्चा याचनात् मानवोऽपि सफल छलछद्मछन्दो ययाचे मम निखिलं दुष्कृत सुकृते स्वल्पायु दीर्घायुषि परिणतं स चिरं जीवी भूत्वा भुवस्तलमुपेत्य बान्धवैः समं शम लभेयेति । भीतो यमुनाभ्राताऽपि त्वरया तद् याञ्चां पूरीकृत्य भूयो भवं प्राहिणोत् । समवर्तिना सम संघटितंतदखिलं वृत्तं विद्युदिव यमपुरिं प्रसृतम् । तत्र कोणेकस्थः कृतान्त किंकरोऽपि निर्निमेषः पूर्वांतंकितो — हा हा महाराज । पूर्वमेव चतुष्पदद्विपवार्तां नवेदितवानासम् । धर्मराज उवाच— सत्यम् । तवोदिते वचसि तदानीं दीर्घदर्प दंदशूक दष्ट नष्टविवेकी नाहं विश्वासं यस्य फलमिदमनर्थमरमनुभूतम् । करीन्द्रेण सत्यमेव कथितंस्त्वं यत् सर्वोपरि मानवो मानवोपरि मानवोऽन्य इति ।

—।★★।—

— डालटनगंज,
पलाम् (झारखण्ड)

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी, दिल्ली सरकार
प्लाट न. ५, झण्डेवालान, करोल बाग, नई दिल्ली ५

अखिल भारतीय संस्कृत शोध निबन्ध लेखन प्रतियोगिता २००३

दिल्ली संस्कृत अकादमी संस्कृत भाषा के लेखकों, विद्वानों, पत्रकारों और शिक्षकों से 'अखिल भारतीय स्तर पर संस्कृत शोध निबन्ध लेखन प्रतियोगिता" हेतु "संस्कृत वाङ्मये कृषिविज्ञानम्" विषय पर लिखे जाने वाले निबन्ध की "संक्षिप्त रूपरेखा" (सिनोपसिस) आमन्त्रित करती है। जिन लेखकों द्वारा भेजी गई शोध निबन्ध की रूपरेखा स्वीकृत होगी उन लेखकों से अकादमी विस्तृत शोध निबन्ध आमन्त्रित करेगी। लेखकों से निवेदन है कि शोध निबन्ध से सम्बन्धित नियमो तथा पुरस्कारों के निम्नलिखित विवरण को दृष्टि में रख कर ही निबन्ध की रूपरेखा भेजें'

नियमः—

★ निबन्ध संस्कृत भाषा में होना चाहिये।
★ निबन्ध संस्कृत वाङ्मय में स्थित तथ्यों पर आधारित होना चाहिये।
★ निबन्ध कम से कम २५० पृष्ठों का होना चाहिये।
★ निबन्ध विद्युत टंकण मशीन के अक्षरों में १३ १/२ % ८ १/२ साईज कागज पर टंकित होना चाहिये।

शोध निबन्ध की रूपरेखा की स्वीकृति के पश्चात् अन्य नियमों से अवगत कराया जायेगा।

पुरस्कारः—

१. प्रथम पुरस्कार रू १५,०००/-
२. द्वितीय पुरस्का रू. २०,०००/-
३. तृतीय पुरस्कार रू. १५,०००/-

शोध निबन्ध के विषय से सम्बन्धित "संक्षिप्त रूपरेखा" प्राप्ति की अंतिम तिथि ३०-५-२००३ है।

— (डा० श्रीकृष्ण सेमवाल) सचिव

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तयः सार्वभौमिका सर्वकालिकाश्च

– शीलादीक्षित

★★

६-२-०३ संस्कृत साहित्यं मानवस्य क्रमिक विकास इतिहास रूपम्। अनेकैः मनीषिभिः संस्कृते साहित्यनिर्माणमकारि। एषु विविध संस्कृत साहित्येषु मानवकल्याणस्य विकासस्य च अनुभूतयः सूत्ररूपेण व्यापिताः। एतत् सूक्तिसाहित्यं भवति। प्रत्येकसूक्त्याः स्व प्रभावो भवति। देशकालसीमातिक्रमणं कृत्वा सूक्तयः सर्वभौमिक्यः सर्वकालिक्यश्च भवन्ति। एतत् सर्वं दिल्लीराज्यस्य मुख्यमन्त्रि श्रीमत्या शीलादीक्षितया कथितम्। दिल्ली प्रशासनस्य संस्कृतपरिषदा (अकादमी) रामायणखण्ड-सूक्ति पुस्तकं प्रकाशितम्। अस्य पुस्तकस्यापि लोकार्पणं कृतम् तया वसन्तपञ्चमी अवसरे मथुरारोडस्थिते स्वकीयावासे। बालमीकिमहर्षेः छवि रतुलनीया अकथनीया च वर्तते। (अकादमी) परिषदा रामायणस्य सूक्तीनां संस्कृत-हिन्दी-अंग्रेजी भाषासु प्रकाशनं कृत्वा महनीयं कार्यं कृतम्। अनेन लोकाः अधिकमात्रायामाभिः लाभान्विता भविष्यन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतत उक्त्वा स। सर्वेभ्य: वसन्तस्य शुभकामना। प्राकटयत् वसन्तागमेन साकं च भारतस्य समृद्धिमकामयत्। साहित्यस्य श्रेष्ठतां प्रकटयन्ति सूक्तय: इति कुलानन्द भारतीयेनोक्तम्। (अकादमी) परिषदा सचिवेन उक्तम् यत् प्रायेण संस्कृतसाहित्यनिबद्धसूक्ति ग्रन्थप्रकाशनकार्यं परिषदा क्रियते। अनेन लोकानामुत्साह वृद्धिर्भविष्यति। रामायणखण्डा एतादृशा परिषदा प्रकाशिता त्रयोदशतमः खण्डा अस्ति। अस्मिन् वाल्मीकिरामायणगता। पञ्चशत सूक्तय: सन्ति। वाराणस्या श्री नागेन्द्रपाण्डेयाप्रासां सङ्कलनमकरोत्। मुख्यमन्त्रिण: संसदीयसचिवेन श्रीरमाकान्तगोस्वामिना भणितं यत सूक्तय। मानवजीवनेन सह गम्भीररूपेण सम्बद्धा:। मुख्यमन्त्रि महाभागाया: मंगलाचरणेनाभिनन्दनं कृतम्। श्री नागेन्द्रस्य च पुष्पगुच्छ शालसंस्कृतसाहित्यदानेन सम्मानं कृतम्।

पंच संस्कृतनाटकानां मञ्चनम्

७-२-०३ दिल्ली। अत्रत्य संस्कृत (अकादमी) परिषदा विद्यालयस्तरे पञ्चसंस्कृतनाटकानां मञ्चनं कृतम्। पूर्वशिक्षामन्त्री (दिल्लीराज्यस्य) श्री कुलानन्द भारतीय: मुख्य अतिथिरासीत्। तेनोक्तम् अधुनातना विविध विद्या: संस्कृतसाहित्यात् प्रसूता:। संस्कृते प्रथमं पद्यमय साहित्यमायातम्। सहैव गद्यस्य प्रादुर्भावोऽप्यभूत। गद्यपय साहित्यादेव नाटकप्रादुर्भाव:। संस्कृत (अकादमी) परिषद् विद्यालयस्तरे नाटकानामायोजनं कृत्वा संस्कृतनाटकानामुपयोगितामधिकाधिक जना: जानीयु रिति लक्ष्य निर्धारयति। डा० श्रीकृष्ण सेमवालेनोक्तम् अस्मिन् वर्षे दिल्लीस्था: पञ्च महाविद्यालया। संस्कृतनाटकानां मञ्चनं कुर्वन्त: सन्ति।

आर. के. पुरम् स्थितेन भारतीविद्यालयेन 'संस्कृतोद्गारा' नाटकम् मञ्चितम्। संस्कृतभाषाया: पठनपाठने या सङ्कीर्णता दृश्यते तद्दूरीकरण प्रयासा अत्र कृता नाटकेऽस्मिन्। रमेशनगरस्थेन सर्वोदयकन्याविद्याल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन 'अन्धं राज्यं चपंटराजा" इति नामकं नाटकमभिनीतम्। राज्ञः प्रजायाश्च परस्परं कीदृशः सम्बन्धः एतदत्रनाटके प्रदर्शितम्। जाफरः पुरकलां स्थाने दिल्लीराज्ये स्थितेन सर्वोदय विद्यालयेन 'उन्मीलिते नेत्रे' नाटकं मञ्चितम्। अस्मिन् ग्रामीणस्तरे साक्षरतायाः महत्वं प्रतिपादितम्। आनन्दपर्वतस्थरामजसविद्यालयस्य प्रस्तुति राससीत् ईश्वरस्य कृत्यम्। अत्र साक्षरस्योपयोगिता प्रकटिता। राष्ट्रपतिभवनस्थ सर्वोदय विद्यालयस्य नाटकमासीत् 'रमणीया सृष्टिरेषा'। अस्मिन् पशुपक्षिणां माध्यमेन एकतायाः शक्तिप्रदर्शनं कृतम्। अत्र प्रथमादिक्रमेण पुरस्काराः प्रदत्ताः ६००/- ५००/- ४००/- ३००/- २००/- १००/- सान्त्वना ५०/-। अत्रानेक संस्कृतज्ञाः उपस्थिताः आसन्।

ऋतुवैज्ञानिका कालिदासाध्ययनं कुर्युः

... डा० कृष्णवालः

★★

दिल्ली ८-२-२००३ दिल्लीसंस्कृतपरिषदा (अकादमी) 'कालिदाससाहित्ये वृष्टिविज्ञानम्' इति विषयमवलम्ब्य एका संगोष्ठी आयोजिता। मंगलाचरणेनास्याः शुभारम्भः कृतः। दिल्ली वि० विद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षः डा० श्री कृष्णलालः कालिदासस्य मेघदूते वृष्टि सम्बन्धिवर्णनस्य विवेचनामकरोत्। स आह-चिरात् खलु भारतीयकृषिकर्म प्रायेण वर्षोपरि निर्भरः आसीत्। अस्ति चापि। वर्षणस्य चित्रणं कालिदासेन स्वकीये मेघदूतकाव्ये सुतरां कृतम्। सागरादुत्थित वर्षामेघाः हिमालयपर्वतेन सह सम्पर्कमवाप्य भारते वर्षणं कुर्वन्ति।

डा० सेमवालः श्रीकृष्णा (अकादमी) परिषदः सचिव कथितवान् यत् संस्कृतसाहित्यं केवल साहित्यमेव नास्ति अपितु गम्भीरचिन्तनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्पष्टं भवति यत् तत्र वैज्ञानिकचिन्तनं गुप्तमस्ति। कालिदासेन 'मेघदूते' मेघानां चतुर्धाविभाजनं कृतम्। तदनुसारं स दार्शनिकवैज्ञानिककाव्यमाध्यमेन एतेषां मेघानां दिशानां वृष्टेश्च उल्लेखमकरोत् रामजस महाविद्यालयस्य संस्कृतविभागाचार्येण डा० मोहनचन्द्रेण कालिदासग्रन्थेषु वर्णितमेघविज्ञानं सम्यक्तया संस्थापितम्। तेनोक्तम् कालिदासेन यां दिशां तद्ज्ञानीं प्रदर्शिता सा एव दिशा अद्यापि वर्तते वर्षामेघागमनस्य। श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृत विद्यापीठस्य उपाचार्या डा० कमला भारद्वाज कालिदाससाहित्ये वृष्टिविज्ञानसम्बद्धसर्वविदूनां विशदव्याख्यानमकरोत्। डा० प्रवेश सक्सेना, डा० धर्मा, डा० कुमुदिनी तथा प्रीति शर्मा प्रभृतिभिः संगोष्ठ्या विषयस्य वैज्ञानिक दृष्ट्या वर्णनं कृतम्। संगोष्ठ्या अध्यक्षता दिल्लीविश्व वद्यालयस्य संस्कृतविभागाचार्येण मोहम्मद इजराइल खानेन कृता। संचालनञ्च उपकुलसचिवेन श्रीगुलाबसिंहेन कृतम्।

—१००:—

अकाले दुःखदो मृत्युः

अस्माकं प्रियमित्रस्य आचार्याणां च प्रियशिष्यस्य, हि. प्र. भाषा विभागे विपाशापत्रिकायाः यशस्विसम्पादकस्य श्री तुलसीरमण शर्मणः सुपुत्रः कलाक्षेत्रेऽतितरां प्रगतिशीलः अकाल एव चतुर्विंशतिवर्षदेशीयः इह लोकं तत्याज। दिव्यज्योतिषः समस्तपरिवारः दुःखं प्रकटयति श्री रमणेन सार्कं चास्मिन् दुखदकाले शोकाकुलो वर्तते। भगवानाशुतोषः तस्मै सद्गतिं दद्यात् ओं शम्।

—।★★।—

-- केशव शर्मा

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घोषणा पत्र

दिव्यज्योति मासिक के सम्बन्ध में समाचारपत्र रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ के अधीन प्रकाशितव्य स्वामित्व सम्बन्धी तथा अन्य ब्योरे।

प्रारूप चार

१. प्रकाशनका स्थान ... भारतीविहार मशोबरा शिमला-१७१००७-(हि.प्र.)

२. प्रकाशनकी कालिकता — मासिक।

३. मुद्रक का नाम (१) प्रो० केशव शर्मा

(२) राष्ट्रियता — भारतीय

(३) पता...पूर्ववत्।

४. प्रकाशक का नाम (१) — पूर्ववत्

(२) राष्ट्रियता — ,,

(३) पता — ,,

५. सम्पादक का नाम (१) पूर्ववत्

(२) राष्ट्रियता ,,

(३) पता — ,,

६- स्वामी का नाम व पता — स्व० आचार्य रत्नकुमारी शर्मा, भारती विहार मशोबरा शिमला-१७१००७ (हि.प्र.)

मैं केशव शर्मा एतद् द्वारा घोषित करता हूँ कि ऊपर दिये हुए ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह०) केशव शर्मा

प्रकाशक—दिव्यज्योतिः मशोबरा, शिमला-७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० ज्येष्ठः ख्रीष्टाब्दः २००३ मई
वर्षम् ४७ अंकः ८

श्री देव्याः प्रातः स्मरणम्

Central Library
Gurukul Kangri University
Hardwar-249404 (U.A.)

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखीं चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चार्वाकदर्शने प्रमाणम्

– डा० शम्भु कुमार झा

☆☆

प्रत्यक्षप्रमाणवता नास्तिकशिरोमणिना वेदविरोधिना प्रोक्तं दर्शनं चार्वाकदर्शनं, लोकायतदर्शनं वा विद्यते । दृश्यते अनेन इति दर्शनम् । अनेन दर्शनेन परम्परायाः सर्वे[1] सिद्धान्ताः विखण्डिताः । अस्य दर्शनस्य पूर्वपक्षरूपेण मतस्य स्थापनं कृतं विद्यते आचार्यैः । जडवादः, भौतिकवादः नास्तिकवादः, स्वेच्छाचारः, अथवा कामाचारवादः, लोकायतवादः, लोकायतिकवादः प्रभृतिशब्दाः चार्वाकदर्शनस्य पर्यायत्वेन व्यवह्रियन्ते ।

चार्वाकस्य दार्शनिकसिद्धान्ते जडतत्वस्यैव स्थानं वर्तते । अस्य सिद्धान्ते-पृथिवी-अग्नि-जल-वायवः चत्वारि तत्वानि प्रमेयरूपे स्वीकृतानि । एतेषां तत्वानां सम्मेलनेन विशेषविधिना स्वभावत एव चैतन्यस्योत्पत्तिः भवति येन प्रकारेण किण्वादि बीजानां संयोगेन मदशक्तिरागच्छति तथा ताम्बूलादिजडपदार्थानां संयोगेन यथा मुखे रक्तवर्णस्योत्पत्तिर्भवति तथा पश्यन्नेव जिह्वा रक्तवर्णिका जायते तथैव शरीरे चैतन्यस्य यथा चाह –

जडभूतविकारेषु चैतन्यं यत्तु दृश्यते ।
ताम्बूलपूगचूर्णानां योगद्रागइवोत्थितः । (१)

---

१ शंकराचार्यसर्वसिद्धान्तसंग्रहः । तथा च सर्वदर्शनसंग्रहे तत्र पृथिव्यादीनि भूतानि चत्वारि तत्वानि । तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यः मदशक्तिवत् चैतन्यमुपजायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थूलोऽहम् कृशोऽहम् इत्यादिवचोभिः कस्यापि अतीन्द्रियस्य आत्मनः सिद्धिर्न भवति अतएव सम्प्रदायोयं देहात्मवादी वर्तते ।

परलोकस्य स्थानं दर्शनेऽस्मिन् नावलोक्यते । यतोहि मृत्योरनन्तरं यदि अयमात्मा शरीरात् निर्गत्य (वहिर्भूत्वा) परलोकं गच्छति यदि इदं तथ्यं सत्यं तर्हि पुत्रपौत्राणां स्नेहेन आकृष्टो भूत्वा कथं न सम्मेलनाय पुनरागच्छति न चेदं श्रुतं न दृष्टम् । अनेनावगम्यते यत् परलोकः नास्ति अपितु कपोलकल्पितः वर्तते ।

सम्प्रदायेऽस्मिन् जगतः उत्पत्तिः 'सतां' न मन्यते सत् क्षणिकः अस्ति । यथाऽऽकाशे दृष्टोमेघः सद्य एव विनष्टो भवति अर्थात् मेघः आकाशे सर्वदा एकस्मिन् स्थले न भवति अतः असद्वादी सम्प्रदायोयम् । प्रत्यक्षमेवप्रमाणम् । प्रत्यक्षप्रमाणेन ईश्वरस्य प्रत्यक्षी करणं न सम्भवति । अनुमानादीनि प्रमाणानि भ्रान्तिमूलकानि तथा प्रत्यक्षे (प्रत्यक्षम्) आधारितानि विद्यन्ते दर्शनेऽस्मिन् ईश्वरस्य सत्ता न स्वीक्रियते ।

अत्र कामाचारस्य विशिष्टं स्थानं दृश्यते । अस्यानुसारं प्रत्यक्षेन्द्रियसुखोपभोगे एव मानवसमाजस्य चातुर्यं कल्याणञ्च भविष्यति । दुःखविमिश्रितेनापि समुपलब्धस्य सुख्य त्यागः नैव करणीयः तथा यो हि सुखं दुःखजनकं मत्वा त्यजति स मूर्खः अस्ति । यथा–मत्स्याशी मत्स्य भक्षणकाले कंटकं विहाय मत्स्यमेव गृह्णाति तथैव दुःखमयमपि सुखं न त्याज्यम् विद्वद्भिः सुखमवश्यमेव भोक्तव्यम् । कः जनः एतादृशः अस्ति (भविष्यति) यो हि तुषामयं धान्यं दृष्ट्वा तुषस्य त्यागं करिष्यति यथा च—

त्याज्यं सुख विषयसङ्गमजन्मपुंसां
दुःखोपसृष्टमितिमूर्खं विचारणैषा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रीहीञ्जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान् हितार्थी ॥ (१)

सारांशतया वक्तुं शक्यते देहातिरिक्तस्य आत्मनः सत्ता नास्ति । देहस्य नाशः अवश्यमेव । देहेनाशे सति कर्मणः नाश । तपश्चरणं व्यर्थम् । ऋणं कृत्वापि घृतपानं विधेयम् । ऋणस्य परावर्तनं न कर्त्तव्यम् मरणानन्तरं पुनः शरीरस्यागमनं न भवति । अतो हेतो आनन्दपूर्वकं जीवनं जीवनाय स्वेच्छाचरणं कामाचरणं च कर्तव्यम् ।

प्रमाशब्दस्यार्थो वस्तुनः यथार्थं ज्ञानं भवति । यद् वस्तु यादृक् अस्ति तस्य ज्ञानं तादृक् कर्त्तव्यम् । यथार्थानुभवः प्रमा इति तर्कभाषायामुक्तम् । यथा कोऽपि मनुष्यः यदि बालुकामयं क्षेत्रं दृष्ट्वा बालुकामयमेव जानाति तदेदं ज्ञानं प्रमा कथ्यते । यदि च संशयवशात् भ्रमवशात् वा तत्क्षेत्रं जलमयं जानाति तदेदं अप्रमा इति ।

प्रमातुः अर्थो भवति 'ज्ञाता' । ज्ञानस्य क्रिया कस्मिन्नपि जीवे व्यक्ति विशेषे भवति । ज्ञातारं विना ज्ञान न सम्भवति अतएव ज्ञाता एव ज्ञानविशेषस्य आधारः अस्ति स एव प्रमाता अस्ति । यथा—

यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः सः प्रमाता । प्रमातृत्वं च प्रमासमवायिकत्वम् योऽर्थं तत्वतः प्रमीयते तत्प्रमेयम् यथा घटपटादि सर्वं जगत् प्रमेयम् ।

प्रमाणम्—प्रमीयते अनेन इति प्रमाणम् । प्रमा शब्दात् 'कर्तृकरणयोश्च' इति सूत्रेण ल्युट् प्रत्ययः । प्रमायाः करणं प्रमाणम् । प्रमाता येनार्थं

---

१ सर्वदर्शन संग्रहः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमिणोति तत् प्रमाणम्। उदयनाचार्यस्य मते ज्ञातृविषयज्ञानयोर्मध्ये सम्बंधस्थापकं साधनं प्रमाणं कथ्यते। लोकायतदर्शने प्रत्यक्षमेव प्रमाणं प्रोक्तम्।

प्रत्यक्षप्रमाणम् – इन्द्रियार्थ सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्। अथवा इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् तद्विविधम् सविकल्पकं निर्विकल्पकं च। अथवा साक्षात्कारि प्रमाकरण प्रत्यक्षम्। आचार्येण श्रीमतागंगेशेन प्रत्यक्षस्य नवीनं लक्षण कृतमस्ति तद्ज्ञानं प्रत्यक्षमस्ति यस्मिन् कस्यापि अन्यस्य ज्ञानस्य करणरूपे अथवा साधनरूपे अपेक्षा न भवेत् ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् अस्यानुसारं प्रत्यक्षज्ञाने एव अन्यस्य करणस्याथवा साधनस्यापेक्षा नावलोक्यते परन्तु अनुमितौ व्याप्तिज्ञानं उपमितौ सादृश्यज्ञानं, शब्दबोधे पदज्ञानं तथा स्मृतौ अनुभवश्चं करणरूपे प्रयुज्यते। उपनिषदि ऋषेः कथनं वर्तते चक्षुषा गृहीतो विषयः सर्वथा विश्वसनीयः तथा सत्यञ्च भवति चक्षुरेव सर्वेषामाधारः। कृष्णमिश्रोऽपि प्रबोधचन्द्रोदये नाटके प्रत्यक्षप्रमाणमेव स्वीकृतवान्।

आचार्यवात्स्यायनस्य मते अनुमानादिभिः प्रमाणैः कस्यापि वस्तुनः संशयात्मकं ज्ञानं प्राप्यते परन्तु तस्य विवेचनीयस्य वस्तुनः साक्षात्कारो न भवति यथा एको विशिष्टो जनः उक्तवान् "पर्वते वह्निरस्ति। अनेन वाक्येन अस्माभिः ज्ञातं यत् पर्वतोपरि अग्निः वर्तते। इदं शब्दप्रमाणमस्ति परन्तु मनसि जिज्ञासा भवति यदि अग्नेः किमपि लक्षणं दृष्टिपथे प्रागमिष्यत् तदा शोभनं (विश्वासः) अभविष्यत्। सद्य एव धूमः दृष्टिपथे आगच्छति। धूमं दृष्ट्वाऽनुमीयते इदमेव अनुमानप्रमाणम्। परन्तु इदा-

---

1 यदर्थविज्ञानं सा पूमा तथा निर्विकल्पज्ञानं तु पूमा अपूमा तु एतद् बहिर्भूतमेव। न्याय कोशः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोमपि मनसि अग्नेः दर्शनस्याकांक्षा प्रबला वर्तते अर्थात् मनसि संशयः विद्यते । यदाऽग्नेः साक्षात्कारः क्रियते विश्वासो दृढो भवति तथाऽन्यस्य प्रमाणस्य साधनस्य वा प्रयोजनं नावशिष्यते । येन प्रकारेण सूर्यप्रकाशे अन्यस्य प्रकाशस्य प्रयोजनं न भवति तथैव प्रत्यक्ष दर्शने सति कस्यापि जिज्ञासा दिदृक्षा नावशिष्यते । अतो वक्तुं शक्यते प्रत्यक्षप्रमाणं स्वयं सिद्धं भवति । अत्र प्रमाणान्तरस्य लवावसरोपि न भवति । नैयायिकैः व्याप्तेः संबधं स्वीकृत्य अनुमानप्रमाणं स्वीक्रियते । एतेषां मते ये केचन धूमवन्तः पदार्थाः ते वह्निमन्तः सन्ति यथा पर्वतोऽयं धूमवान् अतएव वह्निमान् इति ।

बाहंस्पत्य सूत्रे "अनुमानमप्रमाणम्" इति उक्त्वा अनुमानस्य खण्डणं कृतम् । सामान्य संबन्धं विना अनुमान कर्तुं न शक्यते । सामान्य संबन्धस्य ज्ञानं प्रत्यक्षानुभवेन न भवति । अनुमानेनापि सामान्यसम्बधस्यज्ञानं न कर्तुं शक्यते तथा एकस्यानुमानस्य सिद्धये अन्यस्यानुमानस्य आवश्यकता भविष्यति तथा अनवस्थादोषप्रसंगः आपतति । अतएव अनुमानमयथार्थम् । यत्र यत्र धूमः तत्र तत्र वह्निः इति साहचार्यं नियमो व्याप्तिः । व्याप्तिरेवानुमानस्याधारस्तंभः विद्यते व्याप्तेरर्थो भवति व्याप्यव्यापकयोः साहचर्यसंबंधः । वाक्यान्तरेण वक्तुं शक्यते यत्र उपाधि हीनः संबंधः व्याप्तिः कथ्यते ।

यत्र यत्र धूमः इति वाक्ये अग्निधूमयोर्मध्ये व्याप्तिः संबधः वर्तते । अस्मिन्नेवाधारे वाक्येस्मिन् अप्रत्यक्षस्याग्नेः अनुमानं क्रियये । यत्र धूमोऽस्ति तत्रैवाग्निः । पर्वतोपरि धूमं दृष्ट्वा अनुमीयते यत् पर्वतोऽयं वह्निमान् । अनेन स्पष्टो भवति अनुमानेन प्राप्तस्य ज्ञानस्याधारः व्याप्तिः अस्ति ।

प्रत्यक्षप्रमाणेन व्याप्तिज्ञानं न भवितुमर्हति । प्रत्यक्षेण कालत्रयाणां (भूतभविष्यवर्तमानानां) सर्वेषां विषयाणां ज्ञानमसम्भवम् । प्रत्यक्षं बाह्यम् आन्तरं वा भवति) बाह्येन व्याप्तिज्ञानमसंभवम् । बाह्यप्रत्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क केवलं वाह्यइन्द्रियैः उत्पन्नमस्ति बाह्यप्रत्यक्षेण बाह्य वस्तूनां एव ज्ञानं कर्तुं शक्यते अतएव वर्तमानकालस्य विषये सम्भवो (सम्भवऽपि) भूत्वापि भूतभविष्ययोर्विषये तद्ज्ञानमसम्भवं भविष्यति। येन समवस्तूनां ज्ञापिका निष्कर्षभूता व्याप्तिरेव दुर्ज्ञेया भविष्यति। यत्र यत्र धूमः इति वाक्य सामान्य वाक्यं तदा स्यात् यदा समस्त धूम स्थानानां प्रत्यक्षरूपे परिनियुक्तज्ञानस्य प्रत्यक्षरूपे केनापि मनुष्येण एतत् सर्वमवलोकितं भवेत। इदमसम्भवं प्रतीयते। व्याप्तेः सिद्धौ पञ्चावयववाक्यानां प्रयोगः क्रियते। आन्तरेण प्रत्यक्षेणापि व्याप्तिज्ञानं असम्भवम्। यतोहि अन्तः करणं वाह्येन्द्रियाणामाश्रितं भवति अतएव तस्य प्रवृत्तिः बाह्यविषयेषु स्वतन्त्रतया न भवति—

'अन्तः करणस्य बहिरिन्द्रियतन्त्रत्वेन बाह्योऽर्थे स्वातन्त्रेण प्रवृत्यनुपपत्तेः। चक्षुराद्युक्त विषयं परतन्त्र बहिर्गमनः।"

अनुमान प्रमाणेनापि व्याप्तेः सिद्धिर्न भवति प्रकारद्वयेन अनुमानं क्रियते आगमनेन, निर्गमनेन च। व्याप्तेः सिद्धि र्न हि आगमनेन न च निर्गमनेन भवितुमर्हति। यदि अनुमानेन व्याप्तिः भवति तर्हि व्याप्तेः सिद्धये अन्यस्यानुमानस्य प्रयोजनं स्यात् पुनः तस्यानुमानस्य सिद्धये अपरस्यानुमानस्य आवश्यकता भविष्यति अनेन अनवस्था दोषः आपतति।

शब्दप्रमाणेनापि व्याप्तेः सिद्धिर्न सम्भवति। यतोहि वैशेषिक मतेन तस्यानुमाने अन्त र्भावः भवति। यदि शब्दप्रमाणा धारितेदमनुमानं तदा पुनः एकस्यानुमानस्य सिद्धये अन्यस्यानुमानस्य प्रयोजनं स्यात् तथा पुनः अनवस्था दोषः।

उपमानादि प्रमाणेन व्याप्तिज्ञानमसम्भवमेव। यथाहि—
उपमानादिक तु दुरपास्तम्। तेषां संज्ञा संज्ञि संबन्धादि बोधकत्वेनानोपाधि अपि सम्बन्धकत्वासंभवात्' चार्वाकस्य मते अनुमानस्य सिद्धौ व्याप्तेः सिद्धिरावश्यकी भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चार्वाकसाहित्यस्य कानिचित् सूत्राणि—

बार्हस्पत्यसूत्रम्

अथातस्तत्वं व्याख्यास्यामः (१) पृथिव्यप्तेजोवायुरिति तत्वानि तत्समुदाये शरीरेन्द्रियविषय संज्ञा (२) तेभ्यश्चैतन्यम् (३) किण्वादिभ्यो मदशक्तिवत् । ४) कामएवैकः पुरुषार्थः । ५) अनुमानमप्रमाणम् । ६) चैतन्यविशिष्टः कायः पुरुषः । ७) मरणमेवापवर्गः । ८) न धर्मश्चरेत् । ९) एष्यत् फलत्वात् १०) सांशयिकत्वाच्च (११) कोहयबालिशो हस्तगतं परगतं कुर्यात् (१२) वरमद्यकपोतः श्वोमयूरात् (१३) वर सांशयिकान्निष्कादसांशयिकः कार्षापणः (१४) शरीरेन्द्रिय संघात एव चेतनः क्षेत्रज्ञः (१५) काम एव प्राणिनां कारणम् (१६) परलोकिनोऽभावात् परलोकाभावः (१७) इहलोक परलोक शरीरयोर्भिन्नत्वात् तद्गतयोरपि चित्तयोर्नैक्यः सन्तानः (१८) एतावानेवपुरुषः यावदिन्द्रियगोचरः (१९) प्रत्यक्षमेवैकं प्रमाणम् (२०) प्रमाणस्यागौणत्वात् तदर्थं निश्चयो दुर्लभः (२१) कायादेव ततो ज्ञानं प्राणापानाद्यविष्ठिताद् युक्त जायते (२२) सर्वत्रपयनुयोगपराण्येव सूत्राणि बृहस्पतेः (२३) लोकायतमेव शास्त्रम् (२४) प्रत्यक्षमेव प्रमाणम् (२५) पृथिव्यप्तेजोवायुस्तत्वानि (२६) अर्थकामौ पुरुषार्थौ (२७) भूतान्येव चेतयन्ति (२८) नास्ति परलोकः (२९) मृत्युरेव पवर्गः (३०) दण्डनीतिरेव विद्या (३१) अत्रैव वार्त्तान्तर्भवति (३२) धूर्तप्रलापस्त्रयी (३३) स्वर्गोत्पादकत्वेन विशेषाभावात् (३४) लोकप्रसिद्धमनुमानं चार्वाकैरपोह्यत एव यत्तु कैश्चिल्लौकिकं मार्गमतिक्रम्यानुमानमुच्यते तन्निषिद्यते (३५) पश्यामि श्रृणोमीत्यादि प्रतीत्या मरणपर्यन्त यावतेन्द्रियाणि तिष्ठन्ति तान्येवात्मा (३६) इन्द्रियाद्यभावेऽसत्वात् मन एवात्मा (३७) प्राण एव आत्मा (३८)

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः ।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ॥ ३९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निहोत्रं त्रयोवेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुष हीनानां जीविका धातृनिर्मिता ।। ४०

पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति ।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते ।। ४१

मृतानामपि जन्तूनां श्राद्धं चेतृप्ति कारणम् ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम् ।। ४२

गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम् ।
गेहस्थकृतश्राद्धेन पथि तृप्तिरवारिता ।। ४३

स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्रदानतः ।
प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते ।। ४४

यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिवेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।। ४५

यदिगच्छेत् परं लोकं देहादेष विनिर्गतः ।
कस्मादभूयो न चायाति बन्धुस्नेह समाकुलः ।। ४६

ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह ।
मृतानां प्रेतकार्याणि नत्वन्यद्विद्यते क्वचित् ।। ४७

त्रयो वेदस्य कर्त्तारो भंडधूर्तनिशाचराः ।
जभंरीतुर्फरीत्यादि पण्डितानां वचः कुत ।। ४८

अश्वस्यात्र हि शिश्नन्तु पत्नीग्राह्यं प्रकीर्तितम् ।
मांसानां खादनं तद्वन्निशाचर समीरितम् ।। ४९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कण्टकानां प्रकरोति तैक्ष्यं विचित्रभावं मृगपक्षिणाञ्च ।
माधुर्यमिक्षोः कटुताञ्च निम्बे स्वभावतः सर्वमिदं प्रवृत्तम् ।। ५०

नग्न श्रमणक दुर्बुद्धे कायक्लेश परायण ।
जीविकार्थे विचारस्ते केन त्वमसि शिक्षितः ।। ५१

प्रत्यक्षादिप्रमासिद्ध विरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ।। ५२

लौकिको मार्गोऽनुसर्तव्यः । ५३

लोक व्यवहारं प्रति सदृशौ बालपण्डितौ । ५४

एतदतिरिक्तं बृहस्पति अर्थशास्त्रम् अस्ति ।
अत्र विस्तरभयात् अर्थशास्त्रं न विविच्यते ।



— व्याख्याता संस्कृतदर्शन एवं वैदिकाध्ययन
विभागस्य वनस्थली विद्यापीठ
टोंक, राजस्थान

★★



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जातः क्रिकेटमय एव समस्तदेशः

— आ० केशवराम शर्मा
दिव्यदीप टेंकशोड
सोलन हि०प्र०

❋❋

आबालवृद्धमहिलः सकलः समाजः
सर्वं विहाय निजकर्म निरुध्य चेतः।
मग्नो बभूव तु यथा सततं क्रिकेटे
स्तब्धं मनस्तदभिवीक्ष्य विचारभाजाम् ।१।

आतङ्किभिर्यदि हता नहि तत्र चिन्ता
निष्पीडिता यदि च नेतृभिरस्तु सर्वम्।
अस्मत् क्रिकेटदलमेतु जयं कथंचित्
चिन्तेयमेव सकलेषु जनेषु दृष्टा ।२।

कक्षा हि तत्यजु रधीतिपरा युवानः
पाकं जहुश्च महिलाः श्रमिकाः श्रमं च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तूर्णं वणिग्भिरखिलाः पिहिता विपण्य—
स्तस्थुः क्रिकेटसविधे खलु दत्तचित्ताः ।।३।

केचित् क्रिकेटविजयाय चरन्ति यज्ञं
पूजां परे सुरगणस्तवनं तथान्ये ।
एके विकेटपतने प्ररुदन्ति सास्रं
धन्या क्रिकेट ! महिमा तव वागतीतः ।४।

विद्यालयेषु नगरेषु गृहेषु चैव
सर्वोत्सवेषु निशिवोषसि वा दिवा वा ।
गोष्ठीषु दिक्षु च विदिक्षु च वाक्षु नित्यं
तारस्वरेण विततोऽस्ति क्रिकेटघोषः ।५।

यस्मै त्यजन्ति सुहृदामपि दूरभाषं
याने न यान्ति जहति ग्रहणं जलादेः ।
द्वारं पिधाय न मिलन्ति समागतांश्च
तस्यै क्रिकेटरुचये परितो नमोऽस्तु ।६।

★★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मकाण्ड प्रशिक्षण शिविरम्

हिमाचल संस्कृत अकादमीद्वारा प्रदेशे विभिन्नस्थानेषु कर्मकाण्डस्य साधु प्रशिक्षणार्थं प्रतिशिविरं प्रायः पञ्चाशत् जनानां कृते व्यवस्था क्रियते। गतशिविरे ऊनासुन्दरनगरयोरायोजने सम्पन्ने। पूर्वसप्ताहे सिरमौरमण्डलवर्तिनि बोहली निकट स्थाने श्रीविष्णुचैतन्य ब्रह्मचारिण आश्रमे कार्यमिदं सुष्ठुतया सम्पन्नमभूत्। तत्रहि त्रयस्त्रिंशत् छात्रेभ्यः कर्मकाण्डप्रशिक्षा प्रदत्ता। प्रशिक्षकेषु श्री विद्यादत्तशर्मा अकादमीपुरस्कारपुरस्कृतस्तथा देवेन्द्रशर्मा वेदोच्चारणज्योतिषवेत्ता इति द्वौ विद्वांसौ छात्रान् सम्यक् प्रशिक्षितवन्तौ। शिविरमिदं सप्तदिनपर्यन्तं प्राचलत्। तत्र संध्यादिनित्यकर्म, देवपूजनं पुरुषसूक्त श्रीसूक्तादि वेदमंत्रोच्चारणं विभिन्नकर्मसु मन्त्रोपयोगः सनातनसदाचारचर्यादि विविधविषयाणां ज्योतिषं चाधिकृत्य प्राथमिकं लोकोपयोगि ज्ञानं—इति सर्वं परमया निष्ठया प्रादीयत।

शिविरसमापनसमये च अकादम्या अध्यक्षाः श्रीमन्तः कृष्णचन्द महाभागा निर्वाचनायुक्ता समारोहस्याध्यक्षतामकुर्वन्। अकादमीसचिवाः श्री डा० हरिदत्तशर्माण स्तथा कार्यकारिपरिषत्सदस्याः श्री आचार्यं केशव शर्माण श्चापि सभामलमकुर्वन्। सर्वे रेव विद्वद्भिः प्रशिक्षार्थिनः प्रबोधिता यत्ते सविधि धर्मानुष्ठानेः समाजे कर्मसंस्कृतेः पावित्र्य शुद्धि च रक्षयेयुः। तेन हि समाजे नैतिकता सदाचारः भूयश्चान्ये राष्ट्रोत्थानानुगुणा गुणाः समुन्नति लप्स्यन्त इति।

-- आ० केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुफ्तीमुहम्मदविचित्रनीतिः

(हरिश्चन्द्ररेणापुरकरः, गुलबर्गा)

क्रिस्तैकविंशशतके शरदि द्वितीये
जाते च कश्मिरभुवो वरणे बभूव ।
मुफ्तीमुहम्मदसयीदसमाख्यनेता
पी. डी. पि. नायकवरः खलु मुख्यमन्त्री ।१।

तत्कन्यका महबुबेत्यभिधीयमाना
तस्यैव पक्षमुखरा निजगाद चित्रम् !
माध्यस्थ्यमेव ननु भारतशासनेन
कार्यं न पाकसहितं भुवि कश्मिरे वै ।२।

तस्या विरोधमपि नैव चकार मुफ्ती
सोऽप्यद्य कश्मिरभुवं नहि मन्यते किम् ।
अब्दुल्लशेख इव भारतवर्षभागं
स्पष्टं निरूपणमिहास्य विधेयमद्य ।३।

कश्मीरमस्ति सुतरां विषयः स्वतन्त्रो
नैवास्ति भारतभुवस्तदभिन्नमङ्गम् ।
इत्येव पी. डि. पि. दलस्य किमस्ति नीतिः
तस्माच्च घोषकितवाः खलु मोचिताः किम् ।४।

तस्याः समर्थकहुरीयतघोषजाल्मा
मुफ्तीमुहम्मदजनेन कृता विमुक्ताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पार्थक्यवादिनयनीति विरोध एव
कांग्रेसनायकवरैः करणीय आसीत् ।५।

पार्थक्यवादिविकरालविचारधारा
पक्षैर्बभूव सकलैः प्रतिरोधनीया ।
कांग्रेसपक्षमुखरैस्त्वनुमोदिता सा
नोचेतिषूदन विमुक्तिरशोत्स्यदेव ।६।

कश्मीरमस्ति भविता च सदैव नून—
मङ्गं ह्यभिन्नमिह भारतवर्षभूमेः ।
इत्यस्य घोरविपरीतविचारधारां
कांग्रेसनायकवरैरनुमन्यते किम् ? ।७।

विश्लिष्टकश्मिरविचारकृतेऽत्र पूर्वं
ह्यब्दुल्लशेख इह यैः सहसा निबद्धाः ।
तामेव घोरविकरालविचारधारां
संधारयद्भिरिह किं क्रियते युतिस्तैः ।८।

मुफ्तीमुहम्मदसयीदसमाख्यनेत्रा
सन्नोतशासन विमोचितजालमवृन्दात्
कश्मीरभीषणकरालतमोग्रवादो
वृद्धिं गतोऽस्त्यतितरामिति सत्यमेव ।९।

केन्द्रानुमोदनविनैव विमोचितास्ते
षड्विंशतिः प्रवरद्योरमहोग्रजाल्माः ।
यैर्घातिताः समभवन् शतशो ह्यपापा—
स्तेनैव घोरविकटा भविता समस्या ।१०।

आतङ्कवादिसह तस्य सहानुभूत्या
तेषां च साहसमपीह भजेच्च वृद्धिम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रस्यसैनिकमनोबलमेव तेन
क्षीणं भवेदति तथामिति निश्चितं वै ।११।

निष्पापनिर्मल निषूदनमुक्तिरूपः
स्पर्शोऽपि मुक्तिसमिदेन कृतः शमाय ।
कश्मीरवासिजनघोरवधाय जातोः
मिथ्योपचार इह रोगविवर्धनाय ।१२।

कश्मीरघोरविकरालमहासमस्या
कांग्रेस पक्ष कृतिरेव बभूव नूनम् ।
पाके पराभवपथे सति कश्मिरे तेर्
नीत्वा च राष्ट्र सदसं विहितः प्रमादः ।१३।

स्वातन्त्र्यदानसमये खलु भारताय
ह्याङ्लैः प्रवर्तितविधेरनुसारमेव ।
तत्रत्य भूमिपतिना हरिसिंहनाम्ना
कश्मीरमास घुषितं ननु भारताङ्गम् ।१४।

स्वाधीनमेव खलुतद् बलवद्विधातु—
माक्रान्तमेव किल कश्मिरमेव पाकः ।
घोरं रणं ह्यजनि भारतपाकमध्ये
भङ्गोन्मुखा च समभूत्खलु पाकसेना ।१५।

कालं च कञ्चिदिह चेत्समरोऽचलिष्य—
न्मुक्तं समस्तमपि कश्मिरमाभविष्यत् ।
रणाट्रीयनायकवरैस्तु जवाहरैस्तत्
संयुक्तराष्ट्रसदसं सहसैव नीतम् ।१६।

सद्यो बभूव विरतं समरं हि तेन
पाकै बलाद् निजवशे कृतकश्मिरं तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यापि पाकवशतो न बभूव मुक्तं
सत्ताधराष्ट्रकटुनीतिबलिर्बभूव ।१७।

पश्चाच्च शास्त्रिसमयेऽपि रणे द्वितीये
लाहोरयावदपि पाकविशालभागः ।
अस्मदबलेन विजितोऽपि विमोचितोऽभूत्
कश्मीरमुक्ति विषये न विधाय सन्धिम् ।१८।

तत्रैकसप्ततितमे शरदि प्रजाते
वङ्गीय घोरसमरे शरणं प्रपन्नाः ।
पाकस्य लक्षमितसैनिक नायकाश्च
ह्यासन्न कश्मिरविना खलु मोचनीया। ।१९।

इत्थं हि कश्मिरविवादमहासमस्या
कांग्रेससाहसिककार्यंबिपाक एव ।
बी. जे. पि. नायकवरैरपि नूनमद्य
तस्यानुवर्तिकृतिरेव विधीयते च ।२०।

★★

—जेवरगी निवासः हाटेलपश्चिवारस्य पृष्ठतः
स्टेशनमार्ग, गुलबर्गा २ (कर्णाटक)

★★

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीश्यामलाष्टकम्

– डा० सुरेन्द्रमोहन मिश्र:

❀❀

दिव्ये ! दिव्यमहोच्छ्रये हिमगिरेः शृङ्गे गुहायां हिते
दिव्यश्रीपरिराजिते सुकृतिनां शश्वच्छरण्ये शिवे ! ।
दिव्यादानप्रदानलक्ष्यविभवे भक्तेष्टवृष्टयूर्जिते
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ।१।

त्वं मे नैव दृशोर्विभासि जननि ! प्रायोऽस्मि तेनान्धकः
कृत्याकृत्य विवेकवञ्चिततया नो कौशलं मे भुवि ।
ज्ञानं भक्तिरथापि योग इति वा क्वेमे गुणाः स्युर्मयि
त्वाहं मातरम्वानमामि सततं श्रीपार्वति श्यामले ।२।

कुत्र त्वं कृताभ्रलिङ्गिनि गिरौ दुष्प्रापशृङ्गेऽटवी
कत्यङ्गानि च ते शिरांसि कति ते शस्त्रास्त्रसज्जा कराः ।
पादाः पद्मविकाससन्ततकृतिव्याप्याः कति श्रीक्षणे !
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ! ।३।

धन्ये ! धन्यगिरीशहासकुसुमप्रोद्भासिभालालके !
शर्वाणि ! स्मरदाहिगेहिनि ! त्वं स्कन्दहेरम्बसूः ।
त्वं शक्तिः समराङ्गणे विजयिनां धर्माजिरे दैत्यहा
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वाहं मुष्टिभरं यजा करुणया यातो जनिं मानुषीं
जाडयेऽपि प्रभु तेऽम्बकं क्वचिदसौ दृष्टया श्रियं सिञ्चति ।
तेनाहं चितिमान्कृती त्वदपरं तत्त्वं न जाने ततस्
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ।५।

विश्वे क्लेशमहासमुद्रनिवहास्ते वाडवाग्नीन्धना
नित्यं शान्तिरुपद्रुता सुखसरिच्छुष्का भयं सर्वतः ।
सर्वा आसुरसम्पदः प्रकटिता दैव्यो गुणोपितास्
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ! ।६।

धिन्धि भ्रान्तिमपि द्वितीयजनितां भिन्धि द्विषत्संयमं
योगक्षेमकरं पुनर्विजयतां धर्मं प्रजावत्सलम् ।
विश्वे विश्वगुरुत्वमेतु मुकुटं भूगोलके भारतं
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ! ७।

नाहं वेद्मि विशिष्टमन्त्रनिवहं जापं च वा दुर्गमं
पूजां नो न च होममक्षरचयस्याथोऽपि यन्त्रेऽर्चनाम् ।
मार्गं वेद्मि न लोककौशलविदां प्राप्त्यै खलु प्रेयसां
त्वाहं मातरमानमामि सततं श्रीपार्वति श्यामले ! ।८।

श्यामास्ते शिमलागिरीशशिखरास्तद्विश्वविद्यालये
प्राप्तः कार्यवशादयं तु पथिका स्थाणोः कुरुक्षेत्रतः ।
विश्वं दुःखमनन्तमाप्य सुधिया प्रारब्धवेगेक्षणात्
त्वायं पार्वति ! नन्नमीति शिरसा श्रीश्यामले ! पाहि माम् ।९।

—1001—

— D-१७, कुरुक्षेत्र विश्वविद्यालयः,
कुरुक्षेत्रम् ।

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-वाङ्मये खनिज-विज्ञानम्

– डा० श्रीमती इलाघोषः
प्राचार्या शा. कन्यामहाविद्यालय।
सिवनी-४८००६१ (मध्यप्रदेश।)

★★

'विज्ञानं वावध्यानाद् भूयो विज्ञानेन वा ऋग्वेदं विजानाति— देवविद्या भूतविद्यां— दिवं च पृथिवीं च वायुं चाकाशं च — सत्यं च—इमं च लोकममुं च विज्ञानेनैव विजानाति। विज्ञानमुपास्वेति ।।'

– छान्दोग्योपनिषद्, ७/७/१

उपनिषदः सन्दर्भोऽयं प्राचीन-भारते विज्ञानस्य महत्त्वं प्रतिपादयति। ज्ञान-विज्ञानयोः क्षेत्रे भा-रतोऽयं भारत देशः सभ्यतायाः उषःकालादेवाग्रणीरासीत्। वेदवाङ्मयं भारतवर्षस्य संस्कृतभाषा-निबद्ध-ज्ञानस्य महत्तमं स्रोतो यत् विज्ञान-राशित्वाद् 'वेद' इत्यन्वर्थ-संज्ञामावहति।

सृष्टि-विकासेन सहैव विज्ञानस्याविर्भावो मानवमनसस्तथा जिज्ञासयाऽभूत्, या खलु प्रेरयति धीमन्तं जनं सृष्टिरहस्यान्यवगन्तुम्। यथा प्रतिपादितं ऋग्वेदे—

'कोऽद्धा वेद कहिचदवोचत् कुत १ आजाता कुत इयं विसृष्टिः।'

---

१. ऋग्वेदः, १०/१२९/७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य समाधानमप्युद्घोषितं वेदैः। यथा—

'सुविज्ञानं चिकितुषे जनाय २।'

'ऋतस्य' वैज्ञानिक-नियमस्य ये तन्तवोऽस्मिन् विश्व-ब्रह्माण्डे विततास्।

यथा—

'ऋतस्य ३ तन्तुर्विततः पवित्र।।'

तान् सञ्चित्यैव ऋषिभिर्निहिताधारशिला विज्ञानस्य। वस्तुतस्साक्षात्कृतधर्माण ऋषय एव विश्वस्य प्रथमे वैज्ञानिकास्तेषां यज्ञशालाश्चाद्याः प्रयोगशालाः। तैः सृष्टि-व्यवस्थासञ्चालकनियमाः ऋत' इति संज्ञयाभिहिताः।

उपनिषत्कालं यावद् भारतस्येदं विज्ञानं नाना-वर्गेषु व्यवस्थितमभूत्, यथा हि ज्ञायन्ते छान्दोग्योपनिषदि सनतकुमार-नारद-संवाद-प्रसङ्गेऽधोलिखिताः शाखाः। यथा—

(१) राशिः (गणितविज्ञानम्), (२) भूतविद्या (भौतिकविज्ञानम्) (३) नक्षत्रविद्या (खगोलविज्ञानम्. (४) सर्पदेवजनविद्याः ४ (चिकित्साविज्ञानं प्राणिविज्ञानञ्च)।

भौतिक-विज्ञानस्यैवैकमङ्गं भूविज्ञानं 'भौमिकी' भूगर्भं विज्ञानं (GEOLOGY) वा। अस्मिन् विज्ञाने भूम्युत्पत्ति-भूसंरचना-शैल-मृत्ति-

---

२. ऋग्वेदः, ७/६/१२

३. ऋग्वेदः, ९/७३/९

४. राशि दैव निधि.....भूतविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमि।

— छान्दोग्योपनिषद्, ७/२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

का-जल-स्थलाकृति-भूकम्प-ज्वालामुखी-जीवाश्म-खनिजादितत्त्वानां तेषां संरचनाप्रक्रियाणाञ्चाध्ययनं भवति । खनिजसम्बन्धिविशिष्टं ज्ञानं खनिजविज्ञानम् (MINERALOGY) इति निगद्यते । इदं भूगर्भविज्ञानस्यैकमुपाङ्गम् ।

खनिजविज्ञानमितस्ततः विकीर्णं समग्रेऽपि संस्कृत-वाङ्मये, साहित्य शास्त्रे च । वैदिकवाङ्मये कौटिल्यस्यार्थशास्त्रे, बृहत्संहितायां, शुक्र-नीत्यां, मनुस्मृत्यां लौकिक-गद्य-पद्य – नाट्यादिग्रन्थेषु च प्रतिपादितानि तत्त्वानि संगृह्य प्रयासोऽयं 'संस्कृतवाङ्मये खनिजविज्ञानमिति' विषय प्रतिपादनस्य ।

सम्प्रति प्रथमन्तावज्ज्ञातव्यं किन्नाम खनिजम् १ ? इति । सामान्यरूपेण खनिषु अर्थात कस्मिंश्चिदपि रिक्तस्थाने, विवरे, बिले, गर्त्ते, छिद्रे, रन्ध्रे नालिकायां वा विशिष्ट-रासायनिक-जैविक-प्रक्रियाभ्यां निसर्गतः जातं सञ्चितं निक्षिप्तं वा वस्तु खनिजमिति कथ्यतेऽतो शुक्ति सम्पुटे जाता मुक्ताऽपि खनिजम् । विशेषतः शैल-विवरे जातं तत्त्वं खनिजमिति कथयितुं शक्यतेऽस्माभिः ।

अस्यां पृथिव्यां मानवीयावासेन सहैव भूसंस्तरान्वेषण-प्रक्रियायां वैज्ञानिकैः परिजातं भू—गर्भे भू—पृष्ठे च विभिन्न-शैलस्तरेषु सन्निहितममूल्यखनिजभाण्डारमपि खनिजमेव । यथा निगदितं ऋग्वेदे—

'अगस्त्य खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष १ ।।'

---

१. ऋग्वेदः, १/१७६/६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो ऋषिः कामं च धर्मञ्च पुपोष। खनिजं खनन-क्रियया लभ्यते। इदन्तु खनिजस्य द्वितीयं वैशिष्ट्यम् यदा खनिजं निष्काष्यते तदा तत्र धरा-गर्भे भू-पृष्ठे वा खनिः बिलं गर्तो वा सञ्जायते।

इत्थं लोह-ताम्र-सुवर्ण-माणिक्य स्फटिक गैरिकादीनां 'खनिजम्' इति संज्ञा सर्वथा सार्थकमेव भवति।

खनिज — प्रकाराः

खनिजं सुस्पष्टतया परिगणितं कौटिल्येन। यथा—

'सुवर्ण-रजत-वज्र-मणिमुक्ता-प्रवाल-शंख-लोह लवण-भूमि-प्रस्तर-रस-धातवः खनिः २।

अत्र परिगणित खनिज द्रव्यस्य स्थूलरूपेण विभाजनं निम्नोक्त-प्रकारेण शक्यम्—

(१) प्रस्तरवर्गः

शैलनिर्माणकारिखनिजाश्यस्मिन् वर्गे समापतन्ति। प्रागैतिहासिके पाषाणयुगे सर्वप्रथमं मानवेन लेटेराइट क्वार्टजादि प्रस्तर खनिजानामुपयोगः अस्त्रशस्त्राद्युपकरणरूपेण कृतः। ऋग्वेदेऽश्मचक्र ३ — अश्मनमयीवाश्यादीनामुल्लेखः४ स्थाने स्थाने प्राप्यते।

बालुकाश्म सुधाश्म (चूना पत्थर Lime Stone) मुक्ताशिला

---

२. अर्थशास्त्रम् २/६/४

३. ऋग्वेदः, १०/१०१/७

४. वाशीभिस्तक्षताश्मनमयीभिः। — ऋग्वेद, १०/१०१/१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(संगमरमर) चाऽऽदयोऽपि प्रस्तरवर्गीया: सन्ति ।

वज्र माणिक्य स्फटिक प्रवालादिबहुमूल्यरत्नानां पश्चिगणनाऽपि प्रस्तर वर्गीयेषु खनिजेषु भवति । मनुस्मृत्यामेतानि 'अश्ममय रत्नानि'५ बृहत्संहितायाम् 'उपल-रत्नानि' ६ इति च कथितानि । एवम्-

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढ़ै: पाषाण खण्डेषु रत्न संज्ञा विधीयते ।।

इति सुभाषितमपि रत्नस्य पाषाणत्वमेव पूर्णरूपेण प्रमाणयति ।

—।★★।—

— भारतोदयात् साभारम्

---

५. रत्नेषु सर्वेष्वश्ममयेषु । — मनुस्मृति:, ८/१००७
६. इह तूपल—रत्नानामधिकारो वज्रपूर्वाणाम् । — बृहत्संहिता ७८/२

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुन: भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं।

—व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० आषाढ़ः ख्रीष्टाब्दः २००३ जून
वर्षम् ४७ अंकः ९

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखां चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दना

शिवरुद्रपितामहविष्णु नुतम् ,
हरिचन्दनकुंकुमपङ्कयुतम् ।
मुनिबृन्दगणेन्द्र समान युतम्,
तव नौमि सरस्वति पादयुगम् ।। (१)

शशि शुद्ध सुधा हिम धाम युतम्,
शरदम्बर बिम्ब समान करम् ।
बहुरत्न मनोहर कान्ति युतम्,
तव नौमि सरस्वति पादयुगम् ।। (२)

कनकाब्ज विभूषित भूति भवम्,
भव भाव विभावित भिन्न पदम् ।
प्रभु चित्त समाहित साधु पदम्,
तव नौमि सरस्वति पाद युगम् ।। (३)

भव सागर मज्जन भीति युतम्,
प्रतिपादित सन्तति कार मिदम् ।
विमलादिक शुद्ध विशुद्ध पदम्
तव नौम सरस्वति पादयुगम् ।। (४)

✱

– श्रीधर प्रसाद पन्त 'सुधांशु' शास्त्री
पीलीभीत (उ०प्र०)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



किं न मे संस्कृतम् !

– डा॰ सुरेन्द्रमोहनमिश्रः
कुरुक्षेत्रम् ।

❋❋

चिन्तनं संस्कृतं भाषणं संस्कृतं कर्म मे संस्कृतं धर्म मे संस्कृतम् ।
वर्म मे संस्कृतं शर्म मे संस्कृतं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।१

भूतकं संस्कृतं भव्यकं संस्कृतं वर्तमानं स्वयं सर्वथा संस्कृतम् ।
गौरवं संस्कृतं सौरभं संस्कृतं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।२

व्यष्टिनिर्माणकं राष्ट्रनिर्माणकं धीरतादायकं वीरतादायकम् ।
कीर्तिकादम्बिनीविद्युदालोचकं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।३

आर्यजातिस्वरं घोषयद्भास्वरं द्राविडोज्जस्वलं रूपमाभासयत् ।
विश्वकौटुम्बकं पालयत्संस्कृतं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।४

ऐक्यसाम्याकरो विश्वसञ्चर्षणं शत्रुतालोपकं मित्रतावापकम् ।
ज्ञानविज्ञानदं भारतस्यात्मभूः ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगसम्पादकं चित्तसन्तापहं भाषया दिव्यया वाच्यदोषापहम् ।
वैद्य केनाद्वयं कायरोगापहं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।६।

शान्तिमन्त्रप्रदं प्रीतिसौभाग्यदं भेदनिर्मूलकं मानवैक्यस्वरम् ।
सर्वसौख्याचंकं सभ्यतादर्शकं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।७

कापिली शंषिकी काणभुज्यार्षगी गौतमी जैमिनीया च वैयासिकी ।
बार्हस्पत्याथ वा जैनबौद्धोद्भवा साहिती ब्रूहि मे किं न मे संस्कृतम् ।८

भाषविज्ञानतो धर्मविज्ञानतः शिल्पविज्ञानतोऽध्यात्मविज्ञानतः ।
वैद्यविज्ञानतो विश्वविज्ञानवद् ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।९

विश्वभाषापदं स्वैर्गुणैर्भूषयल्लोकभाषामयं योग्यभावाद्धृत ।
संस्कृतं लोकमन्दाकिनी नन्दिनी ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम्।१०

मानवे दानवं नाशयत्सुव्रत देवमापादयद्दैववृत्युज्ज्वलम् ।
आर्षदृष्टयुच्छ्रित शास्त्रशस्त्रोजितं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम्

वेद वेदान्ततो मुक्तिमार्ग श्रितं वार्तया सार्थया लोकयात्रां जितम् ।
श्रद्धया शुद्धया राष्ट्रपोषप्रदं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।१२

आमनोराकृषीनामुनीनाऽऽर्यकानामनुष्यान्समाञ्छाश्वतं संक्षरद् ।
अक्षरञ्चामृतं सिद्धकातस्वरं ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।१३

विश्वमेकं ध्रुवं द्विध्रुवं त्रिध्रुवं यच्छकं तच्छकं यातु कालक्रमात् ।
भारतं भारतं संस्कृतेनीयकं स्वात्मतन्त्रप्रियं किं न मे संस्कृतम् ।१४

नव्यविज्ञानजो भव्यसम्पच्छ्रियं युद्धभीतिश्च वाऽऽतङ्कवादोग्रता ।
ग्रासमिच्छत्यसौ तत्र सा ह्री गति—
ब्रूहि मे ब्रूहि मे किं न मे संस्कृतम् ।१५।

इयं पञ्चदशी पान्थपाथेयं संस्कृतव्रते ।
देवी वाक् किंस्वरूपेति मृषन्ती गुणसंततिम् ।१६।

— 1001 —

— प्रवक्ताः कुरुक्षेत्र वि. वि. कुरुक्षेत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पोस्ती

१ एकः प्रमनः कुरुते स्म वासम्
ग्रामे स्वभार्या सहितः समोदम् ।
आलस्य मूर्ति विगत स्वकर्म
पोस्तीति नाम नर रूप देवः ।।

२. तस्य स्वभार्या कलहप्रियैका
निरन्तरं तस्य कृते विरुद्धा ।
अहर्निशं तौ कलहेन सार्धम्
महानुभावौ नयतः स्म कालम् ।।

३. यद्येकदाऽपि स्थगितो विवादः
तयो स्तदा दुःखशतप्रपूर्णौ ।
क्षुधा विहीनौ सततं विनिद्रौ
अशान्त चित्तौ भवतः स्म नित्यम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. सपत्निना तस्य तमेकदाऽथ
प्रवञ्चितुं तक्रनिपानमम्लम् ।
कृतं प्रसुप्ता च यथैक योगी
व्याज दधाना गरलस्य साध्वी ।।

५. पोस्ती यदा स्वगृहमागतोऽसौ
पूर्णं दिनं सूर्य करैं प्रतप्य ।
ददर्श सुप्तां कलहे सहायां
स्वकीयभार्यां गरल प्रमत्ताम् ।।

६. स्वप्राङ्गणे तीव्रतरं रुरोद
तिरश्चकाशापि गदभं गीतम् ।
चतुर्दिशं तद्रुदनं प्रपेदे
कोलाहलस्तत्सदने बभूव ।

७. स्त्रियस्तदाकर्ण्य समागता वै
तदगह्वरं तूर्णतरं तदग्रे ।
महज्जवेनोच्चतरं बभाषे
रक्षन्तु रे मद्गृहिणीं यमस्थाम् ।।

८. रक्षन्तु रे मद गृहिणीं यमस्थां
मृत्योर्मुखं गन्तु मियं प्रवृत्ता ।
तक्रं निपीतं गरलेन सार्धम्
भार्यं मदीयं मृतमद्य हा हा ।।

९ एका बभाण प्रमदा च तासां
मदीय वाचं शृणु रेऽयि पोस्तिन् ।
पिता मृत स्त्वज्जननी मृता च
अन्ये महान्त खलु बान्धवाश्च ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१० शोकं त्वया नैव कृतं कदाऽपि
विलोकितं स्वद्रुदनं मया नो ।
कृतं कथं रोदनमद्य तूर्णम्
आश्चर्य मेतद्वद किं रहस्यम् ।।

११ पोस्ती सशोकं खलु प्रत्युवाच
स सत्वरं शान्ति विहीन चित्ता ।
मृतो यदा मे जनकस्तदाऽपि
मात्राऽहमुक्तः शृणु वत्स ! वाचम् ।।

१२ अस्मात्परं पितृपदेऽहमेव
उपासनीया पितरं यथाऽहम् ।
मृताऽपि माता खलु मे यदा च
सपत्निना चोक्त मथोऽपि शीघ्रम् ।

१३ माता मृतैषा तव प्राणनाथ !
भविष्यकालेत्वहमेव माता ।
अवेहि मांत्वं जननी यथा वै
तदाऽपिनाहं तरलोबभूव ।।

१४ भविष्यति प्रेमपरा सुपत्निः
नाद्यस्वयं काऽपि वभाण भार्याम् ।
कः सान्त्वयिष्यत्यधुना मनो मे
माता न नाशी खलु हा हतोऽहम् ।।

— केशवराम शर्मा
दिव्यदीप सोलन (हि०प्र०)

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(विचारद्वयी)

कुमतिः प्रवर्धिता

श्रद्धाऽनुरागवर्धिनी सद्भावना मृता।
दुर्भोदभाव-कारिणी कुमतिः प्रवर्धिता ।। (१)

प्रतिवेशिनस्तु नाम नैव बुध्यतेऽधुना,
स्वीये गृहेऽपि पाल्यते संवादहीनता ।। (२)

स्वच्छन्दता समागताऽनुशासनं गतम्,
श्रद्धास्पदं न मन्यते माताऽथवा पिता ।। (३)

पूजास्थलेषु शस्त्रसंग्रहो विधीयते,
हत्यैव छद्मनाऽद्य वन्दनाऽऽस्पदं गता ।। (४)

बन्धोर्बंधाय बन्धुरेव शिक्ष्यतेऽनिशम्,
गुरुता गुरोरपीह सर्वथा कलङ्किता ।। (५)

सलिलं प्रदूषितं तथा वायुः प्रदूषितः,
अस्माभिरेव पावनी गङ्गा प्रदूषिता ।। (६)

शुद्धं घृतं न कुत्रचिद् दुग्धं विलोक्यते,
लोकस्य मानसो समाहिता ह्यशुद्धता ।। (७)

कैश्चिन्न कस्यचित् क्वचित् पीडाऽनुभूयते,
स्वार्थान्धतैव राक्षसी दृष्टा शिरः स्थिता ।। (८)

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(हास्य-व्यंग्यम्)

वैभवाप्ति-साधनम्

धारय छद्मतपस्वी—वेशम्,
इत्थं स्थास्यति सदा जीवनेऽभीष्टं सौख्यमशेषम् ।
भस्मविभूषितदेहो भूत्वा, चन्दनचर्चितभाले ।
केशकलापे मालां धृत्वा प्राप्स्यसि सिद्ध-सुवेशम् ।। १
यदा-कदा तारस्वरेण कुरु कालीमंत्रजपं रे,
ततो निवस कस्मिंश्चिन्नगरे प्राप्य धनिक परिवेशम् ।। २
बहु भक्ता आयान्तु समीपे शृणु एतस्योपायम्,
ज्ञानं बिनाऽपि तन्त्रमन्त्रयोः किञ्चित् कुरूपदेशम् ।। ३
नव्य कबीरो वक्ति सखे ! शृणु त्वयि कलियुगनुाकूलम्,
वैभवराशिमपारं प्राप्स्यसि नाके चापि प्रवेशम् ।। ४

- डा० शिवशरणशर्मा
५१-विनयनगर सेक्टर—१
जेलमार्ग, ग्वालियर (म०प्र०) ४७४०१२

★★★

मूल वेद मंत्र संख्या—१०५८४

चतुर्वेदेषु मूल मंत्राणाम् संख्या सपादम् १०५८४ मात्रम् विद्यते । एतेषाम् सचित्रसानुवाद प्रकाशनम् प्राय १पृष्ठेषु एकस्मिन् एव भागे कर्तुम् शक्यते यदि शब्दार्थं प्रकाशनम् भवेत् केवलम् यथा-अग्निम् ईडे पुरोहितम् (मार्गदर्शक परमेश्वर को प्रणाम्), एतदर्थम् प्रकाश्य सामग्रीम उपलब्धकरणाय वेदज्ञाः सादरम् निवेदयन्ते—

डा० कृष्ण नारायण पाण्डेय
संयोजक मानवता समन्वय कुटीरम्
ई-१०५२ राजाजीपुरम् लखनऊ २२६०१७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थसमीक्षा...

काव्यत्रिवेणी(श्रव्यदृश्यस्तवकाव्यसंवलिता)

समीक्ष :... डा० रूपनारायणपाण्डेयः,
एस्. II/३३०, राज्यशिक्षा संस्थानकालोनी एलनगञ्जः, प्रयागः,
(उ. प्र. २११००२)

प्रणेता..... डा० हरिहरशर्मा अर्यालः 'हरिअरविन्दः'
पुस्तकप्राप्तिस्थानम्— श्रीरामशङ्करसाङ्गवेद विद्यापीठम्;
ग्रामः— कोडरा, पत्रा-पोपया, जनपदेः- कबीरनगरम्-२७११६४
२०५९ वैक्रमाब्दा, पृ० सं०-१०+९२, मूल्यम् – ४५ रूप्यकाणि

वर्तमानकाले सुरभारतीसाहित्यस्य संवर्धनेऽनेके कवयः कवयित्र्यश्च संलग्नाः सन्ति, तेषु डा० हरिहर शर्मा अर्यालो नवीनविषयान् अधिकृत्य काव्यप्रणयने प्रवर्तते। तेन सद्य एव श्रव्यदृश्यस्तवकाव्यसंवलिता 'काव्यत्रिवेणी' प्राकाश्यं नीता।

अत्र भागत्रयं वर्तते – १. मुक्तिमन्दिरम्, २. रूपचतुः शालम्, ३. भावनक्षत्रमालिका च। 'मुक्तिमन्दिरे' विंशतिरधिशोहिण्यो विराजन्ते, यत्र भगवतो मुक्तिनाथस्य यात्रायां विवरणं वर्तते। 'रूपचतुः शाले' चत्वारि रूपकाणि–निरक्षरता, मुद्रामेघव्रतं पश्चात्तापो बद्धमुष्टिविला सञ्च शोभन्ते। 'निरक्षरतायाम्' काकूनो निरक्षरत्वात् सुखे दुःखं दुःखेः च सुखमनुभवति। 'मुद्रामेघव्रते' श्रीकण्ठ उत्कोचं प्रदाय स्वपुत्रस्याजी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशं प्रयतते। 'पश्चात्ताये' अस्मिन् शर्मा श्रीकृष्णदर्शनात् स्वपत्नीमवलक्षद्धि। तस्माद् दिवं गतायां तस्यां सः पश्चात्तापमनुभवति। बद्धदृष्टि विलासे' कदर्यः स्वकार्पण्यादतीव व्यथते। 'भावनक्षत्रमालिकायाम्' (स्तोत्रकाव्यसंग्रहे)। सप्तविंशतिमौक्तिकानि विलसन्ति मुक्तिमन्दिरस्य, निरक्षरतायाः, मुद्रामेघव्रतस्य च हिन्दी रूपान्तरमप्यत्र राजते। पूर्वात् प्राक् किञ्चिदात्मगतं विदुषां सम्मतयश्च शोभन्ते। काव्यत्रिवेणां प्रकाशित रचनासु काश्चन यथाकालं गण्डोवसूर्योदय पारिजातः। दुर्वा-संस्कृतमञ्जर्या दिषु पत्रिकासु प्रकाशितचराः सन्ति।

अस्मिन् ग्रन्थे मुक्तिमन्दिरे' यात्राया रम्याणि दृश्यानि कविवरेण वस्तुतानि। भारतीयसंस्कृतिनिष्ठस्य तस्य मानसं भारतीयानां स्वसंस्कृतो हीनभावनां विलोक्य नितरां व्यथते। दृश्यताम् –

'वैदेशिकाः सप्त समुद्रपारात् क्रीणन्ति हैमाच्छिखरादिहैत्य।
पाषाणखण्डाञ्शतरूप्यकाणि जानेऽहमहो न गुह्यम्॥

स्वदेशवस्तूनि विलोकयामि विच्छिद्य विच्छिद्य नयन्ति नित्यम्
परन्त्वहो बालिशतामुपेता जानीमहे नैव किमत्र कार्यम्॥'

(का०, पृ० २२)

गण्डकीचित्रणे भगवतः शङ्कराचार्यस्य रचनाशैलीं ग्रन्थकारोऽनुकरोति। तद्यथाः 'हरिहरिहरिनादैः कन्दराः पूरयन्ती
प्रबलजवनिपातैः प्रस्तरांश्चूर्णयन्ती।
सकलकलिकलङ्कं क्षालयन्ती क्षणेन
शुचिहिमजलपूरा गण्डकी नः पुनातु॥' (का०, पृ. २६)

रूपचतुः शाले रूपकाणि नितरामभिनेयानि, तेषां संवादाश्च नैसर्गिकाः सरलसंस्कृतभाषाप्रणीताश्च। (शृण्वन्तु रसिकाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'दीनबन्धुः-अस्माकमपि गृह, परिवारजनाः जन्तवश्च सन्ति। नगरे निवसामः। अत्र हि सर्वत्र सर्वकार्येषु व्ययाधिक्यम्। वेतनरूपेण यद्

द्रव्यं लभ्यतेऽस्माभिः, तदतीव स्वल्पम्। तद् भवत्सदृशैरेव जनैः
जनैः हर्षेण दत्तं पुरस्कारं प्रयुज्य व्ययं लघूकुर्महे।
श्रीकण्ठः-सत्यमुच्यते भवता।' (का०, पृ० ४८-४९, +)

'भावनक्षत्रमालिकायाम्' स्तोत्राणि सहृदयहृदयानि पूतभावैरतितरां पुनन्ति, स्मारयन्ति चाचार्यवर्याणां स्तोत्रवैं विलासान्। भारतीस्तुतौ भवानीस्तुतौ च भक्तकवेर्भव्यभावनोद्भावनानुभवितव्यास्ति।

'लवमपि तव लब्ध्वा सुप्रसादं बुधास्ते
सहृदयहृदयास्तान् निर्ममु काव्यसङ्घान्।
वितर बुधजनानां काममानन्ददातत्
कमलनयनवामे! रुत्कवित्व सदाभे॥' (का., पृ. ७६)

'देवि प्रपन्नार्त्तिहरे! प्रसीद,
प्रसीद मातर्ललिते प्रसीद।
मां पापिनं पालय शैलकन्ये!
भवानि दुर्गे भुवनेश्वरीति।' (का., पृ. ८०)

ग्रन्थारम्भाद् रूपचतुः शालं यावद् ग्रन्थस्य हिन्दीरूपान्तरम असंस्कृतज्ञानां कृतेऽतीवोपयोगि विद्यते द्वाविंशे पृष्ठे 'विच्छिद्य विच्छिद्य' इति मूलांशस्य 'चुन-चुन कर' इति रूपान्तरं चिन्त्येत। ग्रन्थस्य मुद्रणं प्रायशः त्रुटिरहितं वर्तते, किन्तु कानिचित् स्खलितानि सन्त्येव। द्र, का., पृ. ८९ ५२१६५, ६८ इत्यादीनि)

मन्ये-प्रयागस्था त्रिवेणी यथा निष्ठावतां जनानां पापं तापं च प्रशमयति, तथैव काव्यत्रिवेणीयं काव्यरसिकानां मनोमालि 'न्यमपहरेत्'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्तं च प्रसादयेत् । (जयतु संस्कृतं संस्कृतिश्च ।)

'यजामि दुर्गाचरणारविन्दं ध्यायामि दुर्गावदनारविन्दम् ।
गायामि दुर्गागुणनामवृन्दं भवानि दुर्गे भुवनेश्वरीति ॥'

(× 'निरक्षरता' इति रूपके साक्षरताया महत्त्वं प्रतिपादयति । 'मुद्रामेघव्रते' समाजस्य यथार्थं चित्रणं प्रस्तूयते । प्रभूतधन-राशिं मध्यस्थाय प्रदाय कथं जना आजीविकामधिगन्तुं वाञ्छन्ति । अद्य समाजेनैतिकता कुत्रापि न वर्तते । श्रीकण्ठः साधु चिन्तयति—'यत् कार्यं हि प्रतिशतं जनानां पञ्चनवतिः करोति। करोति, तदनार्यं नैव भवितुं शक्नोति । ००० अहं वच्मि, अत्र देवतात्रयस्य वा को रोषः ? यदे तत् स्वल्पामेव पूजामङ्गीकृत्य गुरुतरकार्याणि सम्पादयति ? ' (का०, पृ० २१) नारीणामुपरि पुरुषस्यात्यचारा अद्यापि वर्तन्ते इति 'पश्चात्तापेन' सूच्यते हास्यात्मके बद्धमुष्टिविलासे यद्यपि कदर्यस्य दुर्दशाया चित्रणं युज्यते, तथापि तस्मिन् मिथ्या भियोग स्याक्षेपः सुष्ठु न वर्तते ।)

... रूपनाराण पाण्डेय

Central Library
Gurukul Kangri University
Hardwar-249404 (U.A.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धेर्बलम्

परितः प्राशुदेवदारुचीड़कायलतरुभिश्चोत्तुङ्ग शैलशिखरैः परिवेष्ठितं पक्षिखामिवं गिरिगङ्गायाउपकण्ठेऽपरं कुडिण्नपुरमिव विशाल भवनैरलङ्कृतं शोभते 'कोटखाई' नाम धेयं पत्तनम् । पुट भेदनेऽस्मिन् भवानीशङ्करयोः देवालयं सरस्वती देवालयं च नगर चत्वरे हनुमान् मन्दिरम् विराजते । राजमार्गैः सर्वतः सम्बद्धमाधुनिकसर्वविधसुविधासम्पन्न स्थानमिदमतीवरम्यं प्रतीयते ।

अस्य निगमस्योत्तरस्यां दिशि डी. ए. वी. उच्चविद्यालया, डी. ए. वी. महाविद्यालयः शिक्षादाने संरते स्तः । दक्षिणदिग्भागे उच्चतरमाध्यमिकविद्यालयं, नगरमध्ये कन्याविद्यालयश्च, सरस्वतीविद्यामन्दिरं बालभारती संस्थाया। बालशिक्षणमन्दिरं वर्तते । शिमलामण्डलस्योपमण्डलमिदमांशलशासने पञ्चाम्बु प्रदेशस्य भागमासीत् । अत्र सामुदायिकौषधालयं लोकनिर्माणविभागस्यातिथि भवनं व्यक्तिगत रूपेण बहूनि रात्रिनिवासस्थानानि सन्ति । सुविस्तृतमापणं सर्वविधवस्तुसम्पूर्णञ्च किन्तु कष्टस्य विषयमिद वर्तते यत् अत्र कोऽपि स्वतन्त्रस्वास्थ्य निरीक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

को चिकित्सको वा नास्ति । आपणे बहुवौषधिविक्रेतारः सन्ति । ये मानवानाम् कृते पशुनाम् कृते च वनस्वतीनाम् कृत्ते तथा फलाशाकोत्पादकानाम् निमित्तमौषधानि विक्रीणन्ति ।

जनाः धनधान्यसम्पन्नाः सकलविधविभवसम्पूर्णा अद्यतनैः बहुविध भौतिकसुखसाधनैः समृद्धाः बहुकक्षमण्डितभवनेषु वसन्ति । अत्रस्थाः सकलः नराः फलशस्योत्पादकाश्च गोरस विक्रेतारः सन्ति । अध्ययने जनानाम् रूचिः न दृश्यते तादृशी । ये के चिद् जनाः पठन्ति ते परमोच्च शिक्षां प्राप्नुवन्ति सर्वकार शासने उच्चपदेषु सन्ति । जनेषु एकतास्ति । ये जनाः कस्मादन्य स्थानादागत्यात्र निवसन्ति ते सर्वदा वाह्या एव तिष्ठन्ति । अधिकतरं जनाः जनान् द्रव्येण तोलयन्ति । सर्वत्र गृहेषु नेपालादागताः गता नेपालिनः भृत्याः सपरिवार भृतिं कुर्वन्ति । भूस्वर्गमिदं नात्र कोऽपि दीनो दरिद्रो वा दृश्यते । पर्वतीयक्षेत्राणाम् निवासिनः सौन्दर्यं सम्पन्नाः तु सर्वदा भवन्ति । अतः कथयितुम् शक्यते यत् यदि सृष्टौ स्वर्गं विद्यते, तदा तदवश्यमत्रैवास्ति ।

अस्य क्षेत्रस्य निवासिनः नराः प्रतिवर्षं वातादम् अमृतफलं (नाशपति) प्रालुकं अक्षोटं सेवानि जापानीफलादि फलानाञ्चालुक गृञ्जनम् चर्भरिः कर्कटिका कारवेल्लम् गोजिहवा पालक्या वृन्ताकम् भिण्डकः सिम्बा शाकम् तन्तुकः श्वेतकन्दः अलाबूः मूलिका माषाः राजमाषाः सुसिम्बा कूष्माण्डः कलायादि फलशाकशस्यानामुत्पादेन विक्रयेणचसुसमृद्धाः सन्ति । सकलगृहेषु कारयानं मिलति कुत्र-कुत्र तु गृहस्य सर्वे जनाः पृथक्-२ कारयानं प्रयोजयन्ति ।

वणिजाः सौचिकाः, सौलिकाः, क्षौरिकाः, प्रेष्याः, निर्णेजकाः तन्तुवायाः कारुकाः शाकविक्रेतारः चर्मकाराः तक्षकाः कर्मकराः ऐन्द्रजालकाः यान्त्रिकाः कूलिकाः रेजकाः श्वपचः च सकला सर्वकारकार्यविभागेषुनिरताः नराः नूतन हिमाचलादपि वा देशस्यान्यप्रदेशेभ्यः समागत्य निजोदरपूर्तिं कुर्वन्ति तत्र ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोटखाई नगरस्यापणमध्ये निजकार्ये परम प्रवीणः एको नरः षष्टि वर्ष देशीयोऽपि तरूणमिव चपलः, सुविज्ञः, परतन्त्रभारते जातश्च तस्मिन् समये वी. ए प्रभाकर कक्षां च प्रथम श्रेण्यां समुर्तीय वसन व्यापारे संलग्नो वभूव, परञ्चाधुनांग्ल हिन्दीसमाचार पत्रान् चोपायन वस्तूनां व्यापार करोति। वार्तालापे परमनिपुणोऽद्यतनीय विषयाणाम् सम्यग् समालोचकः हर्षितवदन चञ्चलनेत्रः दुग्धपानस्य रसिकः ओंकार कश्यप नामधेयः एकः वणिगस्ति। तस्य पार्श्वे सकल निगमस्य सर्वविध सूचना भवति। अद्य कुत्र किं जातं, को मृतः, कः जातः कुत्र वृष्टिः धारा सम्पातः कुत्र किमभवत्, कः भ्रष्टः, कुत्र किं मिलति, एव सर्वे जनाः तस्य पार्श्वे आगच्छन्ति गच्छन्ति च। यो कोऽपि तस्य सविधे समागच्छति तं स प्रथममधोदुग्ध पानं कारयति, धूमदण्डिकां ददाति मधुर हास्यरस पूर्णं वार्ताभिः च तस्य हृत स्फोटनं विदधाति। यो एकदा तस्य पार्श्वेगच्छति सः नगरमिदं प्राप्य तं समिल्यैव गच्छति। अस्मिन्नेव पत्तने घटितैषा घटना ययाद्य कथारूपं धारितम्।

अस्य निगमस्योच्चतरमाध्यामिक विद्यालये रुचिरा नाम परममनोज्ञा, मञ्जुल वदनी, मधुरभाषिणी पीनपयोधरी, कुरङ्गनयनी, कलहंसकण्ठी, फलैः नम्रीभूतां सेवस्य शाखामिवाध्ययनेऽपि कुशाग्रमति, गमने हंसगतिः चपला चञ्चला नयनमधु मधुरा मेध्या आसेचनका द्वादश कक्षायां पठतिस्म।

विद्यालयेऽस्मिन् छात्राणाम् सख्यात्यधिकास्ति अध्यापकानाम् संख्या च न्यूनास्ति। अध्यापकानां प्रवक्तृणामभावोऽत्र सर्वदैव भवति। केचित् शिक्षकाः प्रतिदिनं शिमलातः समागच्छन्ति। भवान् सम्यग् ज्ञातुं शक्नोति यत् षष्टिः किलोमीटरदूरतः समागत्य कीदृशमध्ययन मध्यापनं भवितुं शक्यते। किन्तु नास्ति विषयेऽस्मिन् कस्यापि कापि चिन्ता। छात्राणाम् तेषामभिभावकानाञ्चाध्ययने न कापि रूचि दृश्यते। सर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारः तु वाञ्छत्येव यत् शिक्षास्वास्थ्यसुशासनस्य व्यवस्थापि तस्य स्कन्धे यदि न भवति तदा किदृशमानन्दं भवति ।

परीक्षाभवने छात्राः पुस्तकानामुपयोगं स्वप्रकृत्या प्रदत्तं मौलिकाधिकारं मन्यन्ते । अस्मिन् विषये यां कथां श्रावयितुम् समीहे तां संश्रुत्य भवन्तः (बुद्धेर्बलस्य) कथायाः संघटनं दृष्ट्वा महदाश्चर्यं संपतिताः भविष्यन्ति । यत् यत्र जनाः पठितं नेच्छन्ति सर्वंकारस्य शिक्षकाणाम् तादृशी स्थिति तत्र कथं बुद्धेर्बलस्य कथा भवितुं शक्यते. परञ्च भवन्तः धैर्यं धारयन्तु स्वं स्वं हृदयं प्रतिगृहणातु । अहं सत्यं वदामि कथा बुद्धेर्बलस्यैव अस्ति ।

रुचिरापि परीक्षा वैतरणीमु ल्लंघयितुं कटिबद्धासीत्, परञ्चाध्ययने निजपङ्गदोषेणसापि तादृश्येव संजाता सीत् । सत्यमुक्तमस्ति—

सङ्गदोषेण देवोऽपि गच्छति लघुतामिह ।
कथं नरगतिः भिन्ना भवेदत्र धरातले ।१।

महारथी महानात्मा कर्णतुल्यो महानरः ।
कौरवाणां कुसङ्गेन नीचत्वं समुपागतः ।२।

पूर्वं विचार्य सम्यग्वै ततो मैत्रीं समाचरेत् ।
परित्यज्य कुसङ्गञ्च सत्संगतिमुपाश्रयेत् ।३।

विद्यालयस्यास्य कोऽपि प्रवक्ता परीक्षासु निरीक्षकस्य सेवां दातुं नेच्छति । कारणमिदं यत् ते वराकाः पठित्वा पठित्वास्थिरोगेण संपीडिताः प्रभवन् । न जाने कति परीक्षार्णवतरणीं तरणिं विना समुतीर्यास्मिन् पदे नियुक्तिं गृहीतवन्तः । स्व समक्षे निजान्ते वासिनाम् तादृशीं दशामवलोक्य ते देशभक्ताः शिक्षकाः परीक्षानिरीक्षकस्य सेवां न स्वीकुर्वन्ति । ते तु कार्यादस्मात् निर्मुक्ताः परञ्च येन केन तुं तद् कार्यं करणीयं वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा प्राचार्य महाभाग: निजविद्यालयान्तर्गतान् प्राथमिकवि-
द्यालयाध्यापकानाम् नियुक्तिं करोति । तेऽपि सहर्षं कार्यमिदं स्वी-
कुर्वन्ति । प्राथमिकविद्यालयेषु प्रायेणाध्यापका: स्थानीया: भवन्ति अत:
परीक्षाभवने छात्रेभ्य: अनुकरणयत्रं युञ्जन्ति । तेषां कृते कुम्भस्नान
महादानं भवति । सर्वेषां स्वकीयं लक्ष्यं भवति । कस्य केचिद् छात्रा:
सम्बन्धिन: भवन्ति । कस्य कापि प्रिया परीक्षायां भवति । अत: मुण्डे
मुण्डे मतिर्भिन्ना किन्तु सर्वेषां किञ्चिच्चत् किमपि लक्ष्य भवति एव ।

अस्मिन् वर्षे रुचिरापि परीक्षायामुपविष्टा तामवलोक्य तस्या:
सान्निध्यं प्राप्तुं बहवा युवका: प्रयत्नरतआसन् । संवत्सरेऽस्मिन्नेको
लिप्सु: नामकोऽध्यापकोऽपि निरीक्षकरूपे नियुक्तोऽभवत् । स सप्तवादने
एवांगलीत्या शृङ्गार कृत्वा विद्यालयस्य परीक्षा भवने समागच्छति स्म ।
केचिदन्येऽपि स्वयमेवापठिताअल्पज्ञापि परीक्षायान् अनुकरणपत्रदा-
नाय पुस्तकस्य पृष्ठिानुत्पाट्यपरीक्षा भवने प्रेषणाय स्वयमेव तत्र
गच्छन्ति स्म । कार्येऽस्मिन् प्रदेशरक्षाविभागस्य निष्क्रियता शिक्षाविभा-
गस्य चोपेक्षा कारणानि विद्यन्ते । लिप्सु तु प्रपत्रदाने तेषां प्रयोगे निजा-
ध्ययनकालात् परमनिपुणोऽभूत् । अनेन प्रकारेणैव दशमकक्षां समुत्तीर्य
स्वयं सेवी नियुक्तोऽद्य तु स्थायी अध्यापको ऽभवत् ।

दृष्टा भवद्भि: सर्वकारस्य शिक्षा उत्थानस्य नीति: । लिप्सु: महो-
दय: रूचिरामपि त्रमलिखत् । यदि भवतो ममेच्छां पूर्णां करिष्यति
तदाहं भवत्या परीक्षाभवने सर्वविधसाहायं करिष्यामि । इमां वैतरणीं
भवती सम्यक्प्रकारेण समुत्तीर्याग्रेगमिष्यति अथवास्यामेवकक्षायां वृद्धा
भविष्यति पत्रं पठित्वा रुचिराचिन्तयत् किं करिष्यामि यदि न करोमि
तदा तु परीक्षामहानदी दुस्तीर्णा भविष्यति, यदि आमिति लिखामि
तदातु दुष्टोऽयं मम जीवनं नष्टं करिष्यति किन्तु परमनिपुणा सा
तत्क्षणमेव निर्णीतवती अहं श्रीमतां वार्तां मन्ये परं भवदिच्छा परीक्षान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तरमेव पूर्णां कर्तुं समर्था भविष्यामि । पत्रोत्तरम् परमानु कूल प्राप्य लिप्सुरानन्द मग्नोऽभवत् । तस्य मनोमृग. नृत्ये संश्रतो बभूव । तेन चिन्तितमहमिमामत्रता शिमलां नेष्यामि ।

सा रूचिरायाः परीक्षास्थानक्रमाङ्कं परीक्षाभवनस्यै कस्मिन् पृष्ठकक्षे स्थापितवान् । प्रतिदिन तस्याः क्रमाङ्कस्तत्रैव भवति । सापि प्रतिदिनं निजहासादिकृत्यै तस्येच्छां संवर्धितवती स्व परीक्षा निमितं सर्वविधसहायतामाप्नोत् । लिप्सुः निजकार्ये परं निमग्नोऽभवत् । सः तस्या प्रश्नपत्रस्य प्रश्नान् सम्यग् पठित्वा होरात्रयं पुस्तकमुद्घाट्य प्रश्नोत्तरानन्विष्य तां अदात् । कार्येऽस्मिन्नेव स समाधिस्थो भवत् ।

रुचिरापि दृष्ट्वा यन्त्रमिवलेखने संश्रतभवति स्म । सापि ध्यानं न ददाति स्म । लिप्सुः निजमत्यनुसारं प्रश्नस्योत्तरमन्विष्य ददाति स्म । सा तथैव लिखतिस्म । परीक्षाफल किं जातं विषयेऽस्मिन् तु न किमपि वक्तुं शक्यते. परञ्च लिप्सु किमकरोत् श्रृण्वन्तु भवन्ता ।

परीक्षान्तिम दिवसे लिप्सु होरात्रयमेव रुचिरान्तिके अतिष्ठत् मधुर-मधुरवार्ताभिः तां स्व लक्ष्यं प्रति प्रेरयन् जगाद । श्वः भवती शीघ्रमागच्छतु मया कारयानं कृतमस्ति । आवां शिमलां गमिष्यावः । रूचिरा मनसि अचिन्तयत् दिवसदशानन्तरं शारीरिकशास्त्रस्य प्रायोगिकपरीक्षा भविष्यति । अतः तदा पर्यन्तं तु कुटिलोऽयमस्यामेवमनोदशायांप्रतिष्ठत् । सहसा विहस्यावदत् भवान् तु परम पावनो गुरूजनोऽस्ति भवानवगच्छतु ममाभिप्रायमहं पञ्चाहपर्यन्तं भवतां कृते उपयुक्ता नास्मि । लिप्सुरवगच्छत् पुष्पवतो भविष्यति । स जगाद नास्ति काप्यातुरता मया त्वं वदसि प्रिये । प्रिया शब्दं संश्रुत्य रूचिरा किञ्चिद् भयातुरामवत् । सहसा विहस्य गता । लिप्सुः पृष्ठेऽगच्छत् चावदत् यस्मिन् दिने प्रायोगिक परीक्षा वर्तते । तस्मिन् दिवसे वयं शिमलां गमिष्यावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायोगिक परीक्षादिने लिप्सु कारयान कृत्वा परीक्षाभवने समाग-च्छत् रूचिरायाः सविधे समागत्यावदत् निर्गत परीक्षाभारं। अवश्यमेवो त्तमाङ्कैः समुत्तीर्णा भविष्यसि। आगच्छाधुना मया सर्वप्रबन्धः कृतः आवामद्य शिमलां गमिष्यावः।

रूचिरा सहस्रा चण्डी वदट्टहासं कृत्वा तारस्वरेणावदत् श्रीमत् गुरूमहाभागाः 'स्नेहमेवं न भवितुं शक्यते' व्यतिषजति पदार्थान् आन्तरः कोऽपि हेतुः गच्छात्रतोऽन्यथा पादत्राणैः सुश्रूषां करिष्यामि।

तस्याः तारस्वरं संश्रुत्य बहवः जनाः तत्र समायाताः लिप्सुः च पादौ शिरसि निधाय वनं प्रति ददाव। एतामुत्तमस्त्रि बुद्धियंस्य बलं तस्य

—।★★।—

— श्री सुदेश गौतम
संस्कृत विभागाध्यक्षो
डी. ए. वी. महाविद्यालय कोटखाई
१७१२०२

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रम्

एकस्मिंश्चारूपवने श्यामले ।
कदाचिद्विहाराय गतवानहम् ।
संचितस्तत्रकोणे शुष्कपर्णचयः ।
पादो हठात् तत्र पतितो मम ।

चयमध्यगतपत्रमेकमवोचत् ।
क्षणं श्रूयताम् रे पथिक मम वचः ।

माता – पिता स्निग्धा ज्ञातिर्जनाः ।
किञ्च सन्ति त्वदीयाः प्रियाः परिजनाः ।
सगर्वं मयाऽऽमिति भाषितम् ।
गर्वाभिभूतो रे त्वम् सत्तया ।

पुनः शुष्कपत्रेण सम्बोधितः ।
मास्म भूत्पान्थ , गर्वाक्रान्तोहृदि ।

इतः पश्य त्वम् व्याकुलं मे कुलं ।
सस्पृहमीक्षते यद्विपर्णं तरुम् ।
न कोऽपि कस्यास्ति चिर सहचरः ।
सहयोगं करोति न ज्ञातिर्जनः ।

मृत्तिकायां विलीनोऽद्य शाखाच्युतः ।
यथाहं तथा श्वो भवितासि त्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाखान्वितासीद् यदा में गतिः ।
सुवातो प्रवातो दिशासु सदा ।
यावन्नकालः कवली करोतु ।
सत्कर्मकुरू तावज्जीवने ।

जनेभ्योः मया प्राणवायु प्रदत्तः ।
लोका त्वया दीप्यताम् वै मुदा ।

त्वाम् प्राप्य धन्या धरेयम् भवेत् ।
मानव, रे क्षणं त्वं वचो मे शृणु ।
प्राक् गमनात् कुर्वग्निसान्मम चयम् ।
जनानां चितेव ज्वालय मम चिताम् ।

व्यर्थम् न भूयान्मदीया चिता ।
च तापमस्याः प्रकाशं गृहाण वै सदा ।

जीवने न कदापि नैराश्यं व्रजेः ।
स्थापयेश्च निजत्वं सदा निष्ठया
पर्णस्य नियतिस्तु शाखावियोगः ।
तद्वत्त्वापि न विपरीतमस्ति ।

मा गा गर्वं जीवने नु कदा ।
त्वमपि रे मानव पत्रमेकम् ।

—[oo]—

— डा० अनिता जैन
वरिष्ठ प्रवक्ताः
(संस्कृत) वनस्थली विद्यापीठ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवताध्ययनशिविरम्

जूनमासे २० तारिकतः २८ पर्यन्तं सोलनस्थले आचार्यकेशवगृहे दिव्यदीपभवने प्रारभ्यते। यस्मिन् दशविदुषां समागमो भविष्यति। आ० केशवशर्मणा एतत्पुराणज्ञानं वितरिष्यते। अन्येऽपि द्विजा विद्वांसः भागवतमर्मज्ञा विषयेऽस्मिन् गम्भीरां शास्त्रीयां चर्चां विधास्यन्ति।

हिमाचल प्रदेशे पुराणपरम्परा लब्धप्रतिष्ठा शुद्धशास्त्रीयविधिना चानुष्ठीयते। जनतायाश्च प्रगाढविश्वासोऽनुपमा च श्रद्धा पुराणश्रवणे वर्तते। परमद्यत्वे पुराणानुष्ठानस्य शुद्धस्वरूपं विकारमायाति। अल्पज्ञानिनो धनयशोलाभलुब्धा शास्त्रीयां विधिमुत्सृज्य केवलं जनमनोरञ्जनरीतिमनुवर्तमाना पावनपरम्परामिमां प्रदूषयन्तः संस्कृतेरस्या मूलोच्छेदं विदधाना विचरन्ति। चलचित्राणाम् अश्लीलगीतध्वनिमनुकुर्वद्भिः पामरजननिर्मितैः ग्राम्यगीतैर्जनतां विमोहयन्तो नाटकप्राय मिदमनुष्ठानं कुर्वन्तो वर्तन्ते। विशुद्धमूलपाठकर्मणि यद उच्चारणवैदुष्यं धैर्यं श्रमश्चापेक्ष्यते तद् दूरतोऽपि नास्ति क्वचिदवशिष्टम्। द्वित्रिहोरा यावत् यत् किंचिदुच्चार्यं न्यूनतः पञ्चहोराकार्यं पाठ प्रपूरयन्ति। कैचित्तु कोऽवगच्छति पाठमिति वदद्भिः पाठपरम्परा सर्वथा त्यक्ताऽस्ति। मञ्चे दशशो विविधवाद्यवादनविदः गीतप्रायंरेव प्रवचनं भागवतं विडम्ब-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्ति। भागवतनाम्ना जनमनसि प्रभूतस्यादरस्य छलेन दोहनं कुर्वन्ति काम भागवतशब्दस्यार्थमपि न जानीयुः। अन्ये पुनः केचिद् अधीत-शास्त्रा अपि सन्तः यथारुचि यथावसरं विषयान्तरं प्रतिपाद्य प्रस्तुत पुरा-ण विषयं गौणी कृत्य प्रतारयन्त्येव पावनामिमां धर्मज्ञानपरम्पराम्।

भागवतानुष्ठाने प्रत्यहं प्राप्यमाणं हृदयन्तुदमिमं ह्रासमनुभूय यथासामर्थ्यं विकारविशमयत्नः करणीय इत्युद्देश्य पुरस्कृत्य भागवत प्रवक्तृणाम् साधु प्रशिक्षणं शिविरेऽस्मिन् विधास्यते। तत्र विषयविवेकः पुराणपरम्परारक्षा, वर्तमानसामाजिकसमस्यानां पुराणमाध्यमेन निरा-करणप्रकारचिन्तनम् आदर्शाचारसरणिज्ञानम्, श्रौतसंस्कृतिरक्षाविषय-श्चेत्यादिविषयाः परमोपयोगिनः विमर्शयिष्यन्ते शिविरमिदं निःशुल्क भोजनावासादिसुविधासम्पन्नं भविष्यति।

-- आ० केशव शर्मा
दीव्यदीप सोलन

निवेदन

जिन्हें किसी भी मास की २५तिथि तक अंक प्राप्त न हो उन्हें तुरन्त कार्यालय को सूचित करना चाहिए जिससे अंक पुनः भेजा जा सके। विलम्ब से सूचना मिलने पर अंक अप्राप्य हो जाते हैं।

—व्यवस्थापक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० श्रावणः ख्रीष्टाब्दः २००३ जूलाई
वर्षम् ४७ अंकः १०

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखीं चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोधलेख:-

अष्टमज्योतिर्लिंगं मंदिरम्

– डा० कृष्ण नारायण पाण्डेय

★★

उत्तरे केदारनाथतः दक्षिणे रामेश्वरपर्यन्तम् द्वादशज्योतिर्लिंगं मंदिराणि प्राचीनकालस्य सनातनमानवधर्मरक्षा दुर्गरूपाणि सन्ति। विश्वमानचित्रवत् ब्रह्माण्डस्वरूपे (ग्लोबवत्) शिव मूर्तिः विराट् परमेश्वरस्य प्रतिकृतिः विद्यते। ३१०० ई० पू० समये सम्पादितशिवपुराणविवरणानुसारम् दक्षयज्ञे सतीबलिदानस्य अनंतरम् अमरदत्त सरोवरतटे एकान्तवासः कृतः भगवता शिवशंकरेण।

एकदा समुद्रे नौकां दृष्ट्वा दारुक वनस्य द्वारका राक्षसी द्वारा अपहृतवैश्येषु सुप्रिय नामकेन शिवाराधनम् कृतम्। सुप्रियस्य साधनया प्रसन्नः शिवः तत्र ज्योतिरूपे साक्षात् प्रगटितः राक्षस विनाशश्च जातः। तददिनात् इदम् ज्योतिर्लिंगस्थानम् इति प्रसिद्धम्।

द्वापरयुगे वनवासे ३१४० ई० पू० समये पाण्डवैः अस्य स्थानस्य यात्रा कृता। अमरदत्तसरोवर तटे एव आश्रमः संस्थापितः। तेषाम् धेनुः जलपानाय सरोवरम् गच्छति स्म। पाण्डवभीमेन दृष्टम् स्वाभाविकत्वेन गोस्तनेभ्यः दुग्धवर्षा भवति जलाशये। अस्य कारणस्य संशोधने पाण्डवैः जलाशये प्राप्तम् ज्योतिर्लिंगम्। अन्यार्थे विजयाय शक्ति प्राप्त्यर्थम् पाण्डवाग्रजयुधिष्ठिरेण अत्र शिवालयस्य स्थापना कृता। समये समये जीर्णोद्धारपरम्परया अस्य मंदिरस्थ स्वरूपम् नित्यनवीनम् विद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमाने स्थिति।—

आनंद रामायणे वर्णित श्री राम यात्रानुसारम् त्रेता-युगे द्वादशतमज्योतिर्लिंगं रामेश्वरस्य स्थापना (काशी), वैद्यनाथ (झारखण्ड) मल्लिकार्जुन रामेश्वरम् भीमशंकर (महाराष्ट्र) नागेश्वर घुष्मेश्वर त्र्यम्बकेश्वर (महाराष्ट्र) ओंकारेश्वर (मध्यप्रदेशे) सोमनाथ (गुजरात) केदारनाथ महाकाल (उज्जैने) इति ज्योतिर्लिंगतीर्थानि आसन्।

महाराष्ट्रप्रदेशस्य परभनी निकटे परली वैद्यनाथशिवालयत। १५० कि० मी० दूरम् स्थितम् नागेश्वर मंदिरम् प्राचीन संस्कृत संदर्भानुसारम् अष्टमज्योतिर्लिंगम् वर्तते।

अतिश्रद्धयां मम निकटस्थमंदिरम् अथवा मयानिर्मितम् मंदिरम् एव वास्तविकप्राचीनमंदिरम् अस्ति इति भावनया विवादितस्थलेषु किम् सत्यम् ज्ञानाय शास्त्रीयसंदर्भस्य एवमेव प्रयोगेण प्राचीन इतिहासस्य स्थलानाम् निर्धारणम् कर्तुम् शक्यते।

— उपनिदेशक आकाशवाणी
महानिदेशालय नई दिल्ली ११०००१

Central Library
Gurukul Kangri Uni...
Hard...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदानां महत्वं, वैज्ञानिकी उपयोगिता च

स्वकीयज्ञानमय प्रकाश—प्रकाशकानां, विविधविद्योपेतानां, नित्य-विज्ञानतत्वानां, परब्रह्मपरमात्मन: प्राणप्रक्रियायामवतिष्ठमानानां तात्विकस्वरूपोपवर्णकानां शब्दसमूहानां वेदानाम्महत्वं जगति को न जानाति ?

भारतीयानामस्माकं समस्तं साहित्यं वेदैरेव परिबृंहितं सदेव महम्महत्वमावहति। आर्यसंस्कृते: प्राणभूता इमे वेदा: साङ्गा:; सरहस्या:, सब्राह्मणा:, सोपनिषत्का: अस्माकं पूर्वजै: ऋषिभि: जन्म-जन्मान्तरेषु कृतभूरितपश्चरणेन दृष्टा:। उक्तं हि यथा—

"तद्येनास्तपस्यमानां ब्राह्मस्वयम्भ्वभ्यानर्षत् त ऋषयोऽभवंस्तदृषीणामृषित्वमिति विज्ञायते।" (१)

अस्माकं महर्षय: कृष्णाजिने उपविष्टा: अतीतानागत वर्त्तमानपदार्थानां युगपद् द्रष्टार: यं-यं तत्वं दृष्ट्वा उपदिष्टवन्त: ते तत्वभूता: वेदा:। एतादृशानां वेदानां महत्वमुपपादयता वेदविद्यापारावार पारीणेन परमवैज्ञानिकेन सायणाचार्येणोक्तम्—

"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद:।" (२)

---

१. निरुक्ते—अ०-२, पा.३ खण्ड-१२ (ऋषिशब्दनिर्वचनप्रसङ्गे)

२. ऋग्वेदभाष्यभूमिकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते च वेदाः पराशर-सत्यवतीसूनुना कृष्णद्वैपायनेन वेदव्यासेन शिष्याणां ग्रहणसौलभ्याय ऋग्यजुस्सामाथर्वभेदेन चतुर्धा विभज्य यथाक्रमं पैल-वैशम्पायन जैमिनि सुमन्तुभ्यः प्रदत्ताः। कालक्रमेण शिष्योपशिष्यैः गृहीतास्ते मन्त्रब्राह्मणात्मकाः सन्तः बहुशाखात्वमापन्नाः। मन्त्रात्मकाः ये वेदाः वर्तन्ते अथवा ब्राह्मणात्मकाः ये वेदाः वर्तन्ते तत्रोभयोर्नास्ति कश्चिद्भेदः। मन्त्रगततत्वानां विशदीकृत्य तानि-तानि ब्राह्मणानि तैः तैः ऋषिभिरूपदिष्टानि।

वस्तुतः देवताविज्ञानोपपादकाः शब्दा एव मन्त्राः। देवताविज्ञानोपपादकाः मन्त्रा एवं वेदाः। इत्युभयोर्मन्त्र ब्राह्मणयोः साङ्कर्येण व्यवहारे अभिन्नस्वरूपदर्शनमपि किमिव वैशिष्ट्यमस्तीत्युक्तं पृथक् भूतत्वात्।

इन्द्राग्निप्रभृतीनां देवानां सृष्टिस्थितिविनाशेषु यादृशं स्वरूपं दृष्ट्वा ऋषयः मन्त्रानुपदिष्टवन्तः। तत्र ऋषि सम्बुद्धौ तत्तद्देवतादीनां ऋषीणां पितृणाञ्च मौलिकतत्वानां यथास्वरूपमभवति, तस्योपव्याख्यानं मन्त्रेषु शब्दमुखेनोपवर्णितम्। अत एव ते मन्त्राः 'अग्निमीडे पुरोहितम्' १ 'इषेत्वोर्जेत्वा वायवस्थः' (२) 'अग्न आयाहि वीतये' (३)

"शन्नो देवीरभिष्टय" (४) प्रभृतयः केवलं तेषां तत्वानां स्वरूपवर्णने समर्थभूताः भवन्ति। न तु ते तत्तत्तत्वस्वरूपभूताः सन्ति। अयमेव भेदः साम्प्रतिके काले ग्रन्थात्मकेषु विद्यमानेषु ऋग्यजुस्सामाथर्ववेदेषु च वर्तते इति श्रुत्वैव अद्यतनीयाः विद्वांसश्चकिताः भवन्ति, किमपि शास्त्रान्तरं कथयतीत्याशङ्कन्ते। यतोहि अद्यावधि इमानेव शब्दरा-

---

१ ऋग्वेदे १/१/१., २. शुक्लयजुर्वेदे- १/१. ३: सामवेदे १/१/१/१.
४. अथर्ववेदे— १/१/१.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीन् वेदं मन्यमानाः विद्वांसः इतोऽप्यधिकं किमपि वेदानां तात्विकं स्वरूपमस्ती' त्यपि स्वीकर्तुं न क्षमाः भवन्ति । यथा चोक्तमस्ति—

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।" (५)

इति श्रुतिवचनश्रवणात् ब्रह्मणः शब्दब्रह्म च द्विविधं स्वरूपं सिध्यति । शब्दे ब्रह्मणि निष्णाता इति पद श्रवणात् इमे "अग्निमीडे पुरोहितम्" इत्यादयः ये मन्त्राः सन्ति ते सर्वे परमतत्वमुपवर्णयन्ति । इत्थं शब्दातिरिक्ताः विशिष्टतत्वात्मकाः वेदाः नित्याः अपौरुषेयाः सन्तीति प्रमाणी भवति ।

"वेद" इति पदेन चतस्रः संहिता एव परिग्राह्याः भवन्ति । परं तैत्तिरीयब्राह्मणे एका आख्यायिका श्रूयते, सा यथा—

"भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास, तं ह जीर्णं स्थविरं शयानमिन्द्र उपव्रज्योवाच भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमनेन कुर्या इति । ब्रह्मचर्यमेवैनेन चरेयमिति हो वाच । तं ह त्रीन् गिरिरूपान् अविज्ञातानिव दर्शयाञ्चकार । तेषां हैकैकस्मान् मुष्टिमाददे । स होवाच भरद्वाजेत्यामन्त्र्य वेदा वा एते । अनन्ता वै वेदाः । एतद् वा एतैस्त्रिभिरायुर्भिरन्वोचथा इति ।।" (६)

अत एव ईश्वरीय नित्यानन्तज्ञानेषु अनुविद्धाः वेदा अपि नित्याः अनन्ताश्चेति सर्वमनवद्यम् । एतिर्वेदैरेवादौ ब्रह्मा सृष्टिं करोती' ति

---

५. मैत्रायण्याम्—६/१२. अ. त्रि. उपनि- श्लोक-७,
वायु पुराणे—अं० ६, अ०-५, श्लोक-६४.
६. तैत्तिरीयब्राह्मणे-३/१०/११/३-४.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुति स्मृतिषु स्पष्टमुक्तम् । तद्यथा—

"सर्वेषां तु स नामानि कर्माणि च पृथक्-पृथक् ।
वेद शब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।। " (१)

इत्थं प्रतीयते यदतिविस्तृतं व्यापकञ्चास्ति वेदानां महत्वम् ।

एवं विधेषु चतुर्षु वेदेषु प्रतिमन्त्रेषु वैज्ञानिकसिद्धान्ताः निरूपिताः सन्तो'ति कथने सति अतिशयोक्तिनं भविष्यति । प्रक्रिया ग्रन्थत्वेन ब्राह्मणग्रन्थानां नामानि उपस्थातुं शक्यते । यतोहि वैज्ञानिकी परिभाषायां ग्रन्थः द्विविधः—

सिद्धान्तग्रन्थः प्रक्रियाग्रन्थश्च । सिद्धान्तग्रन्थे विविध सैद्धान्तिकतथ्यानां समाहारः भवति, तद्वदेवाऽत्रापि वेदेषु विविधकर्मणां सिद्धान्ताः प्रतिपादितास्सन्ति । तेषां कतिपयसैद्धान्तिकवचनानामुद्धरणानि अत्राधः प्रस्तूयन्ते । तानि यथा—

"अपां रसमुद्वयसं सूर्ये सन्तꣳ समाहितम् ।
अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ।। " (२)

मन्त्रेऽस्मिन् 'अपां रसः' अर्थात् जलस्य सूक्ष्मस्वरूपस्य वाष्पस्य सङ्केतोऽस्ति । तज्जलस्य सूक्ष्मस्वरूपमाधुनिकैर्वैज्ञानिकैः 'हाइड्रोजन' (HYDROGEN) नाम्ना उच्यते । 'अपां रसस्य यो रसः' इति पदेन तस्य वाष्पस्वरूपस्य (हाइड्रोजन इत्यस्य) यत् सूक्ष्मतमस्वरूपं वर्तते तदधुना 'हीलियम' (Heelium) उच्यते । इत्युभेऽपि वाष्पतत्वे 'सूर्ये

---

१. मनुस्मृतौ– १/२१.
२. शुक्लयजुर्वेदे– ९/३.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्तं समाहितम्' अर्थात् सूर्ये विद्यमाने स्तः।

आधुनिकैर्वैज्ञानिकैरपि सूर्ये नवति (९०) प्रतिशतं हाइड्रोजनना- तत्वम्, अष्ट (८) प्रतिशतं हीलियमनामकं तत्वम्, प्रतिशतद्वयञ्चान्यं द्रव्य वर्तते इति स्वीक्रियते।

ऋग्वेदे यजुर्वेदे च जलेनाग्नेः (विद्युत्इत्यस्य) (ELECTRIC) उत्पत्तिविषयकं तथ्यं मिलति। यथा—

"अपां नपाद् यो वसुभिः सह प्रियः।" (१)

अत्र 'अपां नपाद' पदं जलपुत्रत्वेनाग्निं सङ्केतयति। स पृथि- व्यादि अष्टवसुभिस्सह तिष्ठति। अन्यत्र च —

"तम् आपो अग्निं जनयन्त मातरः।" (२)

मन्त्रेऽस्मिन् मातृरूपं जले अग्निमुत्पादयती' ति। अथर्ववेदे च—

"अग्ने पित्तमपामसि" (३)

अत्राग्निं जलस्य पित्तत्वेन उष्मात्वेन (GAS) उक्तः। अर्थात् जलस्य घर्षणेनाग्निः (विद्युत्) उद्भवती' ति सिध्यति।

वेदेषु ऊर्जाशक्तेः प्रतिनिधिः अग्निः मन्यते। अग्नितत्वस्य मीमांसा ऊर्जा- याः मीमांसा अस्ति। अयमग्निः नोत्पद्यते न च नश्यति। अस्य केवलं रूपान्तरणं भवति। आधुनिकैर्वैज्ञानिकैरपि ऊर्जाशक्तिविषये इत्थमुक्तम्-

---

१. ऋग्वेदे- १/१४३/१.; २. ऋग्वेदे- १०/९१

३. अथर्ववेदे-काण्डे-१८, सूक्ते-३, मन्त्र-५.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'Energy con nither be creatd nor destroyed It ean be transformed from one form to another form.' 4

यजुर्वेदस्य कथनमिदमस्ति यदग्निः अक्षयः अमरश्चास्ति। यथा-

"मर्तेषु अग्निरमृतो निधायि।" (५)

अन्यच्च— "अग्निरमृतो अभवद् वयोभिः। (६)

"महाभाग्याद्देवताया एक एव आत्मा बहुधास्तूयते" (७)

इति वचनाच्च स्पष्टमेव यत् अग्निसोमात्मकेऽस्मिन् जगति सोम-स्वरूपाज्जलाद्दृश्योऽयमग्निः एक एवास्ति, किञ्च रूपान्तरणात् तस्या-नेकानि नामानि भवन्ति। अग्नौ सर्वकार्यसम्पादनक्षमता विद्यते। अत एव स विश्वकर्मा, महाशक्तिशालित्वात् विविधं रूपं धरति, अतः स पुरुरूपो विश्वरूपो वा उच्यते। यथोक्तं भगवता श्रीकृष्णेन—

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।" (१)

अयमग्निः समूहेन गतिशीलो भवति अतः स 'संहत' इत्युच्यते।

एवमुक्तप्रकारेण वेदेषु भौतिक-रासायनिक-जैविक-शिल्प-वानस्प-त्य कृषि गणितज्योतिषवृष्टिपर्यावरणभूगर्भादि विविध वैज्ञानिक

---

४. वेदों में विज्ञान (डा० कपिलदेव द्विवेदी) पृष्ठ-१, (वि, भा. अनु. परि-षद् ज्ञानपुर) ५. यजुर्वेदे- १२/२४. ६. यजुर्वेदे-१२/२५,
७. निरुक्ते-अ० ७, पादे-१, खण्डे-४ (देवता पदव्याख्याने)
११. श्रीमद्भगवद्गीतायाम् — अ०-१५, श्लोक-१४,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथ्यानां वर्णनानि मन्त्रेषु सूत्ररूपेण कृतानि सन्ति । एतेषां सर्वेषामपि सूत्रसिद्धान्तानां प्रक्रिया (ExPerimental Process) यज्ञशैल्या ब्राह्मण ग्रन्थेषु वर्णितानि सन्ति ।

एतेषां ऋग्यजुस्सामाथर्वाणां चतुर्णामपि वेदानां महत्वं वैज्ञानिकी उपयोगिता विषये च समष्टिरूपेण व्याख्यानमसम्भवमेवास्ति । यतोहि—

"असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमूर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ।। "

"इत्यलम्"

—१००१—

— डा० सुन्दर नारायण झा
'वेद व्याख्याता'
स. घ. आदर्श संस्कृत महाविद्यालय
डोहगी (हि०प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कवितावलिः (श्रीतुलसीदासकृतकवितावल्याः संस्कृतानुवादः)

समीक्षकः— डा० रूपनारायणपाण्डेयः

अनुवादकर्त्ता— द्विवेदी प्रेमनारायणः

(पुर्व्याऊ टौरी, जनतास्कूल निकटे, सागर ४७०००२)

प्रकाशक— देववाणी परिषद्, दिल्ली, आर-६, वाणीविहारः नई दिल्ली ११००५९।

मूल्यम्— १००/- पृ० सं० २×६५

वर्तमान काले संस्कृतवाङ्मये न केवलं मौलिका ग्रन्थाः प्रणीयन्ते, अपितु भाषान्तराणां श्रेष्ठा ग्रन्थाः संस्कृतेनानूद्य प्रस्तूयन्ते। संस्कृतपत्र-पत्रिकासु धारावाहिकरूपेणैकस्मिन्नेवाङ्के वा केचनानुवादग्रन्थाः प्राकाश्यं नीताः। कर्णपुरतः प्रकाशिते 'पारिजाते' (संस्कृतमासिके) श्रीजय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्करप्रसादस्य 'कामना' इति नाटकम्, आकाशदीप ममता प्रभृतयश्च कथाः तस्य विविध पुष्पेषु प्राकाश्यमनीयन्त । दिल्ली नगरतः प्रकाशिते 'अर्वाचीनसंस्कृते' (त्रैमासिके पत्रे) द्वाविंशे वर्षे चतुर्थेऽङ्के डा० प्रेमनारायण द्विवेदिनानूदिता कवितावलिः प्राकाश्यं नीता । तत एव 'कवितावलिः' स्वतन्त्रग्रन्थरूपेण प्रकाशिता देववाणीपरिषदा ।

हिन्दीभाषायां कालिदासेन गोस्वामिना तुलसीदासेन प्रणीता 'कवितावली' नितरां मार्मिकी रचनास्ति । तस्यां संस्कृतानुवादं विधाय डा० द्विवेदिमहाभागेन श्लाघनीयं कार्यं कृतम् । अनुवादकार्यस्य क्लिष्टत्वं विद्वांसो विजानन्त्येव । अनुवादे मूलग्रन्थस्य वैशिष्ट्यस्य संरक्षणेन साकं तस्य भाव सम्पत्ति साफाल्येन वक्तुं विरला एवार्हन्ति । डा० द्विवेदिनोऽनुवादे मूलग्रन्थस्य भावसम्पत्तिरुन्नतया विराजते । मूलेन साकमेकस्य पद्यस्य सौष्ठवमवलोक्येत ।

"बालधी बिसाल बिकराल, ज्वालजाल मानो
लंक लीलिबेको काल रसना पसारी है ।
कैधौं व्योमबीथिका भरे हैं भूरि धूमकेतु,
बीररस बीर तरवारि सो उघारी है ।।

'तुलसी' सुरेसचापु, कैधौं दामिनि कलापु,
कैधौं चली मेरु तें कृसानु सरि भारी है ।
देखें जातुधान जातुधानीं अकुलानी कहैं,
कानन उजार्‌यो, अब नगरु प्रजारिहै ।। " (कवितावली, सुन्दर-५)

"पुच्छोऽयं विशालो लसति कपिपतेर्ज्वालमालाकरालः
किंवा कालस्य जिह्वा प्रसरति विपुला हन्तुलङ्कां गरीतुम् ।
उल्कानां वा समूहो वियति विलसितो व्योमवीथ्यां भयाय
यद्वावीरो रसोऽयं निज निशितमसि धारयामास तीक्ष्णम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं वा देवेन्द्रचापं प्रविततमथवा दीर्घविद्युत्प्रकाशो
यद्वा भूभ्रात् सुमेरोः प्रसरति विपुलो ज्वालमाली कृशानुः ।
एवं वै यातुधाना व्यथितकरणकाश्चिन्तयन्तस्तदोचु-
रुन्मूल्योद्यानमच्छं दशमुखनगरीमेष धक्ष्यत्यशेषम् ।।"

(कवितावलिः, सुन्दर ५)

अनुवादकाव्येऽस्मिन् नीरसता प्रायशः कुत्रापि न विद्यते, सर्वत्र च रसिकाः मूलग्रन्थमनवलोक्य तस्य रमणीयतां सरसतां मार्मिकतां चानुभवितुं क्षमनुवन्ति । अयोध्यानगरीतः पदद्वयं गत्वा सीतां कथं श्राम्यति ?

"निष्क्रान्ताऽथ पदद्वयं प्रचलिता पुर्यां वधूजानकी
मालो वारिकणान्वितः सुमधुरो शोषं गतो चाधरो ।
श्रान्तापृ च्छति सा कियत् प्रचलनं कार्यां क्व पर्णैः कुटी
दृष्ट्वा चातुरतां प्रभोश्च नयने जाते जलैः पूरिते ।। "

(क०, अयोध्या ११)

मूलग्रन्थे प्रयुक्तान् अलङ्कारान् सर्वथात्र प्रस्तोतुमनुवादकर्त्ता न शशाक । वक्ष्यमाणपद्ये गोस्वामिना तुलसीदासेन 'बरदा' इति पदप्रयोगेण यद्वैलक्षण्यं विशदीकृतम्, तदनुवादे न विराजते, किन्तु भाववैशद्यं विलसत्येव ।

"सीस बसै बरदा, बरदानि, चढयो बरदा घरन्यो बरदा है ।
धाम धतूरो, विभूति को कूरो, निवास जहां सब लै मरे दाहैं ।।
व्याली कपाली है ख्याली, चहूँ दिसि भांगकी टाटिन्ह के पशदा हैं ।
राँकसिरोमनिका विनिभाग बिलोकत लोकप को करदा है ।। "

(क., उत्तर० १५५)

"गङ्गा मूर्धनि, रोहिनी च वरदा, वृद्धो वृषो वाहनं
धत्तूरं चितिभस्म पीठसविधे वासः श्मशाने सदा ।
पार्श्वे वै विजयावलाशपथिविर्व्याली कपाली च यः
सोऽयं रङ्कशिरोमणिः प्रकुरुते दृष्टया क्षणाल्लोकपान् ।। "

(क., उत्तर, १५५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि कविप्रवरो द्विवेदिमहाभागोऽनुवादकाव्येऽस्मिन् मूलमेवानुसर्तुं प्रयतते, तथापि यत्र तत्र तथा कर्तुं शक्तो न भवति। तद् यथा प्रथमे पद्ये 'जे न ठगे धिक-से' इति पद्यांशस्य रूपान्तरं न विद्यते। पश्यन्तु धीमन्तः—

"अवधेस के द्वारे सकारें गईं सुत गोद कै भूपतिलें निकसे।
अवलोकि हौं सोच विमोचन को ठगि सो रही, जे न ठगे धिक-से।
"प्रातः प्राप्ता त्वयोध्या दशरथभवने निर्गतोऽङ्के स नीत्वा
सूनुं शोकापनोदं स्वमनसि मुदिता वीक्ष्य जामा तदानीम्। —"

ग्रन्थस्य मुद्रणे प्रायशो त्रुटिरहितं भव्यं च विद्यते। गोस्वामितुलसीदासकृतकवितावल्या भव्यं भावोपेतं चानुवादं कृत्वा विद्वद्वर्येण डा० द्विवेदिमहोदयेन संस्कृतानुवादकाव्यसम्पदायाः समृद्धिः संवर्धिता। पूर्वमपि पण्डितप्रवरेण बिहारी सतसई काव्यस्य 'सौन्दर्यसप्तशती रूपेण संस्कृतकाव्यानुवादः संस्कृतज्ञानां रसास्वादनाय १९७० तमे खिष्टाब्दे× प्रास्तूयत। मन्ये शीघ्रमेव तत्कृतो रम्यः संस्कृतपद्यानुवादः श्रीरामचरितमानसस्य विदुषां प्रसादयेत्।

(द्रष्टव्यम्, अर्वाचीनसंस्कृतम्, २२/४, सम्पादकीयम्, पृ. २)

जयतु संस्कृतं संस्कृतिश्च।

***

+ रहीम पद्माकर मैथिलीशरणगुप्त सूर्यकान्तत्रिपाठि 'निराला महादेवी वर्मा मीरा सूर कबीर प्रसाद प्रभृतीनां कवीनां काव्यांशाः संस्कृतभाषयानूदिताः दूर्वा (२-४०) प्रभृति पत्रिकासु, डा० रमाकान्तशुक्लाभिनन्दनग्रन्थे 'देववाणी सुवासे' च प्राकाश्यं नीता विलसन्ति। इत्थं हिन्दीभाषायाः श्रेष्ठकवीनां रम्यान् काव्यांशान् कविसत्तमेन डा० द्विवेदिमहाभागेन संस्कृतभाषयानूद्य सुरभारतीवाङ्मयस्य महती सपर्या व्यधायि। यद्यपि तस्य बहवोऽनुवादग्रन्थाश्चप्रकाशित एव सन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भारते भातु भारती

— डा० रामकृष्ण सराफः
भोपाल (४६२०१६)

★★

मेघो यच्छति वारीणि फलानि पृथिवीरुहः ।
वसुधा वसुशाश्चि सुधांवर्षति भारती ।१।

बलं दत्ते महावीरो वित्तञ्च कमलालया ।
देवो विनायको विद्यां प्रज्ञां ददाति भारती ।२।

समवाये विमूढानां विदुषामस्ति नोगतिः ।
काककोकिलयोर्मध्ये भेदं करोति भारती ।३।

किकर्यं किमकर्मेति महति संशयस्थले ।
यत्कर्त्तव्यमकर्त्तव्यं तद् द्योतयति भारती ।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधर्माचरणं माभूद् विद्यालयेषजालये ।
न्यायालये भवेन्न्याय आशां करोति भारती ।५।

वैपरीत्यं तु विश्वस्मिन् सर्वे स्वार्थरता गता ।
व्याप्तिर्भयस्य सर्वत्र विषण्णा हृदि भारती ।६।

पृथिव्यां दुर्दशां दृष्ट्वा सविशेषञ्च भारते ।
आतङ्कवादनग्नत्वं कम्पितातीव भारती ।७।

धर्मं आतङ्कवादस्य कोऽपि नासीत्त विद्यते ।
क्रूरहिंसैव तद्धर्मं उच्चैर्वदति भारती ।८।

राष्ट्रे साम्प्रतिके काल एकताऽपरिहार्यता ।
स्मारयत्यनिशं देशं म्लाना मनसि भारती ।९।

रक्षयतां भारतं शश्वत् प्रसक्तैर्वीरसैनिकैः ।
गुञ्ज्यान्निस्वन आकाशे भारतेभातु भारती ।१०।

★★★



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा म्रियध्वं ताडग्रन्थाः

-- जनार्दनः
संस्कृतभारती, 'अक्षरम्'
गिरिनगरम्, बेङ्गलूरु-८५

★★

ताडग्रन्थागारे, विश्वविद्यालयेषु, मठमन्दिरेषु, ताडग्रन्थसङ्ग्रहे रुचिमतां गृहेषु, सामान्यगृहेषु च सन्ति लक्षाधिकाः ताडग्रन्थाः। क्वचित् एते सुरक्षिताः सन्ति, क्वचित् एतेषां संरक्षणकार्यं प्रचलति, क्वचित एते राशीकृताः सन्ति, क्वचित् एते कीटैः भक्ष्यमाणाः अपि सन्ति !!

गतशतकस्य आरम्भपर्यन्तम् अपि वचनं श्रूयते स्म भासनाटकानि 'आसन्' इति । किन्तु तानि केनापि न दृष्टानि आसन्। गतशतकस्य प्रारम्भकाले महामहोपाध्यायः। टि. गणपतिशास्त्री भासनाटकानि प्रकाशितवान्। अतः अद्य वयं भासकृतीः पश्यन्तः स्मः।

गतशतकस्य उत्तरार्धे 'वृक्षायुर्वेद' नामिका कृतिः प्रकाशिता, यस्याश्च मूलकृतिः भारते न आसीत्।

पुणेस्थया भाण्डारकरसंस्थया महाभारतस्य प्रमाणभूता आवृत्तिः प्रकाशिता, विविधाः आवृत्तीः परीक्ष्य। एतस्य सर्वस्य आधारः कः ? ताडग्रन्थाः !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकस्मिकतया अन्वेषणपुरस्सरं वा प्राप्तानां ताडग्रन्थानाम् आधारेण एतादृशानि शतशः, सहस्रशः वा प्रशस्तानि कार्याणि प्रवृत्तानि। एवं संस्कृतक्षेत्रे ताडग्रन्थानां महत्त्वं तावत् अनितरसाधारणम्।

एतत् महत्त्वम् आसीत् भविष्यति च।

भारतम् एव एतस्य ताडग्रन्थराशेः आश्रयभूमिः. 'ताडग्रन्थः' इत्येतत् अत्र उपलक्षणम्। ताडपत्रे, भूर्जपत्रे, वस्त्रस्योपरि काष्ठे, शिलासु, कागदेषु वा लिखिताः अंशाः अपि अत्र उपसंगृह्यन्ते।

ताडग्रन्थागारे, विश्वविद्यालयेषु, मठमन्दिरेषु; ताडग्रन्थसंग्रहे रुचिमतां गृहेषु सामान्यगृहेषु च एते सन्ति। क्वचित् एते सुरक्षिताः सन्ति, क्वचित् एतेषां संरक्षणकार्यं प्रचलति, क्वचित् एते राशीकृताः सन्ति, क्वचित् एते कीटैः भक्ष्यमाणाः अपि सन्ति !!

ताडग्रन्थान् अधिकृत्य सामान्याः अंशाः केचन एवं वक्तुं शक्याः—

- अतिबृहत्तमः ताडग्रन्थराशिः भारते एव अस्ति।
- एतेषु के विषयाः सन्ति इति समग्रतया अध्ययनं तु न कृतम्। १०-२५% ग्रन्थानाम् आवली (नामविवरणादिसहिता) कृता अस्ति अद्यावधि। तस्याम् ३/४ भागः अपरिशोलितः एव तिष्ठति।
- एषा आवली या अल्पभागस्य सज्जीकृता तस्याम् अपि समानता वैज्ञानिकक्रमानुसारिता वा नास्ति।
- वैयक्तिकगृहेषु स्थिताः ताडग्रन्थाः तु संरक्षणोपायरहिताः एव। ताडपत्रागारेषु अपि एतेषां संरक्षणाय वैज्ञानिकः क्रमः न अनुसृतः सर्वत्र।
- ताडपत्राणि अन्यपत्राणि च अग्रिमेषु ५० वर्षेषु वा जीर्णतां यास्यन्ति प्रायः। कीटभक्षणं, वाय्वादिपरिसरः वा अत्र कारणं भवितुम् अर्हति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते ताडग्रन्था—

भारते कति ताडग्रन्थाः स्युः ? १९८८-१९९० कालावधौ इण्टेक् (INTACH) संस्थायाः प्रतिनिधित्वेन डा० एस्. सि. बिश्वासः एम् के. प्रजापतिः इत्येताभ्यां ताडपत्राणां सर्वेक्षणं कृतम् आसीत् । ताभ्यां ११००-मुद्रितावलीः, सप्ततिग्रन्थालयेषु स्थिताः हस्तलिखितावलीः, विविध-संस्थानां व्यक्तीनां च आवलीः च परिशील्य एतत् सर्वेक्षणं कृतम् । तस्मात् प्राप्ताः अंकाः एते —

★ भारते विद्यमानाः ताडग्रन्थाः ५०, ००, ०००

★ भारतसम्बद्धाः ताडग्रन्थाः युरोपदेशेषु विद्यमानाः ६०,०००

★ भारतसम्बद्धाः ताडग्रन्थाः एशियाखण्डे विद्यमानाः १, ५०,०००

एतेषु ताडग्रन्थेषु काव्यानि (पद्यगद्यनाटकादीनि), आयुर्वेदः, इतिहासपुराणादीनि, धार्मिकविषयाः, तत्त्वशास्त्रम्, ज्योतिषम्, शिल्पशास्त्रम्, गणितम्, विविधाः, कलाः, अनेकानि शास्त्राणि इत्यादयः सन्ति । एतेषु संस्कृतसम्बद्धाः ६७·/· सन्ति । अन्यभारतीयभाषासम्बद्धाः २५·/· अरेबिक् पर्शियन् तिब्बेटनादिसम्बद्धाः ८·/· सन्ति ।

ताडग्रन्थावल्याः इतिहासः—

यद्यपि भारतं ताडग्रन्थानां शेवधिः अस्ति, तथापि अत्र ताडग्रन्थावलीनिर्माणकार्यं तु आरब्धं प्रायः आंग्लानां काले । तादृशी मुद्रितावली उपलभ्यते १८०७ तमवर्षीया । सर्विलियमः तत्पत्नी च तां सज्जीकृत्य प्रकाशितवन्तौ । १८९१ तमे वर्षे थियोडर ओफ्राक्ट् (Theodor Aufrecht) वर्यः ताडग्रन्थावलीनाम् आवलीं प्रकाशितवान् त्रिषु सम्पुटेषु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९०३ तमे वर्षे तृतीयस्य सम्पुटस्य प्रकाशनं जातम्। १८६८-१८७८. वर्षयोः मध्यन्तरे भारतसर्वंकारेण आत्मना कृतस्य सर्वेक्षणस्य सारः प्रकाशितः आसीत्। १९४० तमे वर्षे पि. के. गोडेवर्यः विविधसंस्थाभिः प्रकाशितानां (१८०७-१९४० तमवर्षयोः मध्यकाले) ७३ ताडग्रन्थावलीनां सूचीं संगृहीतवान्। एतदतिरिच्य तेन २९ आवल्यः अपि निर्दिष्टाः, यासां प्रकाशनवर्षादिकं न उल्लिखितम्। १९३५ तमे वर्षे मद्रासविश्वविद्यालयेन उपलभ्यमानानां ताडग्रन्थावलीनां सङ्कलनं कृत्वा अकारादिक्रमेण प्रकाशनम् आरब्धम्। १४ सम्पुटाः प्रकाशिताः अद्यावधि, येषु च 'ब' कारादिग्रन्थानां नामप्रकाशनं जातम्। ततोऽपि अग्रे प्रकाशनं न सम्पन्नम् अद्यावधि।

एवम् ऊह्यते यत् ११०० ताडग्रन्थावल्यः स्युः प्रपञ्चे विविधसंस्थाभिः सञ्जीकृताः इति। एवम् आवलीनां सूचीनिर्माणम् एव महाकार्यते। एतदतिरिच्य मठमन्दिरेषु, गृहेषु, व्यक्तिसंग्रहेषु च ये ताडग्रन्थाः महता प्रमाणेन स्युः तेषां सूचीनिर्माणं तु नितरां कष्टसाध्यम् अस्ति।

भारते प्रायः ३०० ग्रन्थालयेषु, विदेशेषु ७७ ग्रन्थालयेषु च ताडग्रन्थसंग्रहः अस्ति इति ऊह्यते। भारते विश्वविद्यालयेषु, ताडग्रन्थागारेषु च ये ताडग्रन्थाः सन्ति तेषाम् (प्रमुखसंस्थानाम्) आवली 'अ' कोष्टके दत्ता अस्ति। तथैव अन्यदेशेषु स्थितानां ताडग्रन्थानाम् आवली अपि दत्ता अस्ति 'ब' कोष्टके।

ताडग्रन्थावलीनिर्माणं स्वातन्त्र्योत्तरम्—

स्वातन्त्र्योत्तरकाले भारतसर्वंकारेण ताडग्रन्थानां सर्वेक्षणाय संरक्षणाय च केचन प्रयासाः कृताः। ते च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते ताडग्रन्थाः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी	१,४०,०००
राजस्थानप्राच्यसंशोधनालयः, जोधपुरम् (अष्टसु शाखासु अविहाय)	१,१६,१२३
प्राच्यताडग्रन्थागारम्; चेन्नै	७२,६२०
प्राच्यताडग्रन्थागारम्, तिरुवनन्तपुरम्	५६,०००
टि. एम्. एस् एस्.एम्. ग्रन्थालयः, तञ्जावूरु	४७,६२५
एल्. डि. इन्स्टिटयूट् आफ् इण्डोलजी	४५,०००
अडयार् ग्रन्थालयः शोधकेन्द्रम्, चेन्नै	४०,०००
ओरिस्सा राज्यसङ्ग्रहालयः	३७,०००
एशियाटिक् सासैटी, कल्कत्ता	३२,०००
अभयजैन् ग्रन्थालयः, बिकानेर्	३०,०००
प्राच्यसंशोधनालयः, बरोडा	२५,०००
आ. प्र. प्राच्यताडग्रन्थागारम्, हैदराबाद	२३,११५
खुबाबक्ष प्राच्यग्रन्थालयः, पटना	२०,०६०
राजस्थानप्राच्यविद्यासंशोधनालयः, जोधपुरम्	२०,०००
गङ्गानाथझासंस्थानम् अलहाबाद	२०,०००
भारतेतिहाससंशोधनमण्डलम्, पुणे	२०,०००
पञ्जाबविश्वविद्यालयः	१८,३६५
राज्यकेन्द्रग्रन्थालयः हैदराबाद	१७,०००
विश्वभारतीविश्वविद्यालयः	१५,३५४
रामपुररझाग्रन्थालयः, रामपुरम्	१५,०००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागपुरविश्वविद्यालयः, नागपुरम्	१४, ५००
राजस्थान स्टेट् आर्किव्स्	१४, ०००
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः	१३, ०००
कलकत्ताविश्वविद्यालयः	१३, ०००
अलीगढमुस्लिम्विश्वविद्यालयः	१२, ०००
डेक्कन् कालेज् शोधसंस्थानम्	११, ०९२
सर्वकारीयताडग्रन्थागारम्, अलहाबाद	११, ०००
बनारसहिन्दुयुनिवर्सिटि	१०, ५००
वैदिकसंशोधनमण्डलम्, पुणे	१०, ३००
केन्द्रीय बौद्धोच्चयनसंस्था, लेह्	१०, ०००
सालारजंग्म्यूसियम्, हैदराबाद	१०, ०००
उस्मनियाविश्वविद्यालयग्रन्थालयः	६, ४२८
शिवाजीविश्वविद्यालयग्रन्थालयः, कोल्हापुर	५, ६७३
पुणेविश्वविद्यालयः	४, ४१६

कोष्टकम् 'अ' (शेष अग्रिमांके)

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यचारः

भारत मौरिशसदेशयोः सम्बन्धे संस्कृतस्य महत्वपूर्णभूमिका

दिल्लीसंस्कृत अकादमी ७-६-२००३ दिवसे संस्कृतसूक्तिसमुच्चय-महाभारत खण्डस्य लोकार्पण समारोहम् मारिशस देशस्य दिल्लीस्थ उच्चायोग कार्यालये आयोजितवती। अस्य ग्रन्थस्य लोकार्पणं कुर्वन् मारिशसदेशस्य उच्चायुक्तः श्री धनिलाल शिवः प्रावोचत् " समस्तसंसारः संस्कृत साहित्यस्य ऋणी वर्तते। गणतन्त्रम्, पञ्चायतनराज्यम्, लोकपालव्यवस्था सर्वमिदं संस्कृतभाषातः आयातम्। संस्कृतभाषा न केवलं भारतस्य एव वर्तते किन्तु इयं भाषा समस्तससारस्य भारतीयमूललोकानां एकतायाः अखण्डतायाः सम्पन्नतायाश्च आधारभूता। भारत मारिशस देशयोः सांस्कृतिकसम्बधसुदृढतायै मारिशसे संस्कृत प्रचार-प्रसारकृते महत्वपूर्णप्रयासाः अपेक्ष्यन्ते।

मारिशसदेशे यद्यपि हिन्दी संस्कृतबगला-महाराष्ट्री उर्दू आदिभाषाध्ययनेन आजीविका न मिलति तथापि तत्र लोकाः आसामध्ययन नूनमेव कुर्वन्ति।" दिल्लीमुख्यमन्त्रिणः संसदीयसचिवेन कार्यक्रमस्याध्यक्षता कृता।

अकादमी सचिवेन श्रीकृष्णसेमवालेन कथितं यत् एकसहस्रमिताः सूक्तयः एकत्रीकृताः सन्ति। अस्य ग्रन्थस्य चत्वारिंशत् भागाः प्रकाशयिष्यन्ते एतेषु इदानीं यावत् १४ भागाः प्रकाशिताः। महाभारतखण्डस्य संग्रहकर्त्री डा० सरस्वती बाली शालपुष्पगुच्छोपायनैः सम्मानिता।

अत्र एवं विधसामयिकप्रयासकृते डा० श्री कृष्णसेमवालः सर्वथा अभिनन्दनीयः।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोलननगरे श्रीमद्भागवत पारायणप्रशिक्षण शिविरः सम्पन्नः

गतमासे सप्ताहपर्यन्तं शिविरोऽयं समायोजितः आचार्यं केशव शर्मणः अध्यक्षत्वे श्री दिवाकर, रामानन्द, परमानन्दादिभिः दशसंख्यकविद्वद्भिः प्रशिक्षणं प्राप्तम् । भोजननिवासादि सर्वव्यवस्था श्री आचार्येण एतेषां कृते समायोजिता। अनेन नव भागवतप्रवाचकानां पथप्रदर्शनं जातम् । एवं विधप्रयासाः भारतीयसंस्कृतिसंरक्षणाय परमावश्यकाः सन्ति । मन्ये प्रशिक्षितविद्वांसः अग्रेऽस्या विचारधारायाः प्रचारं करिष्यन्ति ।

यात्राः- लद्दाखे लेह नगरे शक्तिपीठम्

शनिवासरे २१ जून २००३ दिनांके श्रीनगरतः लेह वायुयान यात्रायाम् पर्वतस्तनरूपपृथ्वीदर्शनम् कृत्वा प्रातः ११ वादने १८ सेण्टीग्रेड तापमानयुते विमानपत्तने गमनम् कृतम् । आकाशवाणी कारगिलस्य केन्द्र निदेशक श्री रफीक राज द्वारा 'खतक' वस्त्राहारप्रदानेन स्वागतम् कृतम् । निकटस्थ स्पितुक गुम्फा क्षेत्र कालीदेवी मंदिरम् दृष्टुम् प्रस्थानम् कृतम् कार यानेन । विशाल मूर्तित्रय सहितम् ९ दुर्गा तारादेवी बौद्ध मंदिरम् इति मत्वा पूजनम् प्रचलति ।

तंत्र चूडामणि ग्रन्थानुसारम् ५१ शक्तिपीठेषु क्रमशः अमरनाथे (कश्मीरे) श्री पर्वते (लद्दाखे) कैलासे गौरीकुण्डे (तिब्बते) शक्ति पीठत्रयम् वर्णितम् । श्रीपर्वते (लेह) शक्तिपीठे देव्याः नाम श्रीसुन्दरी भैरव नाम सुन्दरानंदः इति उल्लेखितम् । प्रायः १००० वर्ष प्राचीने वर्तमाने मंदिरे महिषासुर मर्दिनी, विंशति हस्त युता काली, सरस्वती मूर्तित्रयस्य वार्षिकोत्सवः जनवरी मासे समायोज्यते । ५२ शक्तिपीठाः १२ ज्योतिर्लिंग मन्दिराणि भवन्तु पुनः सनातनधर्मं दुर्गरूपम् इति भक्तैः प्रयासः करणीयः । जापाननिर्मित शान्तिस्तूपधर्मशालायाम् एवम् विचारः कृतः धर्मस्थलम् मानवता केन्द्रे परिवर्तनाय ।

(प्रभातम् समाचार सेवा) — डा. कृष्ण नारायण पाण्डेय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० भाद्रपदः खीष्टाब्दः २००३ अगस्त
वर्षम् ४७ अंकः ११

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखीं चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदविकृति पाठः

— डा० शम्भु कुमार झा

★★

ऋक्संहिता त्रिरभ्यस्य यजुषां वा समाहितः ।
साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते ।।

संहिता नयते सूयं पदं च शशिनः पदम् ।
क्रमश्च नयते सूयं यत् तत् पदमनामयम् ।।

कालिन्दी संहिता ज्ञेया पदमुक्ता सरस्वती ।
क्रमेणावर्तिता गंगा शम्भोर्वाणी तु नान्यथा ।। (१)

वेदसंहितायाः अध्ययनाध्यापनं यज्ञादौ विनियोग—निरूपणाय भवति । यज्ञे स्वाध्याये च संहितायाः सम्बन्धात् पदाध्ययने संहितार्थं परिज्ञानं प्रयोजनमिति गम्यते । उक्तं च भाष्यकारेण पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराण्यर्थमवगमयन्ति" । पदपूर्वकं पदार्थंपरिज्ञानं पदार्थपरिज्ञानपूर्वकं वाक्यार्थं परिज्ञानं दर्शयति । ...

'क्रमः स्मृति प्रयोजनम्' (२)

---

(१) याज्ञवल्क्य शिक्षायां पूर्वार्द्धे—२६.२८ श्लोकाः
(२) प्रातिशाख्ये-४-१८२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमो हि संहिताविषयं स्मरणं दृढी करोति पदविषयं च। क्रमश्चधिष्यता व्याकरणे तदधीते तद्वेद इत्युपक्रम्य 'क्रमादिभ्यो वुन्' इत्यत्र क्रममधीतेऽसौ क्रमकः पदका इति सिद्धम्। विकृतिपाठस्य मूलं पदपाठो भवति। पदज्ञानं विना जटादिविकृतीनां ज्ञानमसम्भवम्। सर्वं प्रथमं पदपाठो विधेयः ततश्च 'द्वयोर्द्वयोः क्रमः' अर्थात् क्रमपाठः कर्तव्यो भवति विद्वद्भिः अन्ते च अष्टविकृतयो विधातव्याः। इति सर्वं मूलपाठमेव दृढी करोति अर्थात् संहितापाठस्य सम्यक् ज्ञानाय पदक्रमादयः पाठाः विधीयन्ते तद्यथा चोक्तम्—

अष्टविकृतीनां नामानि लिख्यन्ते—

जटामाला शिखा रेखा ध्वजो दण्डो रथोघनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः॥ (१)

जटायाः लक्षणं विकृतिकौमुद्याम्—

ब्रूयात् क्रमपिर्यासक्रममीदृग्विधिं दिशेत्।
जटाख्यां विकृतिं धीमान् विज्ञाय क्रम लक्षणम्॥

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत् क्रमम्।
विलोमे पदवत्संधिरनुलोमे यथाक्रमम्॥

जटायाः लक्षणं अन्यत्—

---

(३) वेदविकृति लक्षण संग्रहे
(१) विकृति कौमुदी–५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमं यथोक्तं प्रब्रूयात् व्युत्क्रमेण क्रमेण च ।
सलक्षणं सर्वसधौ जटा सा प्रोच्यते बुधैः ।। (२)

हयग्रीवकृत जटालक्षणम् ..

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।
अभ्यस्य पूर्वं च तथोत्तरे पदेऽवानमेवं हि जटाभिधीयते ।।

श्रीमधुसूदननमस्करिकृत जटालक्षणम्—

द्विपदादिक्रमाः पञ्च प्राक् क्रमाद् व्युत्क्रमात्ततः ।
पुनः क्रमादुच्चरिता जटात्वं प्रापिता बुधैः ।।

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा ।
संक्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः ।।

अग्निमीळं इत्यनुक्रमः । ईळा ईळ इत्युत्क्रमः । ईळेऽग्निमिति व्युत्क्रमः ।

सामान्यरूपेण (१-२-२-१-१-२) इति नियमः

अर्थात यज्ञेन यज्ञम् अस्य जटापाठ १६:—
यज्ञेन यज्ञं यज्ञं यज्ञेन यज्ञमिति ।

मालालक्षणं-क्रममाला—

ब्रूयात क्रम विपर्यासावधंचंस्यादितोऽन्ततः ।
अन्तं चादि नयेदेवं क्रममालेति कीर्तिता ।।

---

(२) अज्ञात नाम्नः कस्यापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पमाला - मालामालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ।
आवर्तन्तेऽत्रयस्तस्यां क्रमव्युत्क्रम सक्रमाः ।।

शिखालक्षण- पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ।

रेखालक्षणं यथा...

क्रमाद द्वित्रिचतुः पञ्चपदक्रममुदाहरेत् ।
पृथकपृथग्विपर्यस्य रेखामाहुः पुनः क्रमात् ।

ध्वजः— ब्रूयादादौ क्रमं सम्यगन्तादुत्तारयेदिति ।
वर्गं वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः ।।

दण्डः— क्रममुक्त्वा विपर्यस्य पुनश्चक्रममुत्तरम् ।
अर्धंजादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते ।।

रथः— पादशोऽर्धंशो वापि सहोक्त्या दण्डवद्रथः ।

घनः-द्विविधः- अन्तात् क्रमं पठेत् पूर्वमादिपर्यन्तमानयेत् ।
आदिक्रमं जयेदन्त घनमाहुर्मनीषिणः ।।

द्वितीयं लक्षणम्- शिखामुक्त्वा विपर्यस्य पुनस्त्रिपदमाहरेत् ।
अथ (१) घन इति प्रोक्त इत्यष्टौ विकृतीः पठेत् ।।

सामान्येन घन पाठस्य एष नियमः—

(१-२-२-१-१-२-३-३-२-१-१-२-३)

---

(१) शिखा जटा घनः प्रोक्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेषां मन्त्राणां रथ पाठो न भविष्यति । रथपाठे पदानां साम्यमपेक्ष्यते 'समे ऋचौ गृहीत्वा च रथवच्चलति क्रमः' । यथा रथस्य (रथसंज्ञकस्य) चक्र समे भवतः तथैव रथविकृतौ अपि सर्वाणि पदानि समानानि भवितव्यानि । यदि एकं चक्र उच्च अपर च नीचं स्यात् तर्हि रथस्यगतिः असमाना भवेत् । अतएव वेदविकृतिलक्षणसंग्रहे प्रोक्तं—

अथ पुरुष सूक्त गतस्य प्रथम मन्त्रस्य अष्टसु विकृतिषु क्रमानुरोधेन पाठः प्रस्तूयते । तत्र प्रथमा सहिता (मूलमन्त्रः)

सहस्रशीर्षा पुरुष. सहस्राक्षः सहस्रपात् ।
सभूमि ँ सर्व्वतस्पृत्वा त्यतिष्ठद्दशाङ्गुलम् ।। यजुर्वेदः।

पदपाठः- सहस्रशीर्षेति सहस्रशीर्षा पुरुषः । सहस्राक्ष इति सहस्र अक्षः । सहस्रादिति सहस्रपात् । सः । भूमिम् । सर्व्वतः । स्पृत्वा अति अतिष्ठत् । दशाङ्गुलमिति दश अङ्गुलम् ।।

क्रमपाठः... सहस्रशीर्षा पुरुषः । शहस्रशीर्षेति सहस्र शीर्षा । पुरुषः सहस्राक्षः । सहसाक्षः सहस्रपात् । सहस्राक्ष इति सहस्र अक्षः । सहस्रपादिति सहस्र पात् । सभूमिम् । भूमि ँ सर्व्वतः । सर्व्वतस्पृत्वा । स्पृत्वाति । अत्यतिष्ठत् । अतिष्ठद्दशाङ्गलम् । दशाङ्गुलमिति दश अङ्गुलम् ।

प्राचीनग्रन्थेषु यथा सर्वेषां वेदानां पदपाठः समुपलभ्यते न तथा क्रमपाठः ग्रन्थेषु प्राप्यते । परन्तु ऋग्वेद प्रातिशाख्ये विस्तरेण क्रमपाठस्य चर्चा कृता वर्तते ।

(१) अथ सहस्रशीर्षेति मन्त्रस्य जटापाठः प्रस्तूयते—

१-२-२-१-१-२ नियमः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः। सहस्रशीर्षेति सहस्रशीर्षा। पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः पुरुषः सहस्राक्षः। सहस्राक्षः सहस्रपात् सहस्रपात् सहस्राक्षः सहस्राक्षः सहस्रपात्। सहस्राक्ष इति सहस्र अक्षः। सहस्रपादिति सहस्रपात्। सभूमि भूमि ँ सः स भूमिम् भूमि ँ सर्व्वतः सर्व्वतो भूमिं भूमि ँ सर्व्वत। सर्व्वत स्पृत्वा स्पृत्वा सर्व्वतः सर्व्वत स्पृत्वा। स्पृत्वात्यति स्पृत्वा स्पृत्वाति। अत्यतिष्ठदतिष्ठदत्यत्यतिष्ठत्। अतिष्ठद्दशाङ्गुलं दशाङ्गुलमतिष्ठदतिष्ठद्दशाङ्गुलम्। दशाङ्गुलमिति दश अङ्गुलम्॥

२. माला क्रममाला— सहस्रशीर्षेति सहस्रपादिति सहस्रपात्। सहस्रशीर्षापुरुषः। सहस्रपात् सहस्राक्षः। पुरुषः सहस्राक्षः। सहस्राक्ष इति सहस्र अक्षः। सहस्राक्षः पुरुषः। सहस्राक्षः सहस्रपात्। पुरुषः सहस्रशीर्षा। सभूमिम्। दशाङ्गुलमिति दशअङ्गुलम्। भूमि ँ सर्व्वतः। दशाङ्गुलमतिष्ठत्। सर्व्वतस्पृत्वा। अतिष्ठदति। स्पृत्वाऽति। अतिस्पृत्वा। अत्यतिष्ठत्। स्पृत्वा सर्व्वतः। अतिष्ठद्दशाङ्गुलम्। सर्व्वतो भूमिम्। दशाङ्गुलमिति दशअङ्गुलम्। भूमि ँ सः।

पुष्पमाला— सहस्रशीर्षा पुरुषः। पुरुषः सहस्रशीर्षा। सहस्रशीर्षापुरुषः। सहस्रशीर्षेति सहस्रशीर्षा। पुरुषः सहस्राक्षः। सहस्राक्षः पुरुषः। पुरुषः सहस्राक्षः। सहस्राक्षः सहस्रपात् सहस्रपात् सहस्राक्षः। सहस्राक्षः सहस्रपात्। सहस्राक्ष इति सहस्र अक्षः। सहस्रपादिति सहस्रपात्। सभूमिम्। भूमि ँ सः। सभूमिम्। भूमि ँ सर्व्वतः। सर्व्वतो भूमिम्। भूमि ँ सर्व्वतः। सर्व्वत स्पृत्वा। स्पृत्वा सर्व्वतः। सर्व्वत स्पृत्वा। स्पृत्वाऽति। अतिस्पृत्वा। स्पृत्वाऽति। अत्यतिष्ठत्। अतिष्ठदति। अत्यतिष्ठत्। अतिष्ठद्दशाङ्गुलम्। दशाङ्गुलमतिष्ठत्। अतिष्ठद्दशाङ्गुलम्। दशाङ्गुलमिति दशअङ्गुलम्॥

शिक्षा— १-२-२-१-१-२-३ (नियमः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्राक्षः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः पुरुषः पुरुषः; सहस्राक्षः सहस्रपात् । सहस्राक्षः सहस्रपात् सहस्रपात् सहस्राक्षः सहस्रपात् । सहस्राक्षेति सहस्राक्षः । सहस्रपादिति सहस्रपात् ।

सभूमिं भूमिं ँ सः सभूमिँ सव्वंतः । भूमिं ँ सर्व्वतः सर्व्वतो भूमिं भूमिं ँ सर्व्वतस्पृत्वा । सव्वत स्पृत्वास्पृत्वा सव्वंतः सव्वंतः स्पृत्वाऽति । स्पृत्वात्यतिस्पृत्वास्पृत्वात्यतिष्ठत् । अत्यतिष्ठदतिष्ठदत्यत्यतिष्ठद्दशाङ्गुलम् । अतिष्ठद्दशाङ्गुल दशाङ्गुलमतिष्ठदतिष्ठद्दशाङ्गुलम् । दशाङ्गुलमिति दशअंगुलम् ।।

रेखा— सहस्रशीर्षा पुरुषः । पुरुषः सहस्रशीर्षा । सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः सहस्रपात् । सहस्रपात् सहस्राक्षः पुरुषः । पुरुषः सहस्राक्षः । सहस्राक्षः सहस्रपात् । सहस्राक्षेति सहस्राक्षः । सहस्रपादिति सहस्रपात् ।

स भूमिं ँ सव्वंतस्पृत्व । स्पृत्वा सव्वंतो भूमिं ँ सः सभूमिम् । भूमिं ँ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वात्यतिष्ठद्दशाङ्गुलम् । दशाङ्गुलमतिष्ठदतिस्पृत्वा । स्पृत्वाऽति । अत्यतिष्ठत् । अतिष्ठद्दशाङ्गुलम् । दशाङ्गुलमिति दश अङ्गुलम् ।।

व्वजः— सहस्रशीर्षेति सहस्रशीर्षा । दशाङ्गुलमिति दशअङ्गुलम् । सहस्रशीर्षा पुरुषः । अतिष्ठद्दशाङ्गुलम् । पुरुषः सहस्राक्षः । अत्यतिष्ठत् । सहस्राक्षेति सहस्र अक्षेषः । स्पृत्वाऽति । सहस्रपादिति सहस्रपात् । सव्वंतस्पृत्वा । सहस्राक्षः सहस्रपात् । भूमिं ँ सव्वंतः । सभूमिम् । सहस्राक्ष इति सहस्र अक्षेषः । सव्वंतस्पृत्वा । सहस्राक्षः सहस्रपात् । स्पृत्वाऽति । पुरुषः सहस्राक्षः । अत्यतिष्ठत् । सहस्रशीर्षा पुरुषः । अतिष्ठद्दशाङ्गुलम् । सहस्रशीर्षेति सहस्रशीर्षा । दशाङ्गुलमिति दशअङ्गुलम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डः— सहस्रशीर्षा पुरुषः सहस्रशीर्षा । सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः । सहस्राक्षः पुरुषः । सहस्रशीर्षा । पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः । सहस्राक्षः सहस्रपात् । सहस्रपात् सहस्राक्षः पुरुषः सहस्रशीर्षा । सहस्रशीर्षा पुरुषः सहस्राक्षः । सहस्राक्षः सहस्रपात् । सहस्राक्ष इति सहस्र अक्षः । सहस्रपादिति सहस्रपात् ।

स भूमिम् । भूमि ऽ सः । सभूमिम् । भूमि ऽ सव्वंतः । सव्वंतो भूमि ऽ सः । सभूमिम् । भूमि ऽ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वा सव्वंतो भूमि ऽ सः । स भूमिम् । भूमि ऽ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वाऽति । अतिस्पृत्वा सव्वंतो भूमि ऽ सः । स भूमिम् । भूमि ऽ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वाऽति । अत्यतिष्ठत् । अतिष्ठदतिस्पृत्वा सव्वंतो भूमि ऽ सः । सभूमिम् । भूमि ऽ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वाऽति । अत्यतिष्ठत् । अतिष्ठत् । अतिष्ठददशाङ्गुलम् । दशाङ्गुलमतिष्ठदतिस्पृत्वा सव्वंतो भूमि ऽ सः । स भूमिम् । भूमि ऽ सव्वंतः । सव्वंतस्पृत्वा । स्पृत्वाऽति । अत्यतिष्ठत् । अतिष्ठददशाङ्गुलम् दशाङ्गुलमितिदश अङ्गुलम् । यथः—अस्य मन्त्रस्य रथपाठो न भवति ।

घनः— १-२-३-१-१०२-३-३-२-१-१-२-३

सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः सहस्रशीर्षा पुरुषः सहस्राक्षः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः पुरुषः सहस्राक्षः सहस्रपात् सहस्रपात् । सहस्राक्ष सहस्रपात् सहस्रपात् सहस्राक्षः सहस्राक्षः सहस्रपात् सहस्राक्ष इति सहस्रअक्षः । सहस्रपादिति सहस्रपात् ।

स भूमि भूमि ऽ स स भूमि ऽ सव्वंतः सव्वंतो भूमि ऽ सः स भूमि ऽ सव्वंतः । भूमि ऽ सव्वंतः सव्वंतो भूमि ऽ सव्वंतस्पृत्वा स्पृत्वा सव्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्वतो भूमि भूमि ꣳ सर्व्वत स्पृत्वा । सर्व्वतस्पृत्वा स्पृत्वा सर्व्वतः सर्व्वत स्पृत्वात्वात्यति स्पृत्वा सर्व्वतः सर्व्वत स्पृत्वाऽति । स्पृत्वात्यति स्पृत्वा स्पृत्वात्यतिष्ठदतिष्ठदति स्पृत्वास्पृत्वात्यतिष्ठत् । अत्यतिष्ठदतिष्ठदतिष्ठदत्यत्यतिष्ठद्दशाङ्गुलम्दशाङ्गुलम् तिष्ठदत्यत्यतिष्ठद्दशाङ्गुलम् । अतिष्ठद्दशाङ्गुलं दशाङ्गुलमतिष्ठदतिष्ठद्दशाङ्गुलम् । दशाङ्गुलमिति दशअङ्गुलम् ।

अथ गायत्री मन्त्रस्य घनपाठः—

तत् सवितुः सवितुस्तत् तत् सवितुर्वरेण्यं वरेण्य सवितुस्तत् तत् सवितुर्वरेण्यम् । सवितुर्वरेण्यं वरेण्य सवितुः सवितुर्वरेण्यं भर्गो वरेण्य सवितुः सवितुर्वरेण्यं भर्गः । वरेण्यं भर्गो वरेण्यं वरेण्यं भर्गो देवस्य देवस्य भर्गो वरेण्यं वरेण्यं भर्गो देवस्य । भर्गो देवस्य देवस्य भर्गो भर्गो देवस्य धीमहि धीमहि देवस्य भर्गो भर्गो देवस्य धीमहि । देवस्य धीमहि धीमहि देवस्य देवस्य धीमहि । धीमहीति धीमहि । धियो यो यो धियो धियो यो नो नो यो धियो धियो यो नः । यो नो नो यो नः प्रचोदयात् प्रचोदयान्नो यो यो नः प्रचोदयात् । नः प्रचोदयात् प्रचोदयान्नो नः प्रचोदयात् । प्रचोदयादिति प्रऽचोदयात् ।

इति शम् ।

यजु० ऋग्वेद साहित्य धर्मशास्त्राचार्यः
प्रवक्ता-वनस्थलीविद्यापीठ टोंक राजस्थान
३०४०१२

—।००।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्णजयन्त्यवसरे कालिदासः

— डा० शिव कुमार मिश्रः

★★

संवत्सरमिदं नूनं वैशिष्ट्यमधिगच्छति ।
स्वातन्त्र्यस्वर्णिमे वर्षे राष्ट्रकल्याणकारणात् ।१।

विशेषतश्च कालेऽस्मिन्नस्माभिरार्ष्ट्रवादिभिः ।
स्मरणार्होऽस्त्ययं नूनं कालिदासो महाकविः ।२।

धन्यं राष्ट्रमिदं जातं यत्रायं समजायत ।
कालिदासो महाभागः भूमण्डले प्रशंसितः ।३।

धन्योऽयं राष्ट्रभूषणः संस्कृतेश्च निरन्तरम् ।
संस्कृतस्य समुद्धर्ता सदा विजयतेतराम् ।४।

एतादृशो महाभागः राष्ट्रकल्याणवाञ्छया ।
संस्कृतं संस्कृतिं चेति सदा वर्धितवानयम् ।५।

आस्तिक्यधनिना तेन सर्वत्र प्रकटीकृतम् ।
आस्तिक्य भावनानाञ्च सारभूतं न संशयः ।६।

उपमा तस्य सर्वत्र सङ्गतत्वेन दृश्यते ।
स्वाभाविकी सटीका च उपमेयानुसारिणी ।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतिमूलकधर्मस्य स्मरणेन स्मृतिर्यथा ।
सुदक्षिणा तथा मान्या नन्दिन्या अनुगामिनी ८।

धन्यो महाकवि नूनं कालिदासोऽस्ति सर्वथा ।
वैशिष्ट्येन स सर्वत्र स्मृतो दीपशिखा कविः ।९।

प्राणिमात्रे च तेनैव समानं हृदयं ध्रुवम् ।
निरीक्षितमतस्तस्य काव्ये सर्वत्र दृश्यताम् ।१०।

सुखदुःखादिभिन्नासु दशासु सततं नृणाम् ।
प्रकृतेरपि चान्योऽन्य समवेदनशीलता ।११।

चतुर्थाङ्के विशेषेण शाकुन्तले न संशयः ।
शकुन्तलायै सर्वाणि मण्डनानि यथारुचि ।१२।

तरुभिः संप्रदत्तानि तस्याः सौभाग्य संज्ञिभिः ।
देवताधिष्ठितैः कण्वाभिप्रायस्यानुगामिभिः ।१३।

उद्गिरन्ति स्म कवलं दर्भस्य हरिणाङ्गनाः ।
मयूरी नर्तनं स्वीयं त्यजति स्म निरन्तरम् ।१४।

पाण्डुपत्रं स्वकीयं च पातयन्त्यो ध्रुवं लताः ।
मुञ्चन्ति स्म सदाश्रूणि तदीयगमनक्षणे ।१५।

भारतस्य समग्रे च भूभागे तन्महाकवेः ।
सर्वथा लक्ष्यते स्नेहस्तत्काव्यस्यानुशीलनैः ।१६।

उत्तर प्रहरी नूनं नगराजोऽस्ति देवता ।
कुमारसम्भवे तस्य परिवारो नु वर्णितः ।१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृषिप्रधान राष्ट्रेऽस्मिन् जीमूतोऽपेक्षितः सदा ।
मेघोऽपि मेघदूते वै तस्माद्धि परिवर्णितः ।१८।

उदीच्यां रामगिरित आहिमालयपर्वतम् ।
नद्यश्च गिरयो देशाः विद्यमानाः सुवर्णिताः ।१९।

संस्कृतिर्भारतस्यास्य तत्काव्ये परिलक्ष्यते ।
गोरक्षणस्य वैशिष्ट्यं रघुवंशेऽनुशील्यताम् ।२०।

यस्य नाम्ना अयं देशः भारतं हि निगद्यते ।
तस्यैव भारतस्यास्य राज्ञश्चरितचिन्तणम् ।२१।

विद्यातुमतियत्नेन शाकुन्तलमिहाद्भुतम् ।
सर्वथानुपमं तेन नाटकं रचितं किल ।२२।

कृतिमत्वं सदा तस्मै शोचते स्म न सर्वथा ।
वनजा व्रततिस्तस्मै शोचते स्म यथा तथा ।२३।

न चोद्यानलता तस्मै शोचते स्म सुपालिता ।
शकुन्तलाति रम्या सीद् वल्कलेनापि सर्वथा ।२४।

एव मेव हि सर्वत्र वैशिष्ट्यं तन्महाकवेः ।
नैसर्गिकं सटीकं च सङ्गतत्वेन सिध्यति ।२५।

राष्ट्रस्य स्वर्णिमे वर्षे संकल्पः प्रविधीयताम् ।
अभिनवा शताब्दी स्यात् कालिदासानुगामिनी ।२६।

— संस्कृत विभागस्य
कुँवर सिंह महाविद्यालय, लहेरियासराय।
(बिहार) ८४६००३



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयति श्रीमान् अटलविहारी

-- भगवद्दत्त मिश्र 'विनयी'

★★

अस्त्वस्मद् सीमाञ्चविष्टरा पाद्यं लोचनवारि ।
वाणीमधुरिममधुपर्कः पाणि हृंसुममाली ।१। जयति श्रीमान्-

याग तपस्ये बुधवरिवस्ये यस्य न वाणीवश्ये ।
अ कृतत्वेन भवत्कृतित्वमिह मणिहेमश्रीचारि ।२। जयति श्रीमान्-

अचलो महामहिमहिमवानिव गाम्भीर्यं तु सरस्वान् ।
दुष्ट चरितमुदिराय नभस्वान् सुविवस्वानिव सारो ।३। जयति—

सदाहर्षिणं सुधावर्षिणं शान्तितर्षिणं देशे ।
अङ्के भवादृशं सुतमाप्य धरया किन्नाभाषि ।४। जयति श्रीमान्...

सदनवने पददलितजने यदि शोकैकघनेऽस्ति कोऽपि ।
भवानेव लक्ष्यते भुवीह नवजीवन सञ्चारी ।५। जयति श्रीमान्...

भारतजनतापक्षरक्षणे बहुलं कष्टमकारि ।
पदं पदं प्रति विपदं सेहे किं सेहे ना गालि ।६। जयति श्रीमान्—

व्रती सत्यसन्धो देवव्रत इव देश विधौ धात्रा ।
किं प्रेषिते भवानिह सत्य मावाल ब्रह्मचारी ।७। जयति श्रीमान्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतनवसरणि हंषितधरणिः सज्जनसरसिजतरणिः ।
जीवतु विवेकहव्यभुगरणिः यावच्चन्द्र निशारी ।८। जयति श्रीमान्...

नयवृषभूषण, विगत विदूषण, सद्गुण सरस पूषण ।
अभिनन्दयति भवन्तं 'विनय' विद्यावनी विहारी ।९। जयति श्रीमान्-

तनुतेऽतनुहर्षं श्री कृष्णः

सत्संगः स्तात् सुलभो यत्र कृष्णकथाऽमृतवर्षम् ।
भगवति घातरि पातरि दातरि भूयान्मनः सतर्षम् ।
वीतविषादं नवप्रसादं विश्वं विगतामर्शम् ।१। तनुतेऽतनु-....

बाहुबलं दुर्बलरक्षायै धनसञ्चयतोऽत्रदातुम् ।
प्रतिभाचित्रं यशः पवित्रं चारु चरित्रं मातुम् ।
गतेतिभीति विलापं भूयाद् भूयो भारत वर्षम् ।२। तनुतेऽतनु...

इयं प्रार्थना 'भूते' वाणि ! कल्याणि! ब्रह्माणि !
कविकुलगुरुरिह सुखं त्वदङ्के स्वपिति सदाऽमृतवाणिः ।
बोधय तं युगदर्शां निशामय छिन्धि तमोदुर्धर्षम् ।३। तनुतेऽतनु-

भूस्वरन्तर निरन्तरं वै विदधत्यघरिपु वंशी ।
नदतान्निरन्तरं पुनरत्र गोपीमानसहंसी ।
येन स्वर्गीय श्रीदिव्या कुर्यादवनिस्पर्शम् ।४। तनुतेऽतनु-

इति

... सेवा निवृत्त शिक्षक,
आवाद गंज डालटनगंज पलामू विहार

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा.....

ईश्वरस्यालये तिमिरः

यदा सखवनसिंहः भोजनं करोति स्म। तदैव तस्य पुत्रस्याध्यापक आगच्छत्। सखवनसिंह आह—'श्रीमन्, उपविशतु, किं कारणाद् आगतोऽसि। अध्यापकोऽब्रवीत्-अहन्तु स्वसुयोग्यस्य छात्रस्य विषये ज्ञातुमागच्छम्। मे चेतसि कुतूहलमासीत्, यदसौ सेवावृत्तिमधिगतवान् न वा।' स आह— 'नहि, श्रीमन्। तस्य भाग्य एव विपरीतः।

अहन्तु निर्धनोऽस्मि, उत्कोच दानेऽपि अक्षमः, राजनीति — क्षेत्रेऽपि कोऽपि मे बन्धुः नास्ति। अत उच्चानुनयं कर्तुमपि न समर्थोऽस्मि। सोऽनेकशः साक्षात्काराथं गतः परं तथैव प्रत्यावृत्तः। अधुनापि एकस्मिन् स्थाने साक्षात्काराय गतोऽस्ति'। अध्यापकोऽवदत्—''अफलो भविष्यति, निराशो मा भव। सोऽवश्यमेव आजीविकां लप्स्यते। ईश्वरालये नान्धकारः परं विलम्बस्तु भवत्येव।''

एवं तौ परस्परं वार्तालापे संलग्नौ आस्ताम्, तदैव, हा! एको बालक आगत्य अकथयत्—'भो...भो—पितृव्य! श्रूय-ताम्-श्रूय-ताम् कमलः कूपे स्वात्मानं क्षिप्तवान्। तदा जनैः कथं मत्युद्धृतः साम्प्रतं चौषधालये मरणासन्नो वर्तते॥

— सिकाशिश' इति हिन्दी भाषायाराजकीय संस्कृत महाविद्यालय नाभा पटियाला (पञ्जाब)

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतां पत्राणि

वन्दे संस्कृतमातरम्

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

परम आदरणीय विद्वद्विभूषण सम्पादकमहोदय
सादरं नमो नमः

श्रीमन् भवत्प्रकाशिता पत्रिका अस्माकं गुरुकुलमायाति पत्रिकामधीत्याहं बहुज्ञानसन्तोषञ्चानुभवामि। संस्कृतभाषाया प्रचाराय भवतां प्रयासः प्रशसनीयः। चिन्तयाम्यहम् एकस्मिन् दिने लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि" एतद् वचनं सार्थकं भविष्यतीति संस्कृत भाषायां सर्वे जनाः धर्मग्रन्थान् वेदः दर्शनम् स्मृत्यादिसच्छास्त्राणि शनैः शनैः विस्मृत्य अधोऽधमनुगच्छन्तीति। जनाः वेदान् धर्मग्रन्थान् जानीयुः एतदर्थं भवतां प्रयासाः सर्वथा प्रशस्याः।

— दिव्येश्वर शास्त्री
गुरुकुल आमसेना उत्कलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन्धो ! सुखदः स्वैराचारः

बन्धो ! सुखदः स्वैराचारः
इह नैतिकतायाः अनुसरणे कोऽपि नैव सुखसारः ।
संयुक्ते परिवारे तिष्टन् मनुजो लभते पीडाम्,
मातृ-पितृ-सेवायां कष्टं, रुचिरो लघु परिवारः ।१।
सुरा सुन्दरी मध्ये तिष्ठन् प्राप्स्यसि परमानन्दम्,
त्याग तपस्या सेवादीनां, नैनं कोऽप्याधारः ।२।
पाश्चात्यं संगीतं श्रुत्वा नरो भवति कृतकृत्यः,
नर्तक्याः सर्वाङ्गदर्शनाद्, भवति पापपरिहारः ।३।
ऋणमपि कृत्वा घृतं पिबेयुः, देशे सर्वे लोकाः,
भौतिक वस्तु संग्रहो भूयाद् भोगानां विस्तारः ।४।
नव्य कवीशो वक्ति सखे ! शृणु सततं भवतु यदीत्थम्,
तर्हि करिष्यति पादचुम्बनं, भारतस्य संसारः ।५।
बन्धो ! सुखदः स्वैराचारः ।

– डा० शिव शरण शर्मा
५१–विनयनगर, सेक्टर-१
जेलमार्ग, ग्वालियर (म०प्र०) ४७४०१२

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वस्य प्राचीनतम् पुरातत्वम् परशुरामकुण्डे

मकर संक्रान्ति १४ जनवरी २००२, अरुणांचल प्रदेशस्य लोहित जनपदे परशुराम कुण्ड तीर्थे वार्षिक यात्रा समये दृष्टम् लोहित नद्याम् स्नान तीर्थे परशुराम खण्डमिदम् विश्वस्य प्राचीनतमम् कथानकयुतम् पुरातत्वम् विद्यते।

प्राग्ज्योतिष गोहाटी जोरहाट शिवसागर डिब्रूगढ तिनसुकिया डुमडुमा नामसाई चोखम कमलांग वाकरोत: परशुराम कुण्ड तीर्थं गमनाय मार्ग: विद्यते। परशुराम कुण्ड परिसरे श्रीपरशुराम मंदिरम् स्थापितम् विद्यते। महन्त श्री हरिशरण जी द्वारा भक्तेभ्य: आवास भोजन व्यवस्था क्रियते, दूरस्थ क्षेत्रे मानवता केन्द्रमिव।

— शोधकर्ता डा० कृष्ण नारायण पाण्डेय
उपनिदेशक आकाशवाणी महानिदेशालय नई दिल्ली ११०००१

दिव्यज्योतिषः सदस्यवर्धने सहयोगं दीयताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मानः

डा० गजानन बालकृष्ण पलसुले–

– श्री वाणी न्यास पुरस्कारेणालङ्कृतः

दिल्ली ३०-६-२००३ दिवसे डा० पलसुले महाभागः लक्षद्वयरूपक धनराशि प्रदान पुरः सरं श्री वाणी न्यासपुरस्कारेणालंकृतः संस्कृते श्रेष्ठ रचना निर्माणाय। डा० जोशी महाभागः केन्द्रीय मानवसंसाधनमन्त्रो तथा पुरस्कारायोजकः श्री मृदुहरिद्वालमिया अत्र उपस्थितावास्ताम्। श्री जोशी प्राह –"संस्कृतभाषा विश्वस्य एकल भाषा वर्तते या अष्ट-सहस्रवर्षपूर्वं येन रूपेण स्थिता आसीत् अद्यापि तद्वदेव विराजमाना अस्ति। इत्थं समारोहोऽयं सफलतया सम्पन्नः। एष अष्टमपुरस्कारः एवं विश्व महत्वपूर्णं रचना कृते श्रीवाणीन्यासेन प्रदत्तः।

दिल्ली संस्कृत अकादमी

दिल्ली संस्कृत अकादमी संस्कृत प्रचाराय सततं विभिन्न सामयिक कार्य क्रमायोजनं करोति। श्री कृष्णसेमवालः संस्कृत अकादमी सचिवो-ऽत्र सततं विभिन्न योजना संचालनाय प्रयत्नशीलस्तिष्ठति।

—।★★।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

विक्रमाब्दः २०६० आश्विनः खृीष्टाब्दः २००३ सितम्बर

वर्षम् ४७ अंकः १२

श्री देव्याः प्रातः स्मरणम्

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्कचूडामणिं
चारुस्मेरमुखां चराचरजगत् संरक्षणीं सत्पदाम्
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥

कस्तूरीतिलकाञ्चितेन्दु विलसत्प्रोद्भासि भालस्थलीं
कर्पूरद्रवमिश्रचूर्ण खदिरामोदोल्लसद् वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गोस्तवः

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ।।
आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
यावतीर्भूरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ।।

ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरादधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ।।
गावो भगो गाव इन्द्रो म इच्छाद्गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामि हृदा मनसा चिदिन्द्रम् ।।
यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ।।
प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसान्यामन् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।

प्रेषकः— केशवानन्द शर्मा शास्त्री
राजकीय माध्यमिक पाठशाला
नून (कुमारसैन)

★★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लयजुर्वेदे सामाजिकव्यवस्था

-- डा० शम्भु कुमार झा

वर्तमान् समये शुक्लयजुर्वेदस्याध्ययनाध्यापनं सर्वत्र दृश्यते। भारतीय कर्मकाण्डानां, यज्ञानुष्ठानानां निधिरिव यजुर्वेदः वर्तते। अद्य पण्डिताः, वणिजः, नेतारः, मठाधीशाः अन्ये च जनाः अर्थपरायणाः दृश्यन्ते। अर्थोपार्जनाय सर्वे निन्दितमपि कर्म कुर्वन्ति। वेदः केवलं कर्मकाण्डस्यैव ग्रन्थः नास्ति अपितु संसारस्य समग्रविकासस्य, व्यवहारस्य, ज्ञानस्य च अमूल्य निधिरस्ति। इदानीं मन्त्रपाठकाः विद्वासः बहवः सन्ति ये मन्त्रान् यज्ञ याजने पठन्ति। सामान्यः जनः जानाति वेदः यज्ञाय एव प्रवर्तते यज्ञः कालविशिष्टे सम्पाद्यते अतः अस्माकं जीवने धार्मिक कार्ये एव वेदस्य प्रयोजनं भवति तन्नोचितम्। अत्राहं पृच्छामि यदि 'गणानान्त्वा गणपति....—इति मन्त्रस्य सार्थकता गणेश पूजने एवास्ति तर्हि अस्मिन् मन्त्रे वैशिष्ट्यं किमस्ति।

वेदस्य प्रशंसायां वैदिकैः उच्चार्यन्ते बहवः

श्लोकाः— पितृदेवमनुष्याणां वेदश्चक्षुः सनातनः।

अन्यच्च— वेदे सर्वं प्रतिष्ठितम्।

मम मन्ये 'गणानान्त्वा' इति मन्त्रस्य बहूनि प्रयोजनानि विद्यन्ते तेषु एकं गणेशपूजनमपि भवितुमर्हति। 'वेदे सर्वं प्रतिष्ठितम्' इत्यस्य वाक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य अर्थः लभ्यते नीति शास्त्रं, राजनीतिशास्त्रं; अर्थशास्त्रं, धर्मशास्त्रं अन्यदपि अखिलं शास्त्रं वेदे वर्तते। तदा कथं उक्तमन्त्रेण 'गणपति पूजन' एव भविष्यति ? वेदस्य कर्मकाण्डातिरिक्ताः अपि पक्षाः आलोचनीयाः गवेषणीयाः विचारणीयाः वर्तन्ते।

प्रत्येकस्मिन् काले एकः समाजः भवति एव। समये समये सामाजिकानां जीवने परिवर्त्तनं समायाति। यजुर्वेदस्य ३१ तमे अध्याये सामाजिकव्यवस्थायाः चित्रणं प्राप्यते। मनुष्येभ्यः प्राक् अरण्यपशूनां सृष्टिः बभूव। ब्राह्मणादयः वर्णाः समाजस्याङ्गानि आसन्। 'ब्राह्मणोऽस्य मुख मासीद्बाहूराजन्यः कृतः'। अस्मिन् काले सर्वे सम्मान पूर्वकं जीवनं यापयन्ति स्म। यजुर्वेदस्य ३० तमः अध्यायः पुरुषमेध यज्ञेन सह संबंधितो वर्तते तस्मिन् अष्टपञ्चाशदुत्तरैकशत (१५८) जातीनां अथवा विविधकार्यकर्तृणां चर्चा श्रूयते। तेषां नामभिः कर्मभिश्च वर्णनमसम्भवम् तथापि उदाहरिष्ये 'नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचर नरिष्ठायै भीमलं नर्माय रेभं हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारी पुत्रं मेधायै रथकारं धैर्याय तक्षणम्' यजुर्वेदः—३०.६ अस्मिन् मन्त्रे सूत शैलूष सभाचर भयंकर वाचाल दास स्त्रीमिश्र कुमारीपुत्र रथकार सूत्रधाराणाञ्च स्पष्टोल्लेखः वर्तते।

आचार्य महीधरेणास्य मन्त्रस्य व्याख्यानं कृतम्—
नृत्ताय सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतः। गीताय शैलूषं नटम्। धर्माय सभाचरं सभायां चरतीति तम्। नरिष्ठायै भीमल भयङ्करम्। नर्माय

---

(१) यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्रायचार्य्यायचस्वायचारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूया समयम्मे कामः। समृद्ध्यतामुपदोनमतु ॥

२६.२. यजुर्वेदः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेभं शब्दकर्त्तारम् वाचाटम्। हसाय कारिं करणविशिष्टम्। आनन्दाय स्त्राषखं स्त्रियाः सखायम् प्रमदे कुमारी पुत्रं कानीयम्। मेधायै रथकारं माहिष्येण कारण्यां जायम् धैर्याय लक्षणम् सूत्रधारम्॥

तस्मिन् समये समाजे सर्वं खलु आसीत् परन्तु यथाऽद्य समाजः विखण्डितः दृश्यते अनुरागस्य स्नेहस्य चाभावः दृश्यते तन्नासीत् वैदिककालीन समाजे। अद्य समाजे यो हि मनुष्यः तिरस्कृतः, उपेक्षितश्च प्राप्यते तस्य वैदिककालीन समाजे स्थानमासीत्। सर्वे परस्परसमाजस्याङ्गानि आसन् न कोऽपि श्रेष्ठः कनिष्ठः वा। यज्ञमाध्यमेन सर्वेषां जनानां परिचयः भवति स्म। तेन समाजस्य विकास यात्रा नैरन्तर्येण प्रचलतिस्म इदानीं तस्याभावः वर्तते।

शुक्लयजुर्वेदकालीन समाजे यज्ञस्य महत्वपूर्णं स्थानमासीत्। तेषां सामाजिकानां विश्वासः दृढः आसीत् यत् वयं यज्ञेनैव सर्वाः कामनाः पूरयिष्यामः। द्रव्य देवता त्यागः' (१) सूत्रमाध्यमेन कात्यायनश्रौतसूत्रे यज्ञस्य अर्थः कृतः वर्तते। यज्ञभेदेन द्रव्यभेदः विधेयः। संसारे आब्रह्मस्तम्बपर्यंतमखिलमपि द्रव्यमेव। कामनानुसारं यज्ञस्य पृथक् पृथगादेशः वर्तते। केचन यज्ञाः वेदाज्ञया आजीवनं कर्त्तव्याः सन्ति यथा दर्शपूर्णमासौ, पिण्डपितृयज्ञः। पञ्चमहायज्ञाश्च। यज्ञाः सर्वे मनुष्यैः

---

(१) मम मन्ये समस्तमपि सत्कर्म यज्ञ शब्देन वक्तव्यम्। यज्ञे त्यागस्य लोकोपकारस्य भावना प्रबला भवति तथापि श्रीमद्भागवते रामचरित मानसे च—धनुर्यज्ञः इति श्रूयते। अन्यच्च युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि। अत्र युद्धमपि एकः यज्ञः वर्तते। अयं भावः अनेन युद्धेन लोकोपकारः भविष्यति। उपकाराय यत् किमपि क्रियते तत् यज्ञः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचरणीया। यजुर्वेदस्य अद्य स्तन मन्त्रे बारम्बारं 'यज' पदस्यावृत्तिः दृश्यते—वसुधेयस वीतां यज। वसुधेयस्य व्यन्तु यज। आज्यस्य होतर्यज। इमे मन्त्राशा। अष्टाविंशोऽध्याये वर्तन्ते। अस्मिन्नध्याये सर्वेषां मन्त्राणामन्ते 'यज' पदस्य पाठः वर्तते। अनेन स्पष्टउद्घोषः प्राप्यते हे मनुष्य होतः त्वमपि यज। यज्ञः कर्त्तव्य कोटौ आगच्छति। अतः यज्ञः अवश्यमेव सर्वैः विधेयः। ऐतरेय ब्राह्मणे—

'यज्ञो वै श्रेष्ठतमं कर्म' इति।

तत्कालीनाः जनाः अग्निना सुपरिचिताः आसन् तथा ते पाचितं सुस्वादुभोजनं च खादन्ति स्म। एकोनत्रिंशतमेऽध्याये वर्णनं प्राप्यते यत् वनस्पतिः शमिता, अग्निश्च सुस्वादु भोजनं पचेत—"वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन"—२९, ३५ यजु०

तस्मिन् समये जनाः बहूनि प्रकारकानि अन्नानि जक्षुः—(अज्ञासिषुः) तानि यथा— व्रीहीं, यवाः, तिलाः, मुद्गाः, गोधूमाः "व्रीहयश्च मे यवाश्चमे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्चणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्"— १८.१२

अस्मिन् मन्त्रे यज्ञमाध्यमेन बहूनामन्नानां कामना क्रियते याज्ञिकैः। मुख्यतया दुग्ध दधि घृत तक्रानि तथा दुग्धैः निर्मितानि वस्तूनि ते खादन्ति स्म। ओदनं शष्कुली, तथा यवमयानि वस्तूनि तेषां सामान्यं भोजनमासीत्। ते (जनाः) भोजनात् प्रागेव सम्यक्तया अन्नानां समस्त पदार्थानाञ्च परीक्षणं कृत्वैव अभक्षयन्। किमिदं अन्नं रोगग्रस्तं उत भक्ष्यम्। यजुर्वेदे एकादशेऽध्याये त्र्यशीतितमे मन्त्रे अस्याशयस्य वर्णनमवलोक्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नपतेऽन्नस्य नोदेह्यनमीवस्य शुष्मिण।।
प्रप्रदातारं तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पदे ।।

अर्थात् हे अन्न पालक अग्निदेव। शोकरहितं बलकरमन्नं मम भाग्यस्य महद्यश देहि। अन्नं दातृयजमानं प्रवर्द्धय। तस्मिन् समये अन्नानां विनिमयमपि कुर्वन्ति स्म। तृतीय परिचय प्राप्यते—

पूर्णां दर्विं परापत सुपूर्णा पुनरापत। .....

देहि मे ददामि ते.....

यजुर्वेदकालेऽपि जनाः ग्रामं त्यक्त्वा अन्नादित्माभाय अन्यस्मिन् स्थाने गच्छन्ति स्म। मार्गे बुभुक्षा शान्त्यर्थं ते शंबलं (पाथेय) नीत्वा चलन्ति स्म तस्मिन् शंबले ओदनं राटिका वा बभूवुः। तृतीयेऽध्याये एकचत्वारिंशतमः मन्त्रः प्रसंगेऽस्मिन् उदाहृयते-गृहामा बिभीतमा वेपध्वमूर्जं बिभ्रतं एमसि।

ऊर्जं बिभ्रद्वः सुभनाः.....(१)

अर्थात्— हे गृहाः यूयं मा बिभीत। पालको यजमानो गतः इति भयं मा कुरुत। कोऽपि शत्रुरागत्य विनाशयिष्यतीति बुद्धया कम्पं मा काष्टं। अचिरेणैव कालेनाहं अन्नादिकं धारयन् सुप्रसन्नमना भूत्वा पुनरागमिष्यामि।

---

(१) गृहा मा विभीतेति गृहानुपैति (कात्यायन श्रौ० ४.१२.२२)
इति ग्रामान्तरात् आगतः गृहामा इत्यादि मन्त्रत्रयेण गृहं प्राप्नुयात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवासेऽपि ते प्रतिपलं स्वकीयानि गृहाणि सुखसमृद्ध्यर्थं अस्मरन्। तस्मिन्नेवाऽध्याये ४३ तमे मन्त्रे विस्तरेण चर्चितः विषयः। —

"उपहूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु नः। क्षेमायवः शान्त्यै प्रपद्ये शिवं शग्मं शयोः शयोः॥ ३,४३ यजु० अय भावः—अस्मिन् गृहे अजाः गावः, मेषाश्च आहूताः। अन्नस्यानुपानं मधुरं जलञ्चेति याचितम्। कल्याणाय शान्त्यै च गृहं प्रविशामि। शुभसुखशान्तीनाञ्च प्राप्तिः भयानां दूरीकरणं चाहं आप्नुयाम्। एतेषां गृहाणि बस ग्रास निर्मितानि अभवन् तथा तेषां ज्ञानं इष्टिका विषयेऽपि आसीत्। गृहेषु सुरक्षायैद्वार अर्गला देहली कपाटानि संलग्नानि भवन्ति स्म। - देवीर्द्वारः इन्द्रं संघाते वीडवीर्यामिन्नवर्द्धयन २८.१३ यजुर्वेदस्य १८ तमेऽध्याये गृहनिर्माण सम्बन्धिवस्तूनां चर्चा विद्यते—

अश्माचमे मृत्तिका च मे गिरयश्च मे पर्वताश्चमे।
सिकताश्च मे हिरण्यञ्चमे यश्च मे सीसञ्चमे त्रपुच्च मे॥

जनानां गृहेषु काष्ठमयानि पात्राणि कपाल-दर्वि चमस प्रभृतीनि उपयुज्यन्ते स्म। तस्मिन् पात्रे जलाभरणमपि चक्रुः। भोजनाय कमलपत्राणामपि सञ्चयशब्दाभ्यां स्पष्टो भवति ते जनाः एकस्यां पंक्तौ उपविश्य सहैव बुभुजिरे। तस्मिन् समये ग्रामे ग्रामसभाया अपि विशिष्टं महत्वं प्राप्यते. यद्ग्रामे यदरण्ये यत्सभायां—

धानाः करम्भः सक्तवः पयोदधि।
सोमस्य रूपं——आमिक्षा वाजिनं मधु॥

यजुर्वेदकालीनः समाजः पूर्णः सभ्यः विवेकपूर्णश्चः आसीत्। बहुविधानां वस्त्राणां निर्माणं परिधापनञ्च क्रियन्ते स्म जनाः। —

"दीक्षा तपसोस्तनूरसि तां त्वा शिवां शग्मां परिदधे भद्रं वर्ण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्यन्" — ४ २

ऊर्णा सूत्रेण कवयो वयन्ति ।
कतिवासा अहि सन्नः ॥

'सोमस्य नीविरसि' इति मन्त्रांशेन वस्त्रे ग्रन्थी क्रियते स्म । उपवेशनाय कमनीयानां मृगचर्मणां शशीशाणि स्निग्धकरणाय नवनीतानां, सूरूपाय अक्ष्णोः कज्जलस्य च परम्परा प्रचलिताऽऽसीत् । स्वर्णाभूषणानि ते आधिव्याधिनाशाय दीर्घायुषः प्राप्तये च दधुः (दधिरे)—

"न तद्रक्षांसिपिशाचास्तरन्ति देवानामोजः प्रथमज ह्येतत् यो बिभर्ति दाक्षायणं हिरण्यम्...

सोम यागे सोमसंस्काराय कम्बलस्य प्रयोगः प्रोक्तः अनेन ज्ञायते यत् ते कम्बलानि वयन्ति स्म ।

सामान्यतः उपवेष्टुं कुशनिर्मितानां आसन्दिकानां ग्रहणं भवति स्म ।

स्त्रियः वस्त्राणि अवयन् । यानि वस्त्राणि दर्शनीयानि कमनीयानि च बभूवुः । —"सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः" — १९८३, मुञ्जमयानि कटिसूत्राणि स्त्रियः पुरुषाश्च दधुः । स्त्रियः पतिगृहे एव (ऊर्णुः) वसन्ति स्म तथा शिशून् (स्तनंधयान्) स्तनपानं निश्चितरूपेण कारयन्ति स्म । —

इमं स्तनमूर्ज्जस्वन्तं धयापाप्रीपनमग्ने.....

यदापिपेष मातरम्पुत्रः प्रमुदितो धयम्.....—

विवाहविच्छेदस्य सूचना यजुर्वेदे न लभ्यते तथा विवाहिताः स्त्रियः पितुः गृहात् गन्तुं कामयन्ते परन्तु पतिः गृहात् कदापि पृथक् स्थातुं न वाञ्छन्ति —

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिवबन्धनात् इतो । मुक्षीय मामुतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवारस्य सर्वे सदस्याः परस्परं योगक्षेमं कामयन्ते स्म। यजुर्वेदस्य षोडशेऽध्याये समस्तपरिवारस्य पशुधनानां च रक्षार्थं प्रार्थना चक्रुः। —

"मानस्तोके तनयेमान.....

पञ्चदशाध्यायस्य पञ्चाशत्तमे मन्त्रे संयुक्त—

परिवारस्य प्रबला भावना दर्शीदृश्यते—

'तं पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैं" १५.५० यजु० कृषि विषयेऽपि यजुर्वेदे विस्तरेण वर्णनमुपलभ्यते। कृषि कर्मणि काष्ट-मयानिहलानि (फालसंयुक्तानि) वृषभाश्च प्रयुज्यन्ते स्म। यथाद्य ग्राम्याः शिक्षाविरहिताः जनाः कृषिकर्माणि कुर्वन्ति न तथा यजुर्वेद काले आसीत् अपितु विद्वांसः तस्मिन् प्रसिद्धप्रतिष्ठितकर्मणि भागं जगृहुः। मन्त्रे 'कवयः' पदं तत्प्रमाणयति। यजुर्वेदस्य द्वादशाध्याये एते मन्त्राः प्रोक्ताः।

"सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया" ॥

अर्थात् अग्निक्षेत्रस्य ज्ञातारः (जानानाः) कृषिकर्मणि कुशलाः हलानि वृषाभ्यां संयोजयन्ति तथा देवैः सुखं प्राप्त्यर्थं बहूनि क्षेत्राणि कर्षयन्ति।

युनक्त सीरा वियुगातनुध्वं कृते योनौ वपतेह बीजम्।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्॥

हे कृषक! त्वं हले वृषान् युङ्क्ष्व (युङ्क्ष्व)। सुसंस्कृते भूमौ बीजानां वपनं कुरु। ओषधयः कालेन पक्वाः भवन्तु।

कृषकाय वेदादेशः वर्तते यत् शोभनेन फालेन (लोहमयेन) भूमेः कर्षणं कुर्यात् तथाऽऽशुगन्त तीव्रगत्या (गतिना) वृषान् न चालयेत् अपितु शोभन मनस्कः सन् हलचालनं कुर्यात्। शुनं सुफालाः विकृषन्तु भूमिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

LIBRARY Gurukul Kangri Vishwavidyalaya HARDWAR

शुनं कीनाशा अभियन्तु वाहैः। १२.६९.

मुख्यरूपेण कृषिः वृष्टिजलाधृतः आसीत्।

यजुर्वेदे अनेकानि जलस्रोतांसि चर्चितानि यथा—

"नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च नमो नादेयाय च वैशन्ताय च।

नमः कूप्याय चावट्याय च नमो वीध्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चा वर्ष्याय च॥ (१) (१६ अध्याये)

यजुर्वेदकाले कृषिकर्म समस्तसमृद्धीनां, ऐश्वर्याणां प्रतीक भूतमासीत्। कृषकाः कृषिभिः शान्तिमयं जीवनं यापयन्ति स्म। विशेषतः कृषि कर्मणि ते ईश्वरे विश्वासं चक्रुः।

कामं काम दुघे धुक्ष्व मित्राय वरुणाय च
इन्द्राग्निभ्यां पूष्णे प्रजाभ्यओषधीभ्यः॥

क्षेत्रकर्षणानन्तरं कृषकाः वृषभान् ग्रासभक्षणाय मोचयन्ति स्म। ते कृषिकर्मणि विश्वस्ताः आसन्। कृषिकर्ममात्रेण ते क्षुत्पिपासारूपान्धकारात् मुक्ताः अजानन्। विमुच्चध्वमदन्या देवयाना अगन्मतमसस्परमस्य ज्योतिरापाम्॥ १२-७३

रोगाणामुपचाराय ओषधयः अपि अवपन्त। उपचारविधिवेत्ता भिषक् नाम्ना ज्ञायते स्म। वैद्यः स्व स्व क्षेत्रे निपुणा कुशलः चासीत्। एतत

---

(१) जलस्रोत विषये यजुर्वेदे २२ अध्यायस्य पञ्चविंशः, षड्विंशमन्त्रश्च ध्यातव्यः वर्तते। अद्भ्यः स्वाहा—२५
वाताय स्वाहा—२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संबंधी मन्त्राः द्वादशाध्याये संकलिताः सन्ति । सोमः ओषधीनां राजा आसीत् । विद्वांसः सोमक्रयणं चक्रुः सोमक्रयणायाधिकं मूल्यमपि ते ददुः (अददु) । सोमक्रयणाय गावः, अजाः, स्वर्णाणि च विनिमयद्रव्याणि आसन् एते मन्त्राः यजुर्वेदे ४ अध्यायतः ८ अध्यायं यावत् पठिताः सन्ति ।

पशुपालने अपि एते जनाः श्रेष्ठाः आसन् । अश्वमेध प्रकरणे सप्तविंशत्युत्तरशततम (३२७) ग्राम्य पशूनां परिचयः तत्र लभ्यते । मुख्यरूपेण गावः महिष्यः, अजाः, मेषाः, उष्ट्राः, च तैः पालयाञ्चक्रिरे ।

जनाः शकटयानेन, रथेन, अश्वारूढेन यात्रां कुर्वन्ति स्म । यजुर्वेदे एकविंशेऽध्याये नावः अपि चर्चा वर्तते ।

सुनावमारुहेयमास्रवन्तीमनागसम् । शतारित्रां स्वस्तये ।। २१-७

अर्थात् अच्छिद्रायां, पापरहितायां (क्लेशरहितायाम्) शतदण्डयुक्तायाँ नावि अहं स्वकल्याणायारोहणं करोमि । देवगणाः रथारूढाः भवन्ति स्म । विशिष्टजनाय रथविशेषस्य वर्णनमुपलभ्यते रथे कदाचित एकाश्वाः कदाचित् सप्ताश्वाः भवन्ति स्म ।

"वनस्पते वीड्वङ्गो हि भूया अस्मत् सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ।। " २९.५२

अत्र महीधरस्य व्याख्यानं प्रस्तूयते-हे वनस्पते ! काष्ठमयरथ त्वं वीड्वङ्गः दृढाङ्गो भूयाः भव । कीदृशः अस्मत्सखा अस्माकं मित्रभूतः । प्रतरणः प्रतरणः प्रतरति संग्रामपारं गच्छति प्रतरणः । शोभनो वीरः रथी यत्र । किंच हे रथ यतः त्वं गोभिः गोविकारैश्चर्मभिः बद्धोऽसि । अतः वीडयस्व आत्मानं स्तम्भय । किं च तवास्थाता आरोढा रथी जेत्वानि रिपुधनानि जयतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परन्तु आकाश मार्गेऽपि विमानस्य चर्चा न श्रूयते अपितु रथारूढाः एव देवाः आकाशात् पृथिव्यां यत्र तत्र समागच्छन्ति यथा–वायो ये ते सहस्रिणो रथासस्ते भिरागहि । अन्यच्च– हिरण्मयेन सविता रथेनादेवो याति भुवनानि पश्यन् । बहूनां मन्त्राणां समीक्षणेन ज्ञायते यत् विमानस्यैव नाम अत्र रथः वर्तते ।

यजुर्वेदस्य राजसूय प्रकरणे द्यूतक्रीडायाः वर्णनं मनोरंजनाय वर्तते । यद्यपि त्रिंशतमेऽध्याये नृत्य-गीत कवीनां वर्णनेन ज्ञायते एते जनाः समाजस्य मनोरंजनाय नृत्यादिकं कुर्वन्ति स्म । यजुर्वेदे घृताची, मेनकादि अप्सरसामपि नामानि पठ्यन्ते । यज्ञमाध्यमेन पशुपक्षीणां संघनमपि (प्रदर्शनी) क्रियते स्म अनुमीयते यत् एतदपि मनोरंजनस्य साधनमासीत् । यजुर्वेदकालीनाः जनाः अध्यात्मचिंतनेऽपि उत्कृष्टाः आसन् । तैः आत्मा परमात्मा कर्म धर्माश्च सम्यक्तया जज्ञिरे ।

उदाहरणानि—
हिरण्यगर्भः समवर्तताग्रे.....
तदेवाग्निस्तदादित्यस्तद्वायुः—...
विश्वकर्माहयजनिष्ट देव—...
ईशावास्यमिदम्—

विद्ययामृत मश्नुते प्रभृतयो मन्त्राः तत्कालस्याध्यात्म ज्ञानस्य परिचायकाः विद्यन्ते । जनाः यज्ञादिआचरणेन त्यागमयेन जीवनेन मोक्षमार्गे कृतप्रयत्नाः आसन् ।

सारांशरूपेण वक्तुं शक्यते पुरुषार्थं चतुष्टयानां प्राप्तिः यजुर्वेदकालीनानां सामाजिकानां प्रमुखः उद्देश्यः (कर्त्तव्यः) आसीत् । ते प्रवृत्तिमार्गेण निवृतिपथे अग्रसराः आसन् । अद्यापि समाजस्य संपूर्ण विकासाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुख समृद्ध्यर्थं च यजुर्वेदकालीना समाजा प्रासंगिका वर्तंते । अस्मिन् कलिकाले यजुर्वेदस्याध्ययनेन तत्कर्मानुष्ठानेन च समाजस्य, राष्ट्रस्य, उत विश्वस्य च कल्याणं भविष्यति । इति । शम् ।

सन्दर्भितग्रन्थाः—

१. यजुर्वेदा—दयानन्द, महीधर भाष्यम्
२. निरुक्तम्
३. यजुर्वेदा राम कृष्ण शास्त्री
४. वैदिक साहित्यस्येतिहासः
५. वैदिक विज्ञान और भारतीय संस्कृति

प्रवक्ता, सं० दर्शन एवं वैदिक अध्ययन
विभाग वनस्थली विद्यापीठ टोंक,
राजस्थान ३०४०२२

★★

※※



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी: दिल्ली सरकार
प्लाट सं.५, झण्डेवालान, करोल बाग, नई दिल्ली-५

'अखिल भारतीय संस्कृत पण्डुलिपि आर्थिक सहयोग प्रकाशन योजना २००३-२००४'

दिल्ली संस्कृत अकादमी भारत के संस्कृत विद्वानों, लेखकों तथा कवियों से अप्रकाशित संस्कृत पाण्डुलिपियों के प्रकाशनार्थ आर्थिक सहयोग प्रदान करने हेतु आवेदन पत्र आमन्त्रित करती है। पाण्डुलिपि की भाषा अनिवार्य रूप से संस्कृत होनी चाहिए। यदि कोई लेखक संस्कृत की पाण्डुलिपि को हिन्दी अथवा अंग्रेजी अनुवाद सहित भी प्रस्तुत करता है तो वह स्वीकार्य होगी। संस्कृत की उत्कृष्ट एवं पुरातन पाण्डुलिपि को अकादमी अपने स्तर पर भी प्रकाशित करसकती है। यदि किसी व्यक्ति के संरक्षण में १०० वर्ष से पूर्व की कोई पाण्डुलिपि हो तो इसके प्रकाशन के सम्बन्ध में अकादमी से सम्पर्क कर सकते है।

पाण्डुलिपियां प्रस्तुत करने हेतु आवेदन पत्र तथा तत्सम्बन्धी नियम किसी भी कार्य दिवस में प्रातः १०-०० बजे से सायं ५-०० बजे के मध्य दिनांक १०.९.२००३ तक अकादमी से निःशुल्क प्राप्त किए जा सकते है या डाक द्वारा भी मंगाये जा सकते हैं। आवेदन-पत्र सहित पाण्डुलिपि जमा करवाने की अन्तिम तिथि १५-९-२००३ है। अन्तिम तिथि के पश्चात् प्राप्त आवेदन पत्रों एवं पाण्डुलिपियों पर विचार नहीं किया जायेगा।

— डा० श्रीकृष्ण सेमवाल
सचिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साकेतसौरभ–प्रसारः

डा० रामकृष्ण सराफ

★★

साकेतसौरभं दृष्ट्वा धारणा परिवर्त्तिता
कालिदासः कविष्ठार्यां भास्करोऽनामिकास्थितः ।१।

साकेतसौरभं नूनं श्रेष्ठकाव्यगुणान्वितम्
एतत् सर्वगुणाढ्यत्वात् सुतरां सौरभायते ।२।

अत्र रीतिरलङ्काराः गुणध्वनिरसास्तथा
विद्यते काव्यसौन्दर्यं तेन याति प्रशस्यताम् ।३।

सामान्यतो गुणा एते श्रेष्ठकाव्ये भवन्ति हि
साकेतसौरभं त्वस्ति किञ्चिद् वैशिष्ट्यसंश्रितम् ।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकाव्येषु न प्रायो वर्तते लोकचेतना
साकेतसौरभे सा हि सविशेषं परिस्फुटा ।५।

महाकाव्ये कृता भाति रामराज्यस्य कल्पना
मोषकर्म न तत्रास्ति दीनत्वं वा न विद्यते ।६।

राष्ट्रे सर्वं विपर्यस्तं साम्प्रतं तु स्थले स्थले
वृद्धिर्गताऽपराधानां गणना काऽपराधिनाम् ।७।

कविना वीतभीकेन साहसेन विवर्णितम्
तदेव ग्रन्थवैशिष्ट्यं यदन्यत्र न दृश्यते ।८।

शासकाः सन्ति ये केचिद् वृत्तहीनाश्च लोलुपाः
विवेकानन्ददेशस्तैः प्रयाति वचनीयताम् ।९।

प्रतिष्ठा वेदधर्मस्य दम्भमानौ प्रवर्तितौ
नोशीसम्मानरक्षा नो देशो भ्रष्ट इति ध्रुवम् ।१०।

उच्चैर्नीचैश्चिति श्रेण्यौ कविना न समर्थिते
समर्थितं समानत्वं स्नेहसम्पन्निबन्धनम् ।११।

आतङ्को शङ्कतां यायादिति कामयते कविः
निवसन्ति वने ये ते बान्धवा आदिवासिनः ।१२।

महाकवेर्विचारालीं शास्त्रस्थेन विभूषिता
साकेतसौरभं तेन सत्त्वोत्कर्षेण राजते ।१३।

सत्तऽऽचरणमाख्यातुं कालिदासोऽभवत् क्षमः
साकेतसौरभे तद्वत् क्षमते भास्करः कविः ।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावद् वियति वर्तते दिवाकरसुधाकरौ
साकेतसौरभं तावद् भ्राजते धरणीतले ।१५।

सिद्धार्थस्य कवे कीर्त्तिर्व्याप्नुयात् क्षितिमण्डले
जीवेच्छरत्सहस्राणि यशः श्लोको विभाकरः ।१६।

पुस्तकनाम	—	साकेतसौरभम्
प्रणेता	—	डा० भास्कराचार्य त्रिपाठी
प्रकाशकः	...	नागपब्लिशर्स, दिल्ली ११०००७
प्रकाशनवर्षम्	...	२००३ ई०
पृष्ठ-संख्या	—	२२७
मूल्यम्	...	रूप्यकाणि ७३=००

ई ७/५६२ अरेरा कालोनी
भोपाल-४६२०१६

★★



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी, दिल्ली सरकार,
प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५.

'अखिल भारतीय मौलिक संस्कृत साहित्य रचना पुरस्कार योजना २००३-२००४'

दिल्ली संस्कृत अकादमी भारत के संस्कृत विद्वानों, लेखकों, नाटककारों तथा बाल-साहित्य लेखकों से वर्ष २००३-२००४ के लिये अखिल भारतीय मौलिक संस्कृत साहित्य रचना पुरस्कार योजना के अन्तर्गत भाषा की मौलिक तथा अपुरस्कृत पुस्तकें आमन्त्रित करती है। पुरस्कार का विवरण निम्नानुसार है।

क्र. सं.	पुरस्कार का नाम	संख्या	राशि
१.	पण्डितराजजगन्नाथ संस्कृत पद्य रचना पुरस्कार.	१	रु. ७०००/-
२.	पण्डितचारुदेव शास्त्री संस्कृत पद्य रचना पुरस्कार.	१	रु. ७०००/-
३.	डा. आदित्यनाथ झा संस्कृत नाट्य रचना पुरस्कार.	१	रु. ७०००/-
४.	पण्डितदीनानाथ शास्त्री संस्कृत समालोचनात्मक साहित्य रचना पुरस्कार.	१	रु. ७०००/-
५.	अब्दुलरहीमखानखाना विविध संस्कृत समालोचनात्मक साहित्य रचना पुरस्कार.	१	रु. ७०००/-
६.	डा. गोस्वामीगिरधारीलाल शास्त्री संस्कृत कथा साहित्य रचना पुरस्कार.	१	रु. ७०००/-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. पण्डित परमेश्वरानन्द बाल संस्कृत साहित्य रचना १ रु. ७०००/-
८ पण्डित इन्द्रचन्द्र शास्त्री दर्शन साहित्य रचना पुरस्कार.१ रु.७०००/-
९. वैद्य भुवनचन्द्र जोशी संस्कृतपरक आयुर्वेद साहित्य १ रु.७०००/-
रचना पुरस्कार,

इसके अतिरिक्त उपर्युक्त प्रत्येक संस्कृत विद्वान् के नाम पर रु. ३०००/- का एक-एक प्रोत्साहन पुरस्कार भी होगा।

१. सभी रचनाओं का प्रकाशन वर्ष आवेदन पत्र जारी करने से दो वर्ष पूर्व की अवधि का ही मान्य होगा।

२. आवेदन पत्र तथा विस्तृत नियम अकादमी कार्यालय से प्रत्येक कार्य दिवस (शनिवार और रविवार छोड़कर) पर प्रातः १०.०० बजे के बीच दिनांक १९-९-२००३ तक प्राप्त किये जा सकते है अथवा डाक द्वारा भी मंगाये जा सकते है। रचना सहित आवेदन पत्र प्रस्तुत करने की अन्तिम तिथि २५-९-२००३ है।

३. एम. फिल., पीएच. डी. आदि एवं तत्समकक्ष उपाधियों के लिये प्रस्तुत शोध ग्रन्थ पुरस्काशर्थ स्वीकार्य नहीं होंगे।

४. केवल क्रम सं. ५ के पुरस्कार हेतु अर्थात् विविध समालोचनात्मक रचनाओं की भाषा संस्कृत के अतिरिक्त हिन्दी भी हो सकती हैं।

— श्रीकृष्ण सेमवाल
सचिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database

Signature with Date
10/5/05

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar